CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२—२ वा. सं. म. वि.
रामशाहपथ, २०६७-६८ का.ठ.
५,२
नं० २२२

विश्व-संस्कृतम्

आ.
१

…न्द-वैदिक-शोध-संस्थानम्
…:, होशिआरपुरम् (पं. भारतम्)
२०२४ वि.

वार्षिकं शुल्कम्
भार… ८ • विदेशे १२ शिलि.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयं-सूची

१. शाश्वती वाक्		१०५

काव्य-निकुञ्जम्—

२. जागृत जागृत वीरा ! रे !!	शिवसागरः त्रिपाठी	१२२–१२३
३. किमर्थमित्थं परमं प्रहृष्टाः	अ. वे. सुब्रह्मण्यः	१३९–१४०
४. होलिकाष्टकम्	ब्रह्मदत्तः	१५७
५. भारत-विभूति-वन्दनम्	त्रिलोकचन्द्रः	१७२–१७४
६. भक्तसिंहः	श्यामदेव पाराशरः	१९०–१९१
७. ग्रीष्म-सन्तापः	दामोदरः	१९५
८. विश्व-संस्कृतम्	कोविदाचरणद्विवेदी	१९९–२००
९. प्रकीर्णाः	रघुवरदत्तशास्त्री	

निबन्धाः—

१०. भारतीय-साहित्यशास्त्रे रसाभासः	श्रीनिवासः	१०७–११४
११. छन्दः शास्त्रस्य गणितीयाः सिद्धान्ताः	शक्तिधरशर्मा	११५–१२१
१२. प्रस्थान-त्रय-तत्त्व-दर्शी कालिदासः	टी. के. गोपालस्वामी	१२४–१३०
१३. माया सर्वदर्शनानुस्यूता	केदारनाथ ओझा	१३१–१३८
१४. बौद्धागमे प्रमुखा वादाः	व्रजनन्दनमिश्रः	१४१–१४५
१५. संस्कृत-भाषायाः पत्रकारिता-क्रमविकाशः	गणेशरामः	१४६–१५६
१६. न्याय-वैशेषिक-मतयोः श्रुति-स्मृति-स्वरूपम्	टी. एम्. श्रीनिवासशास्त्री	१५८–१६७
१७. धर्मशास्त्राणां परमोपादेयता	साधुरामः	१६८–१७१
१८. संस्कृतसाहित्ये वेणी-बन्धनम्	ब्रह्मानन्दत्रिपाठी	१७५–१७७
१९. अस्ति कृजिर् भौवादिको न वा	शिवनारायणः	१८३–१८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सं०२२२

२०. गृह्य-सूत्रेष्व् आपोहिष्ठीय-
मन्त्राणां विनियोगः — कृष्णलालः — १८५-१८९

नाटकम्—

२१. कलिविडम्बनम् — हरिदत्तशास्त्री — [illegible]-१८२

महिला-मण्डपम्—

२२. संघे शक्तिः कलौ युगे — मनोरमा कुठियाला — १९२-१९४

छात्र-वीथी—

२३. राष्ट्र-भाषा — कु० आभारश्मि — १९६-१९८

साहित्य-समीक्षा — २०१

समाचाराः — २०२

FORM IV

1. Place of Publication .. Sadhu Ashram, Hoshiarpur
2. Periodicity of its Publication .. Quarterly.
3. Printer's Name .. Sh. DEV DATTA Shastri.
Nationality .. INDIAN.
Address .. P.O. Sadhu Ashram, Hoshiarpur.
4. Publisher's Name .. Sh. DEV DATTA Shastri.
Nationality .. INDIAN.
Address .. Sadhu Ashram, Hoshiarpur.
5. Editor's Name .. Dr. VISHVA BANDHU
Nationality ... INDIAN.
Address P. O. Sadhu Ashram, Hoshiarpur.
6. Names and addresses of individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital. V. V. R. Institute Society, ..Sadhu Ashram, Hoshiarpur.

I, DEV DATTA SHASTRI, hereby declare that the particulars given above are true to the best of my knowledge and belief.

Date : 1-5-1968.

DEV DATTA SHASTRI
Publisher

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकीर्णाः

रघुवरदत्तशास्त्री*

कृष्णीकरोति विमलान् किल राजहंसान्
शुक्लीकरोति मलिनाशन-मत्त-काकान् ।
योऽनन्त-शक्तिरमितद्युति-वीर्य-सिन्धुः
तस्मै नमो भगवतेऽक्षतविक्रमाय ॥

या राज-नीति-निपुणान् समुदार-चित्ता-
नुच्चैः-स्थितान् भुवि निपातयति प्रवीरान् ।
नीचैर्गतांस्तु विदधाति जगत्प्रपूज्यान्
तस्यै नमो विपुल-शक्ति-समर्चितायै ॥

*संस्कृताध्यापकः, ५४०/२ अम्बाला सिटी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं०२२२

विश्व-संस्कृतम्

विश्व-ज्योतिः सदा शुभ्रं संस्कृतं विश्वम् आचरत् ।
साहित्यस्य सतः सिद्धया उदितं विश्व-संस्कृतम् ॥

वर्षम् ५ } फाल्गुनः २०२४ (फरवरी १९६८) { अङ्कः २

शाश्वती वाक्†

मधु जनिषीय मधु वंशिषीय ।
पयस्वानग्न आगमं तं मा सं सृज वर्चसा ॥

सं माऽग्ने वर्चसा सृज सं प्रजया समायुषा ।
विद्युर् मे अस्य देवा इन्द्रो विद्यात् सह ऋषिभिः ॥

यथा मधु मधुकृतः संभरन्ति मधावधि ।
एवा मे अश्विना वर्च आत्मनि ध्रियताम् ॥

यथा मक्षा इदं मधु न्यञ्जन्ति मधावधि ।
एवा मे अश्विना वर्चस् तेजो बलमोजश् च ध्रियताम् ॥

(अथर्व० ९,१,१४-१७;)

† अत्राऽधोरेखितः स्वर उदात्तः, अनङ्कितश् चाऽनुदात्तो यथोपलम्भं द्र.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मोद्धारः

बहादुरचन्द्रश्चापोत्कटः*

प्रत्येकं पदमग्रिमं भवतु मे स्वात्मोन्नतेरध्वनि
द्रागालस्यमपास्य कृत्यमखिलं संपादयेयं मुदा ।
अन्येषामपि कार्यभारवहने साह्यं विदध्यामहं
निःसङ्कश्च निरामयश्च भगवँस्तिष्ठेयमानन्दितः ॥

सम्राडस्मि विराडहं प्रभुरहं राजाधिराजोऽस्म्यहं
सर्वेषामुपरि स्थितोऽहमधिपः सर्वेश्वरः सर्वदा ।
का चिन्ता मम तस्य जातु हृदये किं वा भयं संभवेद्
इत्याश्वास-परायणस्य नियतं सिध्यन्ति सर्वाः क्रियाः ॥

दिष्ट्याऽहं पुनरेकमद्य दिवसं पश्यामि जीवन्नहो
उद्यन्तं च सहस्ररश्मिममलं भूयोऽभिनन्दाम्यहम् ।
आत्मोद्धारकृते मया भगवतः प्राप्तोऽवकाशः पुनः
कोऽन्यो धन्यतरो मदस्ति धरणौ सोऽहं नमस्यामि तम् ॥

---

*शास्त्री, एम. ए., एम. ओ. एल्., पी-एच. डी., प्रौफेसर एवं विभागाध्यक्षः, प्राचीनेतिहास-संस्कृतिविभागः, पञ्जाव-विश्वविद्यालयः, चण्डीगढ़ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं०२२२

भारतीय-साहित्य-शास्त्रे रसाभासः

श्रीनिवासः*

भारतीये साहित्य-शास्त्रे नैकानि प्रस्थानानि सन्ति। केचिद् आचार्या अलङ्कारम् अपरे रीतिं गुणान् एव वा काव्यस्य स्वरूपाऽऽधायकं तत्त्वं स्वीचक्रुः। केचन ध्वनिं परे च रसम् एव आहुः काव्यस्याऽऽत्मानम्। इत्थम् एव वक्रोक्तिवाद-औचित्यवाद-प्रभृतयो नैके वादा अत्र गोचरीक्रियन्ते। परं रस-वादिन एवाऽत्र काव्य-संसदि मौलिभूता इत्य् अभियुक्तानां मतम्। काव्य-तत्त्व-विद्भिः सहृदयैर् आस्वादनीयो ऽयं रस आस्वादरूप एव। न च रसाऽऽस्वादे (प्रेममार्गे) समराङ्गणे वौचित्याऽनौचित्य-विचार इति पाश्चात्य-नीति-विदां डिण्डिमः। भारतीया मनीषिणस् तु समराङ्गणेऽपि नयान् रक्षन्ति स्म, प्रेमाध्वन्य् अपि मर्यादाम् अपालयन्। ते मनोविनोदनायैव काव्यम्, सौन्दर्य-प्रदर्शनायैव कला, आस्वादनायैव रसः, हृदयाह्लादनायैव सङ्गीतकम्, नेत्र-निर्वाणायैव च सौन्दर्यम् इति न मेनिरे, अपि तु इमाः सकलाः कलाः प्रीतिं सम्पादयन्त्योऽपि चतुर्वर्ग-फलावाप्तये कल्पन्ते इति स्वीचक्रुः। अत्र सन्ति शतशः पुराणेतिहासादयो ग्रन्थाः प्रमाणम्। प्रचलितेषु काव्यात्म-विषयक-वादेषु 'काव्यस्याऽऽत्मा रसः' इति वादं स्वीकुर्वाणा रसवादिन आलङ्कारिकास् तत्र तत्र रसस्य मीमांसां कुर्वन्तस् तस्य रस-रसाभास-भाव-भावाभासादीन् भेदान् दर्शितवन्तस् तेषां विवेचनं च कृतवन्तः। ततश् च रसं निरूपयन्तस् ते रसाभासस्याऽपि विवेचनं व्यदधुः।

अथ कोऽयं रसाभासः? कथं चाऽयं रसाद् विभिद्यते? इति विचारणायां नाना-विधानि रसाभासस्य लक्षणानि दृष्टिम् आवर्जयन्ति। तथा ह्य् अभिनवगुप्ताचार्याः प्रतिपादयन्ति—'यदा तु विभावाभासाद् रत्याभासोदयस् तदा विभावानुभासाच् चर्वणाभास इति रसाभासस्य विषयः'[1]।

*शास्त्री, एम. ए. पी-एच. डी; प्राध्यापकः, संस्कृत-विभागे; कुरुक्षेत्र-विश्वविद्यालयः, कुरुक्षेत्रम्।

१. ध्वन्यालोकलोचनम् (तारावतीव्याख्यासहितम्, १९६३), पृ० ३७५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र च 'विभावाभासाद्' इत्य् उपलक्षणम्। तथा च विभावाभासाद्, अनुभावाभासाद्, व्यभिचार्याभासाच् च यदा स्थायिभावाभासादयस् तदा तस्य चर्वणा रसाभास इत्य् उच्यते। व्याख्यातं चैतत् शृङ्गारम् उदाहरता अभिनवगुप्तेनैव—'विभावाभासाद्, अनुभावाभासाद् व्यभिचार्याभासाद् रत्याभासे प्रतीते चर्वणाभाससारः शृङ्गाराभासः' इति।[1] एतादृशेषु च सन्दर्भेषु स्थायिभावो न केवलम् आभासताम् आपद्यते अपि तु व्यभिचारि-भाव एव सम्पद्यते, स च सामाजिकानां हृदये स्थायिरूपेण भासते। अतः स स्थायिन आभास एव न तु स्थायी।[2] यथा रावणस्य सीतां प्रत्य् अनुराग-वर्णने रत्याभास एव।

अत्रेयं शङ्कोदेति—यदि शृङ्गारस्याऽऽभास एव शृङ्गाराभासस् तर्हि हास्य एव स भवेद् इति। उक्तं हि भरतेन—'शृङ्गारानुकृतिर् या तु स हास्यः' इति।[3] शङ्केयं लोचने विस्तरेण समाहिता।[4] तत्रत्यस्य च सन्दर्भस्याऽयम् अभिप्राय—तादृशेषु सन्दर्भेषु काव्यम् अनुसन्दधानाः सहृदयाः सद्य एव शृङ्गाराभासम् आस्वादयन्ति, परतश् च हास्यस्याऽवसरः। तथा हि—

दूराकर्षणमोहमन्त्र इव मे तन्नाम्नि याते श्रुतिम्।
चेतः कालकलामपि प्रकुरुते नावस्थितिं तां विना॥ इति।

अस्मिन् पद्ये रावणस्य सीतां प्रति रतिर् वर्णिता। किन्तु नाऽत्र रतिर् अपि तु रत्याभास एव। यतो रावणस्य हृदि नेयं प्रतिपत्तिर् यत् सीता माम् उपेक्षते द्वेष्टि वा। जातायाम् अस्यां प्रतिपत्तौ सीतां प्रति न स्यात् तस्याऽऽभिलाषः। न च रावणस्य मनस्य् अयम् अपि निश्चयो यत् सीता मयि अनुरक्ता। स तु काम-कृताद् मोहाद् एव सीतां प्रति रागं प्रकटयति। अतो रावणस्य हृदि विद्यमानेयं रतिर् मोहादि-दोष-जन्यैव। तेन चाकचिक्यादि-समुद्भवः शुक्तौ रजताभास इवाऽयं रत्याभास एव न तु रसः। शृङ्गारानुकृति-शब्दं प्रयुञ्जानस्य भरतमुनेर् अप्य् एतद् एवाऽभिमतम्। अनुकृति-शब्दस्य ह्य् अमुख्यता, आभास

१. अभिनवभारती (बड़ोदा, १९५६), पृ० २९५।
२. तत्रैव, पृ० २९५।
३. नाट्यशास्त्रम् (बड़ोदा १९५६), अ० ६,४०।
४. ध्वन्यालोकलोचनम्, पृ० ३७५-३७७।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्येवाऽर्थः। एवं चाऽत्र रत्याभास एव सामाजिकैर् आस्वाद्यते, तथा च शृङ्गाराभास एवाऽत्र फलति। सर्वत्र चैकतरनिष्ठायां रतौ शृङ्गाराभास एव। यत् तु मुनिना शृङ्गाराऽनुकृतेर् हास्यत्वं प्रतिपादितम्, तस्य त्व् अयम् अभिप्रायो यत् एतादृशाद् रत्याभास-वर्णनाद् उत्तरकाले हास्य-रसो निष्पद्यते। अस्य काव्यस्याऽनुसन्धान-काले तु शृङ्गाराऽऽभासस्यैवाऽऽस्वादः, न तत्र हास्य-रसस्य चर्वणाऽवसरः। इत्थम् एव चोत्साहाऽऽभासादीनां चर्वणेऽपि वीराऽऽभासादयो जायन्त इति सुवचम्। तत्राऽपि चौत्तरकालिकं समानम् एव हास्य-रसत्वम् इत्यवधेयम्।[1]

आचार्याभिनवगुप्ताद् अर्वाचीना अपि काव्य-लक्षण-कारा विविध-रूपेण रसाभासस्य विवेचनं कृतवन्तः। तथा च 'तदाभासा अनौचित्यप्रवर्तिताः' इति वाग्देवतावतारो मम्मटः।[2] 'निरिन्द्रियेषु तिर्यगादिषु चाऽरोपाद् रसाभास-भावाभासौ, अनौचित्याच् च' इति हेमचन्द्रसूरयः।[3] 'अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः' इति विश्वनाथः।[4] 'अनुचित-विभावालम्बनत्वं रसाभासत्वम्' इति च पण्डितराजो जगन्नाथः।[5] एषु च सर्वेषु लक्षणेष्व् अनौचित्यम् एव रसाऽऽभासस्य प्रयोजकं स्वीकृतम्। रसानाम् अनौचित्य-प्रवर्तनस्य चाऽयम् अभिप्रायो यद् भरतादिभिः प्राचीनैर् आचार्यैः शृङ्गारादि-रसस्याऽभिव्यक्त्यर्थं निरूपिताया निखिलायाः सामग्र्याः संग्रहो न भवेद्, लोकधारणया शास्त्र-वचनेन वा विभावादीनां विरोधो वा भवेत् तदा स्थायिभावोद्बोधे तस्य चाऽऽस्वादनीयत्वेऽपि रसाभासो जायते। तथा हि— शृङ्गार-विषये यद् उक्तम् अभियुक्तैः—उत्तमप्रकृतिप्रायः शृङ्गारो रसः, तस्य चालम्बनं परोढाम् अननुरागिणीं च वेश्यां वर्जयित्वा अन्या नायिका भवन्ति इति।[6] या च दृश्यते लोक-सरणिर् गुरु-जनानां स्वपत्नी-विषयकोऽपि रागो न वर्णनम् अर्हतीति। या चाऽस्ति शास्त्र-मर्यादा न काचिद् एका बहुभिर् विवोढुं शक्येति। यदि कश्चिद् रसवर्णने तादृशानाम् औचित्यानां

१. अभिनवभारती, पृ० २९६।

२. काव्यप्रकाशः, ४,३६।

३. काव्यानुशासनम्, २.५४–५५।

४. साहित्यदर्पणः (चौखम्भा० १९५५), ३,२६२।

५. रसगङ्गाधरः (चौखम्भा० १९५५), पृ० ३३५।

६. साहित्यदर्पणः, ३,१८३–१८४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भङ्गो जायेत न तत्र विभावादीनां संयोजनेऽपि रस-चर्वणाऽविकला भवति, अपि तु चर्वणाभास-मात्रम् एव। अयं चाऽपूर्णो रसास्वादो रसाभास एव। उक्तं च अभिनवगुप्तेन विकलस्य शृङ्गारस्य शृङ्गाराभासत्वम्—'न ह्ययं पूर्णः शृङ्गारो निर्गुणत्वे निरलङ्कारत्वे च भवति'। उत्तमयुवप्रकृतिर् उज्ज्वलवेषात्मकः इति चाभिधानात्'।[१] ततश् च विभावाद्याभासाद् रत्याद्याभासे प्रतीते चर्वणाभासो रसाभासः; केनचिद् अंशेन विकलो रसो वा रसाभास इत्य् आयातम्। विकलत्वं चाऽऽनौचित्यम् एव। यद्यपि रसाऽऽभासोऽपि रस-दोषवद् अनौचित्याद् एव प्रवर्तते तथाऽपि रस-दोषेभ्यो नितरां भिद्यते। काव्यस्याऽऽत्मभूतं रसम् अपकर्षन्तो हि रसदोषाः काव्यस्याऽपकर्षकाः।[२] ते च रसास्वाद-काल एव विघ्नत्वेनोपतिष्ठन्ते। रसस्य विश्रान्त-प्रतीतिं च विघ्नन्ति। यत्र रसदोषा न तत्र रसास्वादः सम्यक् पर्यवस्यतीति यावत्। परं रसाभास-प्रसङ्गेषु तु लोकोत्तर-वर्णनायां तन्मयीभूताः सहृदयाः पूर्वं रसम् आस्वादयन्ति तदनन्तरं च रसोद्भावकानां विभावादीनाम् अनौचित्यम् आकलयन्ति।[३] तत्र च रसाऽऽभिव्यक्तौ न कश्चिद् अन्तरायो जायते। अत एव रसाभासोऽपि रसादिध्वनि-मध्ये गण्यते, तद्-युतं च काव्यम् उत्तम-काव्येषु। रसदोष-दुष्टेषु तु यदि नाम काव्यत्वं स्वीक्रियेत कीटानुविद्धरत्नेषु रत्नवद् एव तत् स्यात्। अतो न रसाभासो रसदोषेष्व् अन्तर्भवतीति।

अयं च रसाभासो रस एव, तद्-भिन्नो वा? इत्य् अपि विचारणीयम्। अत्र केचिद् 'यथा तर्कशास्त्रे हेत्वाभासो न हेतुत्वं भजते, न हि तेनाऽभिलषितार्थ-सिद्धिर् जायते तथैव रसाभासोऽपि न रसः, न रसवद् आस्वादनीय' इति कथयन्तो रस-भिन्नम् एव रसाभासं स्वीकुर्वन्ति। परे तु 'यथा केनचिद् दोष-लवेनाऽप्य् अश्वो न अनश्वो भवति, अश्वाभासश् चोच्यते तथैव येन केनचिद् अनौचित्येन रसाभासोऽपि न रसत्वं जहाति केवलं रसाभास-पदभाग् भवति। एवं चाऽऽस्वादनीयत्वेन रसाभासस्याऽपि रसत्वम् एवे'ति प्रतिपादयन्ति। उक्तं च विश्वनाथ-कविराजेन—'रस्यते इति रसः

१. ध्वन्यालोकलोचनम्, पृ० ४२३।

२. साहित्यदर्पणः, १,३।

३. वामनझलकीकरः, काव्यप्रकाशे बालबोधिनी (१९५०), पृ० १२२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति व्युत्पत्ति-योगाद् भाव-तदाभासादयोऽपि गृह्यन्ते' इति ।[१]

वस्तुतस् तु रस-ध्वनेर् विभेदवान् एव रसाभास-ध्वनिर् इति मन्तव्यम्, इदं तु रसाभासस्य पारिभाषिकं रसत्वं काव्य-लक्षणार्थंत्र स्वीकृतम् । रसाभास-ध्वनिर् हि रस-ध्वनेर् निष्यन्दमात्र एव, सर्वाङ्गसमन्वितस्य चर्वणा-प्रवाहस्य विकल-प्रवाह एवेति यावत । तथा चोक्तम् अभिनवगुप्तपादेन— एवं रसध्वनेर् अमी भाव-ध्वनि-प्रभृतयो निष्यन्दा आस्वादे प्रधानं प्रयोजकम् एवम् अंशं विभज्य पृथग् व्यवस्थाप्यन्ते' ।[२] एतच् च तेनैव व्याख्यातम् । तत्राऽयम् अभिसन्धिः—यदा हि बहूनां सुगन्धित-द्रव्याणां मेलनेनैकं गन्ध-द्रव्यं निष्पाद्यते तस्य तु सौरभम् एक-रसं जायते । परं भवति तत्र कस्यचिद् एकस्य द्रव्यस्य व्यतिरेकः । ये गन्ध-युक्तिज्ञास् तस्याऽऽमोदम् अनुभवन्ति ते स्फुटम् एवाऽवगच्छन्ति यद् अयं कर्पूरादि-प्रयुक्तो गन्धो विद्यत इति । एवम् एव रसाभासादि-ध्वनि-विषयेऽपि रसज्ञा रत्याभासादि-समुद्भवेयं चर्वणेत्य् अनुभवन्ति । यत्र तु विभावानुभाव-व्यभिचारि-संयोजनादितो भवति रत्यादि-स्थायि-भावस्य चर्वणा तत्राऽऽस्वाद-प्रकर्षो जायते, स एव च रस-ध्वनिः । एवं च रसाऽऽस्वादात् किञ्चिन् न्यून एव रसाभासस्याऽऽस्वाद इति सूच्यते ।

अयं च रसाभासः कीदृशेषु सन्दर्भेषु चर्व्यते इत्य् अपि बहुशश् चर्चितम् आचार्यैः । पिण्डितार्थस् तु साहित्यदर्पणे निरूपितः । तद् यथा —

उपनायकसंस्थायां मुनि-गुरुपत्नीगतायां च ।
बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम् ॥

प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्यगादिगते ।
शृङ्गारेऽनौचित्यं रौद्रे गुर्वादिगतकोपे ॥

शान्ते च हीननिष्ठे गुर्वाद्यालम्बने हास्ये ।
ब्रह्मवधाद्युत्साहेऽधमपात्रगते तथा वीरे ॥

उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र ।[३] इति ।

अत्र चेदं विचारणीयम्—परोढां वर्जयित्वा नायिकाः शृङ्गारस्याऽऽ-

---

१. साहित्यदर्पणः १,१ ।

२. ध्वन्यालोकलोचनम्, पृ० ३७७ ।

३. साहित्यदर्पणः, ३,२६३–२६५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लम्बनम् इति निर्धारिते, तद्-विषयकम् अनौचित्यं दर्शयता 'उपनायकसंस्थायाम्, मुनिगुरुपत्नीगतायां च' इति यद् उच्यते तत् तु न युक्ति-युक्तम्। तथा हि—परिणीताया नायिकाया उपनायक-विषयायां रतौ सत्यां शृङ्गाराऽनौचित्यम् इति 'उपनायक-संस्थायाम्' पदस्यैतस्य तात्पर्यम्। कृत-दार-परिग्रहस्य, अकृत-दार-परिग्रहणस्य वा नायकस्य मुनि-गुरु-पत्नी-गतायां रतौ सत्यां शृङ्गारेऽनौचित्यम् इति च 'मुनिगुरुपत्नीगतायाम्' पदस्याऽस्य तात्पर्यम्। अनयोश् चाऽनुचित-विभावालम्बनायां रतौ संग्रह इति पण्डितराज-जगन्नाथः[1]। अत्र मुनि-गुरु-पदे उपलक्षण-परे। तथा च 'अत्र मुनिगुरु-शब्दयोर् उपलक्षणतया राजादेर् अपि ग्रहणम्' इत्य् अपि रसगङ्गाधरे स्थितम्[2]। 'राजादेः' इत्यत्र 'आदिपदेनाऽगम्य-पत्नीकानां शिष्यादीनां परिग्रहो बोध्यः' इति टीकाकृतः।[3] एतादृशस्य व्याख्यानस्य यदीदं तात्पर्यं गृह्यते यत् परोढायां नायकस्य रति-वर्णनम् अनौचित्य-परं तच् च शृङ्गाराभासे विश्राम्यतीति तदा स्फुटम् एव कथं नोच्यते। कथं च मुनि-गुरु-पत्नी-गतायाम् इत्य् उक्त्वा प्रकटितम् आत्मनोऽपि व्याख्यानस्याऽनौचित्यम्। एवम् उक्ते हि 'मुनि-गुरु-पत्नीगतायाम् एव परोढायां रति-वर्णनम् अनुचितं नाऽन्यत्र' इति नियमः प्रसज्येत। किञ्च, 'परोढायां रतौ' इति वक्तव्ये को नाम प्रेक्षावान् 'मुनि-गुरु-पत्नी-गतायाम्' इति ब्रूयात्।

यत् तु 'मुनि-गुरु-पत्नी-गतायाम्' इत्य् अस्य पदस्येदं तात्पर्यम्—'गुरु-पितृ-मुनि-सुराणां ज्यायः सहजादीनाञ् च स्व-स्व-पत्नीविषयाऽपि रतिर् नैव वर्णनीया, हीनत्वव्यञ्जकतया वैरस्योल्लासे रसोच्छेदस्य वारयितुम् अशक्यत्वात्'[4] इति। तद् अपि चिन्त्यम् एव। अत्र हि रसाभासस्य प्रसङ्गः, न च रसाभासो रस-दोषवद् हेयत्वेन निर्दिष्टो लक्षण-कृद्भिः, अपि तूत्तम-काव्य-प्रयोजकः स स्वीकृतः। न च रसाभासो वैरस्याय रस-दोषवद् रस-भङ्गाय वा कल्पते इत्य् उक्तम् एव। एतेषां दोषाणां परिहाराय यद्य् अयम् अर्थोऽत्र स्वीक्रियेत यद् मुनि-प्रभृतीनां स्व-पत्नी-विषयक-रति-वर्णनं रसाभासे विश्राम्यति, न तु रसे, तर्हि कथं पार्वती-परमेश्वरयो रति-वर्णनं दोषत्वेन गणितम्? नाऽत्र किम् अपि

---

१. रसगङ्गाधरः, पृ० ३३६।

२. तत्रैव, पृ० ३४१।

३. रसगङ्गाधरः (चन्द्रिकाव्याख्या), पृ० ३४१।

४. साहित्यदर्पणः, (लक्ष्मीव्याख्या) पृ० २३१।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विनिगमकं पश्यामः। तथा हि प्रकृति-विपर्ययाख्य-रस-दोष-प्रसङ्गेन विश्वनाथेनोक्तम्—'यथा वा कुमारसम्भवे उत्तमदेवतयोः पार्वती-परमेश्वरयोः सम्भोग-श्रृङ्गार-वर्णनम्। इदं पित्रोः सम्भोग-वर्णनम् इवाऽत्यन्तम् अनुचितम् इत्य् आहुः'।[१] किञ्च कथम् अत्र प्रकृति-विपर्यय इति न विद्मः। उत्तम-प्रकृति-प्रायो हि श्रृङ्गार इत्य् उक्तम्। उत्तम-देवता अपि चोत्तम-प्रकृतय एव। पित्रोः सम्भोग-वर्णनम् इव लोकव्यवहारम् इदं विरुणद्धि चेत्। तथा रसाभासेषु स्याद् अस्याऽन्तर्भावो न तु रस-दोषेषु। किं वाऽत्र विनिगमकम्?

अस्ति च 'अधमपात्रतिर्यगादिगते' इत्य् एतद्-पद-विषयेऽपि वाच्यं किञ्चित्। रतिः खलु प्राणिमात्रगतो भावः। स च न केवलं राज-प्रभृतिषु सम्भ्रान्त-जनेषु समुल्लसत्य् अपितु हालिक-प्रभृतिषु लोकसामान्येष्व् अपि पशुषु पक्षिषु चाऽपि यावत्-प्राणि-जातम्। एतादृशीं लोक-सरणिं वस्तु-स्थितिं च विदन्तः कवयोऽपि लोक-सामान्यानां पशु-पक्षिणां च रतिं बहुलं वर्णयन्ति। सहृदया अपि च तत्र रसम् आस्वादयन्ति। तथा हि—

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः।
श्रृङ्गेण संस्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः॥[२]

इत्य् अत्र कविः तिरश्चोः सम्भोगम् अवर्णयत। मेघदूते कालिदासः सरितो विप्रलम्भम् अप्य् अवर्णयत्[३]। अन्यैश् चाऽपि कविभिर् बहुशो वर्णितं तिरश्चाम् अधम-मानुष-पात्राणां च श्रृङ्गारादिकम्। तथा चोदाहृतं लक्षणकारैर् भिल्ल-दम्पत्योः[४] कृषक-दम्पत्योश् च रति-वर्णनं श्रृङ्गाराभासत्वेन।

एवं च किम् अत्राऽनौचित्यं दृष्टम् अभियुक्तैः? कथं चैष नियमो विहितः 'उत्तमप्रकृतिप्रायः श्रृङ्गारः' इति? किम् अभिजात-वर्गस्य काव्येषु रङ्ग-मञ्चेषु वा गौरवम् एवाऽभिरक्षितुम् अयं संरम्भः? काव्य-जगति तु यत्र सकल-सहृदयाः समम् एव रसास्वादस्याऽधिकारिणस् तत्र नेदृशो नियमो विधातव्यः। रसाऽऽस्वाद-विषये हि सहृदया एव परं प्रमाणम्। आस्वाद्यते च सहृदयैर् अधम-पात्रगतः पशुपक्षिगतश् चाऽपि रतिभावः

---

१. साहित्यदर्पणः, पृ० ५४१।
२. कुमारसम्भवम्, ३ ३६।
३. पूर्वमेघः, ३९।
४. साहित्यदर्पणः, पृ० ३३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथैव यथा राजादि-गतो रतिभावः। दृश्यते हि बहुलं पशु-पक्षिणां प्रेमाख्यानेषु, कथासु, उपन्यासेषु चाऽधम-पात्र-रति-निबन्धनेषु सहृदयानां हृदय-संवादो रसाऽऽस्वादश् च।

अन्येषां रसानाम् अप्य् आभासत्वे किञ्चिद् विचारणीयम्। तथा हि—वीर-रसस्याऽऽभासत्व-विषय उक्तम्—'अधमपात्रगते तथा वीरे'।[१] अधम-पात्रेपूत्साहस्य वर्णनं रसाभासत्व-जनकम् इति हि तस्याऽभिप्रायः। एतद् अत्र वक्तव्यम्—किम् अधम-पात्रेषु कदाचिद् अप्य् उत्साहो न जायते, अथवा न ते उत्साहस्य भाजनम्? किम् इतिहासे लोके वाऽधमत्वेनाऽभिमता जना न वीर्यं शौर्यं वा प्रदर्शितवन्तः? न दृश्यन्ते किमु पुरावृत्तेष्व् अपि वीराङ्गनानां, विगत एव वा स्वातन्त्र्य-संग्रामे नीचत्वेन तिरस्कृतानाम् अपि जनानाम् आश्चर्य-कराणि वीर-कर्माणि? यदि तु तेषां हृदये सम्भवत्य् उत्साहस्योदयस् तत् कथं तद्-वर्णनस्याऽनौचित्यं भण्यते? इत्थम् एव तद् अपि समालोच्यम् इवाऽभाति यत् खलु भयानक-विषयम् अनौचित्यं प्रतिपादितम्—'उत्तमपात्रगतत्वे भयानके' इति[२], स्वीकृतं च 'स्त्रीनीच-विषयम् एव हि भयं रसप्रकृतिः' इति।[३] उत्तम-प्रकृतिषु नैव स्याद् भयस्याऽऽवकाशश् चेत् तदैवाऽयं नियमो भवेत्। दृश्यते तूत्तम-प्रकृतिष्व् अपि भयस्य प्रसरः।

एतद् अभिहितं भवति यत् सत्यम् आचार्याणां रस-विषये औचित्याऽनौचित्य-विचारो भारतीय-परम्पराम् अनुसरति, साहित्येऽपि चाऽऽदर्शवाद-प्रवृत्तिं प्रकटयति। स चाऽवश्यं वाञ्छनीयः। परं यद् अत्र विषये किञ्चिद् रूढि-ग्रस्तम् इव सञ्जातं यच् च सम्प्रति न कवीनां न समीक्षकाणां न च सहृदयानाम् एव हृदयाऽनुकूलं, यच् च किञ्चिद् अत्राऽसामञ्जस्यम् इव प्रतिभाति, तस्य सर्वस्याऽपि परिष्कारोऽपेक्ष्यते। किञ्च रत्यादयो भावा प्राणिमात्र-गताः। यथोक्तम् अभिनवगुप्तेन—'न ह्येतच् चित्त-वृत्ति-वासना-शून्यः प्राणी भवति, केवलं कस्यचित् काचिद् अधिका चित्तवृत्तिः काचिद् ऊना'।[४]

(शिष्टं पृ. १२१ द्र.)

१. तत्रैव, ३,२६५।

२. तत्रैव, ३.२६६।

३. तत्रैव, पृ० २३४।

४, अभिनवभारती (बड़ोदा, १९५६), पृ० २८२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छन्दः-शास्त्रस्य गणितीयाः सिद्धान्ताः

शक्तिधरशर्मा*

(गताऽङ्काद् अग्रे)

मात्रिक-छन्दांसि—मात्रिक-छन्दःसु चातुर्मात्रिक एव संकेतः स्वीकृत आचार्यैः। अत्र साधारण्य-दृष्ट्या 'न'-मात्रिक-संकेत-स्वीकारे कति भेदा गणित-दृष्ट्या सम्भवन्तीति पूर्वं विमृश्यते—

यदि कस्मिंश्चन संकेत-विशेषे गुरु-संख्या=ग, लघु-संख्या=ल, तदा—

$$२ग+ल=न \cdots \cdots \cdots \cdots \quad (४)$$

$$\because ग= \frac{—ल+न}{२}$$

अत्र कुट्टनार्थं वल्ली $\left\{ \begin{matrix} ० & ० \\ न & न \end{matrix} \right.$

यद्यप्य् अत्र वल्ली विषमा, परं भाज्यम् ऋणम् अतो वल्ली-संकोच-विधिना लब्धे गुणाप्ती एव वास्तविके गुणाप्ती स्तः। तथा हि—तत्र मम सूत्रम्:—

धनर्ण-वल्ल्योर्विषमाः समास्ताः स्युर्लब्धयश्चेद् गणकैस्तदानीम्।
पूर्वागतौ लब्धिगुणौ विशोध्यौ स्वतक्षणाच्छेषमितौ तु तौ स्तः[1]॥

धनर्ण-वल्ल्योर् लब्धयः क्रमशः समाः विषमाश्च चेत् तदा शोधनं नापेक्षितम् इति भावः।

---

*शास्त्री, ज्योतिषाचार्यः, एम्. एस्. सी, (फिज़िक्स); 1310 Kentucky Lawrence 66044 (Kansas), U.S.A।

---

१. श्रीभास्कराचार्या ऋण-वल्लीम् आक्षिप्तवन्तः, परम् एतत्-सूत्रानुसारम् ऋण-वल्ल्य् अपि व्यवस्थिता जायत इति बोध्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'इष्टाहत-स्व-स्वहरेण युक्ते…' इति श्रीभास्करीय-सूत्रानुसारम् 'इ' इष्टं मत्वा—

ग= –इ (क)… …

ल= +२इ+न (ख)… … (५)

अधुनाऽत्राऽनिर्णीतानि मौल्यानि निर्णायन-विधया निर्णीयन्ते। एष विधिर् मया भृशं विमृष्टः, प्रकाशयिष्यते। प्रस्तुते ग-मानेन सदैव धनाऽऽत्मकेन भाव्यम्, अतः 'इ'-मानं सदैव ऋणात्मकम् एव मान्यम्। किञ्च 'ल'-मानेनाऽपि धनात्मकेन भाव्यम्। अतः—

२इ+न ⩾ ० {∵ ल ⩾ ०}

∵ इ ⩾ —न/२ … … … (६)

अत्र द्वे स्थिती अवधातव्ये स्तः—

(१) न=समोऽङ्कः

(२) न=विषमोऽङ्कः

यदि न=समोऽङ्कः

इ= —१,—२,—३, …, —न/२, एतान्य् एव 'इ'-मानानि मान्यानि स्युः। अर्थात्—

ग=१,२,३,… न/२, इत्य् एतानि 'न'-मानानि स्युः।

यदि न=विषमोऽङ्कः

ग=१,२,३, … $\frac{\text{न}-१}{२}$ इत्य् एतानि 'ग'–मानानि भवितुम् अर्हन्ति। यद्यपि कुट्टनम् अन्तराऽपीमे परिणामाः साधयितुं शक्यन्ते, परं पाठकाः प्लुतस्य (त्रिमात्रिकस्याऽपि) संकेते स्वीकृते समस्याः समाधातुं क्षमेरन्, अत एवाऽयम् अत्र निर्णायन-विधिं निर्देष्टुं प्रयासः।

अधुना विशिष्ट-'थ'-संख्याक-गुरु-युतस्य संकेतस्य सर्वेऽपि संचय-सम्भविनो भेदाः साध्यन्ते—

अत्र संकेते 'थ'-गुरवः 'न—२थ' संख्याका लघवश् च सन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यतो हि गुरुर् द्विमात्रिकः, लघुर् एक-मात्रिको भवति, सम्पूर्ण-मात्रा संख्या च 'न'-तुल्या स्वीकृता विद्यते। एवं चाऽत्र सम्पूर्ण-स्थान-संख्या =न—२थ+थ=न—थ।

अधुना 'न–थ' स्थानेपु 'थ'-संख्याका गुरवः 'न–थ'-संख्याका लघवश् च संचेयाः सन्ति।

अतोऽस्य संकेतस्य संचय-भेदाः —

$$= {}^{न\text{-}थ}स_{थ} \quad \left(यत्र\ {}^{क}स_{र} = \frac{\lfloor क}{\lfloor क\text{-}र \lfloor र} \right)$$

यतो हि 'थ'=गुरु-संख्या। गुरूणां संख्या तु ०,१,२, … $\frac{न-१}{२}$ (विषमे 'न'-माने) अथवा $\frac{न}{२}$ (समे 'न'-माने) पर्यन्तं भवितुम् अर्हति। अतो 'न'-मात्रिक-संकेते सम्पूर्णा सम्भवि-भेद-संख्या उपरि-साधित-संचय-भेदानां मानेपु 'थ'=०,१,२, … न/२, वा न-१/२ उत्थाप्य योगे कृते लभ्येत इति स्पष्टम् एव। एवं च—

'न'–मात्रिक-संकेते सम्पूर्णा सम्भवि-भेद-संख्या—

$$= \Sigma\, {}^{न\text{-}थ}स_{थ} \cdots \cdots (७)$$

$$थ = ०,१,२,\cdots\cdots न/२ \text{ (यदि न=समोऽङ्कः)}$$

$$\frac{न-१}{२} \text{ (यदि न=विशमोऽङ्कः)}$$

निर्दिष्ट-सूत्रानुसारं विभिन्न-मात्रिक-संकेत-स्वीकारे सम्भवि-भेद-संख्यानां कोष्ठकम्—

मात्रा-संख्या	१	२	३	४	५	६	७	८	९
भेदाः	१	२	३	५	८	१३	२१	३४	५५

आचार्यैश् चातुर्मात्रिक-संकेतः स्वीकृतो यत्र पञ्च भेदा लभ्यन्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्च-मात्रिक-संकेते अष्टौ गणा लभ्यन्ते । अतो न लाघवम् । किञ्च चातुर्मात्रिक-संकेत-स्वीकारे मनुष्यस्य जिह्वेन्द्रिय-प्रकृति-सम्बद्धम् अपि कारणम् अस्ति इति मन्ये । एष त्व् अन्वेषणस्य विषयः ।

छन्दः-शास्त्रस्याऽऽचार्यैः संख्या-प्रत्यय-साहाय्येन सम्पूर्णाः सम्भविनो भेदाः साधिताः । परं मात्रिकच्छन्दसां भेद-साधनार्थं न केऽपि प्रायस्यन् । अत्र संचय-क्रम-संचय-गणित-साहाय्येन आर्या-भेद-साधनार्थं सूत्रोपपादनं दर्श्यते । आर्या-लक्षणं चैतद् अस्ति :—

लक्ष्मैतत् सप्त गणा गोपेता भवति नेह विषमे जः ।
षष्ठोऽयं न लघू वा प्रथमेऽर्धे नियतमार्यायाः ॥

षष्ठे द्वितीयलात्परके न्ले मुखलाच्च सयति-पद-नियमः ।
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥

अत्र पूर्वार्धे सप्त चातुर्मात्रिका गणा गुरूपेता भवन्ति । एषु विषमो जगणो न भवितुम् अर्हति । षष्ठो जगणो 'न-लघु' गणो वा भवतीति नियमः । एतं नियमम् अनुसृत्य प्रथमं पूर्वार्ध-भेदा एव साध्यन्ते ।

यदि चातुर्मात्रिक-संकेते जगण-वर्जम् अन्ये गणाः प्रथम-द्वितीय-तृतीय-चतुर्थ-शब्दैर् व्यवह्रियेरन्, तदा तु कल्प्यते—

कस्मिंश्चन आर्या-भेदे—

प्रथमो गणः '$र_१$' वारं लभ्यते ।
द्वितीयो ,, '$र_२$' ,, ,, ।
तृतीयो ,, '$र_३$' ,, ,, ।
चतुर्थो ,, '$र_४$' ,, ,, ।

षष्ठो गणो जगणः, नलध्वात्मको वा भवति । अतो यदि गण-स्थितयः स्थान-शब्देन प्रतिपाद्येरन्, तदा एतद् वक्तुं शक्यते यत् षष्ठं स्थानं द्विधा पूरयितुं शक्यम् । अनयोर् उभयोर् विधयोः प्रत्येकं कृते जगण-वर्जम् अन्येषां चतुर्णां गणानां कृते ६ स्थानानि सन्ति । अतः

$$र_१ + र_२ + र_३ + र_४ = ६ \cdots \cdots (८)$$

यत्र— $र_१, र_२, र_३, र_४ = ०, १, २, ३, ४, ५, ६$ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(८) समीकरणस्य कति समाधानानि सन्ति ? इति तु भास्करीयया नियताङ्क-योग-सम्बन्धिन्या अङ्क-पाश-पद्धत्या सुसाधम् । परम् अत्रेदम् अवधेयम् यत् $र_{१}$, $र_{२}$, $र_{३}$, $र_{४}$ मानानि शून्य-तुल्यान्य् अपि भवितुम् अर्हन्ति ।

प्रथमो गणः $र_{१}$ स्थानेषु ${}^{६}स_{र_{१}}$ विधाभिः स्थापयितुं शक्यते । आसु विधासु कयाचनाऽपि विधया प्रथमे गणे स्थापिते द्वितीयस्मै गणाय केवलं $६-र_{१}$ स्थानान्य् अवशिष्यन्ते । एवं च प्रथम-गणस्थ ${}^{६}स_{र_{१}}$ विधासु प्रत्येकं विधायै द्वितीयेन गणेन ${}^{६-र_{१}}स_{र_{२}}$ विधाभिः स्थान-पूर्तिः सम्भवति । अतो गण-द्वय-दृष्ट्या ${}^{६}स_{र_{१}} \times {}^{६-र_{१}}स_{२}$ भेदा भवन्ति । साधारणी-करण-पद्धत्या एतद् वक्तुं शक्यते, यद् गण-चतुष्टय-दृष्ट्या भेद-संख्या

$$= {}^{६}स_{१} \times {}^{६-र_{१}}स_{र_{२}} \times {}^{६-र_{१}-र_{२}}स_{र_{३}} \times {}^{६-र_{१}-र_{२}-र_{३}}स_{र_{४}} \cdots \cdots \quad (९)$$

एते तु ते भेदाः सन्ति ये प्रथमं गणं '$र_{१}$' वारम्, द्वितीयं गणं '$र_{२}$' वारम्, तृतीयं गणं '$र_{३}$' वारम्, चतुर्थं च गणं '$र_{४}$' वारं दधतीति ।

यदि 'र' मानानि चलानि मन्येरन्, तदा तु (८) निरोध (constraint) समाधानान्तर्गतानां सर्वेषां चल-मानानां कृते (९) समीकरण-योगेन सर्वेऽपि भेदा लभ्येरन्—

$$\text{इमे भेदाः} = \Sigma\, {}^{६}स_{र_{१}} \times {}^{६-र_{१}}स_{र_{२}} \times {}^{६-र_{१}-र_{२}}स_{र_{३}} \times {}^{६-र_{१}-र_{२}-र_{३}}स_{र_{४}} \cdots \quad (१०)$$

$$र_{१}, र_{२}, र_{३}, र_{४},$$

$$\text{निरोधः } र_{१}+र_{२}+र_{३}+र_{४}=६$$

$$र_{१}, र_{२}, र_{३}, र_{४}, = ०,१,२,३,४,५,६,$$

एते तु ते भेदाः सन्ति यत्र द्वितीय-चतुर्थयोः स्थानयोर् जगणो नाऽस्ति । अधुना कल्प्यते यद् जगणः षष्ठ-स्थान-वर्जम् एक-वारं लभ्यते । अनेन द्वितीय-चतुर्थ-स्थानयोः पूर्तिर् द्विधा कर्तुं शक्यते । अधुना चतुर्णां जगणातिरिक्त-गणानां कृते केवलं पञ्चैव स्थानान्य् अवशिष्यन्ते ।

अतो निरोधस् तु निम्न-लिखितः स्यात्—

$$र_{१}+र_{२}+र_{३}+र_{४}=५ \cdots \cdots \quad (११)$$

$$र_{१}, र_{२}, र_{३}, र_{४} = ०,१,२,३,४,५,$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एतादृशा भेदाः, येषु षष्ठ-स्थान-वर्जं जगण एक-वारं लभ्यते, निम्न-लिखिताः सन्ति ।

$$\text{२} \times \sum_{\text{र}_1, \text{र}_2, \text{र}_3, \text{र}_4} {}^{\text{५}}\text{स}_{\text{र}_1} \times {}^{\text{५}-\text{र}_1}\text{स}_{\text{र}_2} \times {}^{\text{५}-\text{र}_1-\text{र}_2}\text{स}_{\text{र}_3} \times {}^{\text{५}-\text{र}_1-\text{र}_2-\text{र}_3}\text{स}_{\text{र}_4} \cdots \quad (\text{१२})$$

निरोधः $\text{र}_1 + \text{र}_2 + \text{र}_3 + \text{र}_4 = \text{५}$

$\text{र}_1, \text{र}_2, \text{र}_3, \text{र}_4, = \text{०}, \text{१}, \text{२}, \text{३}, \text{४}, \text{५},$

अधुना कल्प्यते जगणः षष्ठ-स्थान-वर्जं द्विवारं लभ्यते । अस्यां स्थितौ तु निरोध एष भवेत्—

$$\text{र}_1 + \text{र}_2 + \text{र}_3 + \text{र}_4 = \text{४} \cdots \cdots (\text{१३})$$

$\text{र}_1, \text{र}_2, \text{र}_3, \text{र}_4 = \text{०}, \text{१}, \text{२}, \text{३}, \text{४},$

उपरि-विमृष्ट-पद्धत्यनुसारं प्रक्रियायाम् अनुष्ठितायाम्, येषु षष्ठ-स्थान-वर्जं जगणो द्विर् लभ्यते, तेषां भेदानां संख्या—

$$= \sum_{\text{र}_1, \text{र}_2, \text{र}_3, \text{र}_4} {}^{\text{४}}\text{स}_{\text{र}_1} \times {}^{\text{४}-\text{र}_1}\text{स}_{\text{र}_2} \times {}^{\text{४}-\text{र}_1-\text{र}_2}\text{स}_{\text{र}_3} \times {}^{\text{४}-\text{र}_1-\text{र}_2-\text{र}_3}\text{स}_{\text{र}_4} \cdots \quad (\text{१४})$$

निरोधः = $\text{र}_1 + \text{र}_2 + \text{र}_3 + \text{र}_4 = \text{४}$

$\text{र}_1, \text{र}_2, \text{र}_3, \text{र}_4 = \text{०}, \text{१}, \text{२}, \text{३}, \text{४},$

अतो येषु षष्ठो जगणस् ते भेदाः (१०), (१२), (१४) समी-करणानां योग-तुल्याः स्युः । एतावन्त एव भेदाः षष्ठ-स्थाने 'न'-लघ्वात्मके गणे सत्य् उत्पद्येरन् । अतः पूर्वार्ध-भेदा उपर्युक्त-समीकरण-त्रय-योगेन द्वि-गुणेन तुल्याः सिध्यन्ति ।

उत्तरार्धे षष्ठो लघुर् एव भवति । अत उत्तरार्ध-भेदाः पूर्वार्ध-भेद-संख्याया अर्ध-तुल्याः स्युर् इति स्पष्टम् एव । एवं च पूर्वार्धोत्तरार्ध-संचय-वशेन जाता आर्या-भेद-संख्या

$$= \text{२}\{\sum {}^{\text{६}}\text{स}_{\text{र}_1} \times {}^{\text{६}-\text{र}_1}\text{स}_{\text{र}_2} \times {}^{\text{६}-\text{र}_1-\text{र}_2}\text{स}_{\text{र}_3} \times {}^{\text{६}-\text{र}_1\text{र}-_2-\text{र}_3}\text{स}_{\text{र}}$$

निरोधः $\text{र}_1 + \text{र}_2 + \text{र}_3 + \text{र}_4 = \text{६}$ (सर्वे संचयाः)

$\text{र}_1, \text{र}_2, \text{र}_3, \text{र}_4, = \text{०}, \text{१}, \text{२}, \text{३}, \text{४}, \text{५}, \text{६},$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

$$+\text{२}\Sigma\,{}^{\text{५}}\text{स}_{\text{र}_{\text{१}}}\times{}^{\text{५}-\text{र}_{\text{१}}}\text{स}_{\text{र}_{\text{२}}}\times{}^{\text{५}-\text{र}_{\text{१}}-\text{र}_{\text{२}}}\text{स}_{\text{र}_{\text{३}}}\times{}^{\text{५}-\text{र}_{\text{१}}-\text{र}_{\text{२}}-\text{र}_{\text{३}}}\text{स}_{\text{र}_{\text{४}}}$$

निरोधः $\text{र}_{\text{१}}+\text{र}_{\text{२}}+\text{र}_{\text{३}}+\text{र}_{\text{४}}=\text{५}$, (सर्वे संचयाः)

$\text{र}_{\text{१}}, \text{र}_{\text{२}}, \text{र}_{\text{३}}, \text{र}_{\text{४}}=\text{०,१,२,३,४,५}$,

$$+\Sigma\,{}^{\text{४}}\text{स}_{\text{र}_{\text{१}}}\times{}^{\text{४}-\text{र}_{\text{१}}}\text{स}_{\text{र}_{\text{२}}}\times{}^{\text{४}-\text{र}_{\text{१}}-\text{र}_{\text{२}}}\text{स}_{\text{र}_{\text{३}}}\times{}^{\text{४}-\text{र}_{\text{१}}-\text{र}_{\text{२}}-\text{र}_{\text{३}}}\text{स}_{\text{र}_{\text{४}}}\}^{\text{२}}\quad\cdots\quad(\text{१५})$$

निरोधः $\text{र}_{\text{१}}+\text{र}_{\text{२}}+\text{र}_{\text{३}}+\text{र}_{\text{४}}=\text{४}$,

$\text{र}_{\text{१}}, \text{र}_{\text{२}}, \text{र}_{\text{३}}, \text{र}_{\text{४}}=\text{०,१,२,३,४}$,

अस्य मौल्य-साधने पर्याप्तः कालोऽपेक्ष्यते। संयन्त्र-गणक-(Computing-Machine)-साहाय्येन समस्या सुसाधा। अत आर्या-भेद-सूत्रम् उपपाद्याऽप्य् अधुना भेदानाम् अङ्कात्मिका संख्या न दीयते। अस्याः साधनं कृत्वा अग्रिमाऽङ्केषु मौल्यं दास्यते।

अनयैव पद्धत्या पथ्यादि-मात्रिक-च्छन्दसाम् अपि भेदाः साधयितुं शक्यन्ते। किञ्च उपरि-प्रतिपादितेषु भेदेषु कति भेदा ईदृशाः सन्ति, येषु 'न'-लघु-गणस्य द्वितीयस्मिन् लघौ यतिर् भवति? एतादृश्याः समस्या अपि समाहिता जायन्ते।

आचार्यैर् मात्रिक-छन्दसां संख्या-साधनार्थं न प्रयस्तम्। यतो ह्य् एतत्-सम्बन्धि गणितं विस्तृतं दुरूहं चाऽस्ति। अत्र निबन्धे एष इदं-प्रथमो मौलिकः प्रयासो मासकीन एव।

(११४ पृष्ठस्य शेषः)

अतश् च प्राणिमात्रस्यैव समेऽपि भावा यथायोगं काव्ये वर्णनीयाः। प्रकृतेस् तु मानवी-करणे जडगता अपि रत्यादयो वर्णयितव्याः। काव्यं हि विभावादीनां साधारणी-करणस्य द्वारम्। अनेन च सहृदया भवन्ति संवाद-भाजः। सहृदयत्वं च नाम न केवलं कस्यचिद् एव सम्पत्। तत् कथम् अत्रोत्तम-प्रकृतेर् अधम-प्रकृतेर् वा वर्णनीयत्वेन भेदोऽङ्गीकार्यः? कृतेषु तु तथा-विधेषु भेदेषु काव्ये याथार्थ्यं हीयेत, तच् च सहृदयानां न सम्यग् आस्वाद्यं स्यात्। तथा च यथार्थस्याऽऽदर्शस्य च उभयोर् औचित्य-निर्वाह एव श्रेयान्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जागृत जागृत वीरा ! रे !!

शिवसागरः त्रिपाठी*

उत्तिष्ठत जागृत वीरा ! रे !!, जागृत जागृत वीरा ! रे !!

पामरपाकशत्रुणा क्रूरा दृष्टिर्देशे निक्षिप्ता ।
तथा त्रोटिता सीमा-रेखा, भारत-माता त्रस्ता रे !!
जागृत जागृत वीरा ! रे !!

शान्तेर्वार्ता गर्ते पतिता, समरकथाया आवृत्तिः ।
क्रियतेऽरिणा पुनश्चास्माकं हा ! मर्यादा ध्वस्ता रे !!
जागृत जागृत वीरा ! रे !!

रणभेरी नदिता परितो वै, तथा शतघ्न्यः प्रज्वलिताः ।
पुण्याऽस्माकं धरणी माता, यवनापसदैर्ग्रस्ता रे !!
जागृत जागृत वीरा ! रे !!

केन परामृष्टः सुप्तोऽद्य, सर्पचयः कुण्डलितोऽयम् ।
अथवा केन सुषुप्ता सेयं, रणचण्डी जागरिता रे !!
जागृत जागृत वीरा ! रे !!

वयं ह्यकुर्म सदेमं यत्नं, मानवता नष्टा नो स्यात् ।
परं लुण्ठकैः सा नो नीतिः, सम्प्रति हा ! विध्वस्ता रे !!
जागृत जागृत वीरा ! रे !!

ते जानन्ति सदा नः शूरान्, शान्तसुकोमल-नयसरलान् ।
जानन्त्वद्य कठोरा एते, रिपुभिर्युद्धाहूता रे !!
जागृत जागृत वीरा ! रे !!

*एम. ए., साहित्यरत्नम्, साहित्याचार्यः, राजस्थान-विश्वविद्यालयः जयपुरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देश-सुरक्षा प्रथमः कल्पः, "जय कश्मीर" सुघोषोऽयम् ।
प्राणानां चिन्तामपि त्यक्त्वा, ते निर्भयं प्रयाता रे !!
जागृत जागृत वीरा ! रे !!

सन्तु नाम पैटन-टैङ्कानि, वा सेवरजेटयानानि ।
अस्त्यस्मास्वखर्वो गर्वः, तदा किमर्थं चिन्ता रे !!
जागृत जागृत वीरा ! रे !!

जगत्प्रसिद्धं शौर्यं पुनरपि, दृष्टं रणभुवि विश्वेन ।
धन्या धन्या आशामेजर-किलर-अयूब-हमीदा रे !!
जागृत जागृत वीरा ! रे !!

नीच-चीन-कथनं ह्याश्रित्य, मुधाभिमानं मा धारय ।
अथवा पाक ! धरा ते नूनं, भविता काल-कवलिता रे !!
जागृत जागृत वीरा ! रे !!

शान्तिदूत-सन्ततिरेषाऽस्ति, शान्तिसुखे कामयमाना ।
नेतारः शान्त्यर्थं पुनरपि, ते 'तशाकन्दं' याता रे !!
जागृत जागृत वीरा ! रे !!

पाकच्छलना नैव गृहीता, धन्यो योगो रूसस्य ।
शास्त्र्ययूब-वार्ताया मध्ये, शान्ति-घोषणा जाता रे !!
जागृत जागृत वीरा ! रे !!

परं लेखनी विरमत्यत्र शान्तश्शान्तेर्दूतो नः ।
भवतु घोषणा मान्या सर्वैर्, वयं स्याम कटिबद्धा रे !!
जागृत जागृत वीरा ! रे !!

वलप्रयोगं नहि कृत्वाऽपि, शक्तिसञ्चयं कुरुत कुरुत ।
श्रद्धाञ्जलिरयमेव सुवीराः !, सर्वोपरि वो भविता रे !!
जागृत जागृत वीरा ! रे !!

उत्तिष्ठत जागृत वीरा ! रे !!, जागृत जागृत वीरा ! र !!

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रस्थान-त्रय-तत्त्वदर्शी कालिदासः

टी. के. गोपालस्वामी*

कवि-कुलगुरुः कालिदासो यद्यपि परम-रसिकत्वेन प्रथते, अथाऽपि वेदान्तेषूपनिबद्धान् प्रमेयान् निःसंशय-विपर्ययं समाकलय्य यथा-प्रकरणं कथा-भागान् उपवर्णयन् ललिततमया हृदयंगमया वाक्य-संपदा प्रकाशयति। यद्यपि लोके तत्त्व-प्रकाशका गीतादयो ग्रन्थाः परश्शतं विद्यन्ते, अथाऽपि तेषां पठितारः सुतरां विरलाः, तद्-अनुष्ठातारः सुतमां विरल-विरला एव। परं तु कालिदासो वैदिकान् पौराणिकान् ऐतिहासिकान् धर्म-शास्त्रीयान् सर्वान् विषयान् लोकस्योपदेष्टुकामः स्वकृतीर् निर्मम इत्यत्र नाऽस्ति संशय-लेशोऽपि। केवलं शृङ्गार-रस-पोषण एव तस्याऽभिरुचिर् भूयस्य् यद्य् अवर्तिष्यत, तर्हि काम-शास्त्रस्यैव व्याख्यानं सुनिपुणं विपुलं च निरमास्यत। अयं तु कविर् वैयासिकं महाभारतं, वाल्मीकीयं रामायणं, मानवं धर्मशास्त्रं, दर्शनानि वेदोपबृंहणत्वेन विश्वोपकारकत्वेन च स्वीकृत्य, कथा-प्रकरणान्य् अनुरुन्धानः, समुचितोदात्त-शृङ्गार-रसं तत्र तत्र संपोष्य चेतांसि विश्वेषां समाकर्षन्, अनुष्ठान-पर्यवसायिनीं दृढां प्रतिपत्तिं जनयन्, ऋषि-कल्पः सन् सर्व-संभावनां सर्वतः समश्नुत इति सर्वेऽपि जानते। प्रसिद्ध-कथा-भागेषु प्रकरण-वशाद् औपनिषदान् प्रमेयान् समीच उपाददान एकतः कविष्व् अपरतो वेदान्तिषु चाऽनितर-साधारणं पदम् अध्यासीनः पूर्णः चन्द्रमा इव अविकल-कलः समिन्धे। यादृशी कवेर् अस्य प्रतिभा, अभिरुचिश् च कवितायां ततोऽपि समधिके ते प्रकाशेते वेदान्त-तत्त्व-प्रतिपादने सर्वोपकार-नीति-प्रदर्शने च।

अयं, सार्वभौमः कवीनां, लोक-वेदयोः पारदृश्वा, नाटक-त्रयेऽपि नान्दी-मुखेन, वेदान्तेषु चिर-परिचयवताम् अप्य् अगोचरं, प्रस्थान-त्रय-सारभूतं स्वच्छ-स्वादु-सदाऽवदात-सुभगं प्रमेय-जातं प्रकाशयति। अभिव्यनक्ति

---

*शास्त्र-रत्नाकरः, एम. ए.; तिरुपतिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च प्राज्यं स्वस्य मीमांसा-वैदुष्यं वेदान्त-वाक्यानां परस्पर-विरुद्धवद्-भासमानानाम् ऐककण्ठ्ये परम् आदरं च।

कालिदासोऽयम् एतेषां सुनिष्पन्नाम् एककण्ठतां व्याचिख्यासुः मालविकाग्निमित्रे शाकुन्तले च नान्द्याव् उपनिबध्नातीव। मालविकाग्निमित्रे पुनर् नान्द्य् एवं दृश्यते—

एकैश्वर्ये स्थितोऽपि प्रणत-बहुफले यः स्वयं कृत्तिवासाः
कान्तासंमिश्रदेहोऽप्यविषयमनसां यः परस्ताद्यतीनाम्।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीश ॥ इति।

अत्र श्लोके तृतीये पादे सर्वेश्वरो भगवान् सर्वस्याऽपि स्वामी कृत्स्नं जगत् चेतनाऽचेतनाऽऽत्मकम् अष्टाभिस् तनुभिर् बिभर्तीति स एव कृत्स्नस्य जगत आत्मेति, स च सर्व-शरीरी सन् जगत् चेतनाऽचेतनाऽऽत्मकं कर-चरणादिवत् स्वाऽवयवत्वेन स्वोपभोगाय प्रयुञ्जानः स्वाधीन-स्थिति-प्रवृत्तितां जगतो लम्भयन् विराजत इत्य् अर्थपरंपरा स्फोर्यते। यथा पुरुषस्य कर-चरणाऽऽदयो निरुत्तराः केवलं पुरुषेच्छाधीन-प्रवृत्तयः पारार्थ्यं भजन्ते, यथा च तच्छेषतैक-स्वरूपा भवन्ति, तथा चेतनाऽचेतनाऽऽत्मकं जगद् भगवद्-आराधनैक-प्रयोजनतां समश्नुते। अत्र प्रयुक्तः तनु-शब्दः शरीराऽपरपर्यायः, नैव भोगायतनत्वेन लक्षयितुं पार्यते। 'यस्य चेतनस्य यद् द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं तच्छेषतैक-स्वरूपं च तत् तस्य शरीरम्' इति श्रीकण्ठ-भगवद्रामानुजाचार्याभ्याम् उक्तं लक्षणम् एवाऽत्र संजाघटीति। कालिदासेनोपयुक्तं 'बिभ्रत्' इति पदं भरण-योग्यं भर्तारं लक्षयत् स्वार्थे नियन्तुं धारयितुं च शक्यं तनु-स्थानीयं जगद् हि सूचयति। काः पुनस् तास् तनवः? इति प्रश्नं समादधद् इव कालिदासः शाकुन्तले नान्दी-मुखेन प्रतिपादयति—

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वभूतप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ इति।

अत्र चतुर्थे पादे पञ्चमहाभूतानि पृथिव्यादीनि, सूर्याचन्द्रमसौ, याग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीक्षितो यजमान इत्य् एताभिर् अष्टाभिस् तनुभिः प्रसन्नो भगवान् वरिवर्त्ति, सर्वं जगत् पालयतीति वर्णयन् कालिदासः परम-शिवस्य अष्टमूर्तिर् इति संज्ञाम् अन्वर्थयन्न औपनिषदं प्रमेयं शिक्षयंश् च विशिष्यते। महाकविर् अयं चतुर्मुख-ब्रह्माणम् आहोस्विद् विष्णुं शिवं वाऽधिकृत्य यद् यद् आख्याति, तत् सर्वं परब्रह्म-वाचकम् एवेत्य् अवधारयामः। यतोऽयं मूर्तीनां तिसृणाम् अपि ऐक्यम् अभिप्रैति 'एकैव मूर्तिर्बिभिदे त्रिधा सा' इति। भगवतः प्रत्यक्षाणां तनूनां प्रदर्शनेन विशिष्य तेजः-पुञ्जयोः सूर्याचन्द्रमसोः संकीर्तनेन चाऽयं कालिदासो भगवच्-शरीर-भूतं कृत्स्नं जगत् चेतनाऽचेतनात्मकम् इति सिद्धान्तम् उपनिषद्-निष्पन्नम् आपण्डित-पामरं प्रत्याययन्न् इव विभाति। तेजः-पुञ्जौ दिवाकर-निशाकराव् अपि भगवतो नियमनाऽधीन-प्रवृत्तिकौ व्यसनोदयाभ्याम् आकृष्टौ कर्म-वश्याव् उदितः, अस्तं यात इति वदन् लोको नियम्यते भगवतेति सुस्पष्टं कालिदासः समीरयति शाकुन्तल एवैवम्—

यात्येकतोऽस्तशिखरं पतिरोषधीनाम्
आविष्कृतोऽरुणपुरस्सर एकतोऽर्कः।
तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु॥ इति।

अत्र 'लोको नियम्यते' इति वदतः कालिदासस्याऽयम् आशयः—यल् लोकस्य चेतनाऽचेतनाऽऽत्मकस्य नियन्त्रा धारयित्रा केनचिद् भाव्यं यस्य नियमनेन धारणेन च लोको विना प्रमादं प्रवर्तत इति। सूर्याचन्द्रमसोर् यथाकालम् उदयाऽस्तमययोः प्रदर्शनेन 'भीषास्माद्वातः पवते, भीषोदेति सूर्यः, भीषास्मादग्निश्चेन्द्रश्च' इति तैत्तिरीया श्रुतिर् मनसि कालिदासस्य विपरिवर्तत इव।

एतानि तत्त्वानि यानि प्रकाशितानि तानि बृहदारण्यके श्रुतानां पुनःपुनर् आम्रेडितानाम् अन्तर्यामिब्राह्मणगतानां वाक्यानां सारं प्रत्यक्ष-शरीर-भूत-दृष्टान्त-मुखेनाऽष्टमूर्तित्व-प्रख्यापनेन च प्रकाशयतीव। तत्रैव यः शरीर-शरीरि-भावः प्रतिष्ठापितः, तस्य प्राधान्यं पुनः पुनः वेदान्ति-लोकस्योपदिशन्न इवाऽयं कालिदासः प्रेक्ष्यते। विना शरीर-शरीरि-भावं भेद-श्रुतीनाम् अभेद-श्रुतीनां घटक-श्रुतीनां चैक-कण्ठ्यं न संगच्छेतेति प्रदर्शयितुकाम इव 'प्रत्यक्षाभिरष्टाभिरतनुभिर्' इति। 'अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतः'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति च श्लोक-भागाभ्यां स्थिरीकरोति। 'भर्ता सन् भ्रियमाणो बिभर्ति' इति तैत्तिरीयश्रुतिं, 'विष्टभ्याहमिदं कृत्स्नम्' इति गीतोक्तं तत्त्वं च सुस्पष्टं स्फोरयति।

किं चाऽयं कालिदास इमम् एव शरीर-शरीरिभावम् 'अथ विश्वात्मने गौरी' 'न विश्वमूर्तेरवधार्यते वपुः' इत्यादिषु नाटकयोर् उक्तं वेदान्त-सामरस्य-हेतुभूतम् ऊर्जस्वलम् आम्रेडयति। बृहदारण्यकोक्तम् अन्तर्यामित्वं शरीर-शरीरि-भाव-स्थापनेनैव प्रतिष्ठितं तत्त्वं 'सा किमावेद्यते तुभ्यमन्तरात्मासि देहिनाम्' इत्यादिभिर् अभिव्यज्यते। 'आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना' इत्यादिभिः प्रलयावस्थां सृष्ट्युन्मुखावस्थां च सूचयति। 'सदेव सोम्येदमग्र आसीत्'इति श्रुति-प्रतिश्रुता प्रलयावस्था 'आत्मानमात्मने'ति सूच्यते। 'सृजस्यात्मानमात्मने'ति भागेन 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति श्रुति-प्रतिपन्ना नाम-रूप-व्याकरण-सनाथा सृष्टिर् आख्यायते। उपनिषत्-तुल्या वाग् अस्य कालिदासस्य। अतः सूक्ष्मेक्षिकया यद्येवं सर्वान् अंशान् परामृशेम तदा उपनिषन्-निष्पन्नं तत्त्वम् एव तत् सर्वं पर्यवस्यति।

गीतोपनिबद्धं तत्त्वम् अपि रघुवंशे दशमसर्गे ध्वनयति। तथा हि—

'अत्यन्तमव्यक्तो व्यक्तकारणम्'[1]।
हृदयस्थमनासन्नमकामं त्वां तपस्विनम्।
दयालुमनघस्पृष्टं पुराणमजरं विदुः[2]॥

सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्[3]॥

अभ्यासनिगृहीतेन मनसा हृदयाश्रयम्।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये[4]॥

त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणाम्।
गतिस्त्वं वीतरागाणामभूयस्संनिवृत्तये॥[5]

---

१. रघुवंशे, १०,१८। २. तत्रैव, १०,१९। ३. तत्र, १०,२०। ४. तत्रैव,१०,२३। ५. तत्रैव, १०,२७।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव ।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा[१] ॥

अनवाप्तमवाप्तव्यं न ते किंचन विद्यते ।
लोकानुग्रह एवैकः हेतुस्ते जन्मकर्मणोः[२] ॥

एते श्लोका गीतासु पुनःपुनर् उपदिष्टा उपनिषत्सु मुहुर्मुहुर् उद्घोषिता इति सचेतसः प्रामाणिका ऊरीकुर्वीरन् एव। अत्र कुत्रचिद् अपि माया वाऽविद्या वा ब्रह्मण आच्छादिका, ब्रह्मैव मुच्यते बध्यते चेति च यत् शोश्रूयते ग्रन्थेषु तन् न मात्रयाप्य् अत्र निरदेशीति विदांकुर्वन्तु प्रामाणिका विमर्शकाः ।

महिमानं यदुत्कीर्त्य तव संह्रियते वचः ।
श्रमेण तदशक्त्या वा न गुणानामियत्तया ॥

इत्य् अयं श्लोकोऽपरिमितोदार-गुण-सागरं ब्रह्मेति सूचयन् 'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः' इति सगुणत्वं ब्रह्मणो बादरायणोक्तम् आम्रेडयति ।

किं चाऽयं कालिदासो विक्रमोर्वशीय-नान्द्यां चतुर्षु बादरायण-ब्रह्मसूत्राऽध्यायेषु प्रतिपादितान् अर्थांश् चतुर्षु पादेष्व् असन्दिग्धं, समासतः प्रमेय-जातं विवृण्वानो भाष्यकारायते । नान्दी चैवं दृश्यते—

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥ इति ।

अत्र श्लोकस्य प्रथम-पादे ब्रह्मसूत्र-प्रथमाऽध्यायस्य समन्वयाऽऽख्यस्य निष्कृष्टः समुदितार्थः प्रतिपाद्यते । जगत्-कारणं परं ब्रह्म न प्रत्यक्षेण न वाऽनुमित्या ज्ञातुं शक्यते, अपि तु तद् वेदान्तैकसमधिगम्यं भवतीति 'वेदातेषु यमाहुर्'ति सिद्धान्तयति । सांख्योक्त-प्रधानादि-व्यतिरिक्तम् अधिष्ठात्रन्तर-रहितं सर्व-व्यापकं 'व्याप्य स्थितं रोदसी' इत्य् अनेन सार्वज्ञ्य-

१. रघुवंशे, १०,२८ । २. तत्रैव, १०,३१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्य-संकल्पत्वादि-युक्तं ख्यापयन् कालिदासः, स एव पुरुषो जगतः कारणं भवितुम् अर्हतीति प्रतिपादयति। नान्यां द्वितीये पादे पूर्वोक्तस्याऽर्थस्य दुर्धर्षणत्व-प्रतिपादनेन सर्व-वेदान्ताऽविरोधम् अवगमयति। सर्व-नियामके जगत आधारभूते परम-पुरुषे सर्वोऽपि शब्द ईश्वर इति हेतोर् यथार्थोऽक्षरोऽनन्य-विषयश् चोपपद्यत इति वदन् कालिदासो वेदान्त-व्युत्पित्सूनां बोधकरीं लौकिक-पदव्युत्पत्तितो भिन्नां व्युत्पत्तिं शिक्षयतीत्य् अवधार्यते। श्रुत-वेदान्तैः पुरुषैः प्रतिपन्ना शब्द-व्युत्पत्तिर् अन्यादृशीति सुस्पष्टं बोधयति। सर्वोऽपि शब्दो लौकिको वैदिको वा परमात्म-पर्यन्तं स्वार्थं बोधयति यतः स शब्दो ब्रह्मणि यथार्थाऽक्षरो भवति। यथार्थान्य् अक्षराणि शब्दस्य यस्य स शब्दः मुख्यतया परमात्मानं लक्षयतीति कालिदासः कण्ठ-रवेण सर्वस्याऽपि शब्दस्याऽपर्यवसान-वृत्तिं द्रढयति। लौकिकास् तु पुरुषाः शब्दं व्याहरन्तः शब्द-वाच्ये प्रधानांऽशस्यैव परमात्मनः प्रत्यक्षाद्यपरिच्छेद्यत्वाद् वाच्यैक-देश-भूते वाच्य-समाप्तिं मन्यन्ते, वेदान्त-श्रवणेनैव व्युत्पत्तिः पूर्यत इति विशेषतोऽर्थ-संततिं स्फोरयति। 'सर्वे वेदा यत्पदमामनन्ति, सर्वे वेदा यत्रैकं भवन्ति, वेदैश्च सर्वैरहमेव वेद्यः' इति श्रुत्यादि-सिद्धं प्रमेयं 'ईश्वरत्वादेवानन्यविषयः सर्वोऽपि शब्दो यथार्थाक्षरः' इत्यादे रहस्यं समासतः प्रकाशयति कालिदासः।

तृतीये पादे ब्रह्मसूत्र-साधनाऽध्यायस्य तृतीयस्य ब्रह्माधिगमोपाय-परस्याऽर्थं संगृह्णानः, दहर-विद्यां प्रत्यभिज्ञापयति। दहर-विद्या हि एवं श्रूयते—'अथ यदिदं दहरं पुण्डरीकं वेश्म, दहरोऽस्मिन्नन्तर आकाशः, तस्मिन् यदन्तः, तदन्वेष्टव्यम्, तद्वाव विजिज्ञासितव्यम्' इति। 'मुमुक्षुभिः अन्तः यो मृग्यते' इति पद-समभिव्याहारेण दहर-विद्या प्रत्यभिज्ञाप्यते। स्थिर-भक्ति-योग-सुलभ इति प्रतिपादयन् कालिदासः प्रीति-रूपाऽऽपन्न-तैल-धारावद् अविच्छिन्न-स्मृति-सन्ततिं भगवत्-स्वरूप-रूपगुण-विभावादि-विषयिणा भक्तियोग-पदेन समाख्याति।

चतुर्थे पादे पुनर् अन्ते 'निःश्रेयसायास्तु वः' इति खण्डेन ब्रह्मसूत्र-चतुर्थाऽध्यायस्याऽर्थं संगृह्णाति। निश्चितं श्रेयो हि निःश्रेयसम्। 'यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे' इति भगवन्तं कृष्णं प्रति यत् प्रार्थितं पार्थेन निश्चितं श्रेयः तत् स्मारयन्न् इव दृश्यते कालिदासः। निःश्रेयसं पुनः किंरूपम् इति प्रश्नं समादधान इव कालिदासः शाकुन्तले भरत-वाक्ये 'पुनर्भवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षपयतु नीललोहितः' इति वचनेन पुनर्भव-क्षपण-रूपं भवतीति कण्ठ-रवेण प्रतिपादयति। 'अनावृत्तिः शब्दादनावृत्तिः शब्दाद्' इति ब्रह्मसूत्रान्तिमाऽध्यायान्तिम-सूत्रार्थम् अपुनर्भवरूपं निःश्रेयसाऽपर-पर्यायम् अभिधत्ते निःश्रेयसायास्तु वः' इति।

एवं नान्दी-त्रयेण कालिदास औपनिषदं प्रमेय-जातं सर्वं संगृह्णानः परस्पर-विरुद्धवद्भासमानानां विशकलितानाम् उपनिषद्-वाक्यानाम् ऐककण्ठ्यं प्रतिपादयतां बोधायनादि-परमर्षीणां सूक्तीः संचिन्वानः, भगवतः शरीरभूतं कृत्स्नं जगद् इति तस्य भर्ता सर्व-शरीरी सर्व-शब्द-वाच्य इति, तस्याऽऽराधनायैव चेतनाऽचेतनाऽऽत्मकं जगत् तेनैव धृतं नियम्यमानं च समस्तीति विशदयति। तस्य भगवतः शरीरभूतत्वाद् विश्वस्याऽपि पदार्थ-जातस्य चेतन-जातस्याऽचेतन-वर्गस्य वा न किंचिद् अपि केनाऽपि द्वेष्यं भवितुम् अर्हतीति, सर्वस्य भगवतः शरीरत्वाद् अनुकूलत्वेन वेदनीयम् इति च ज्ञापयति। यदि कश्चित् कंचिद् द्वेष्टि, पराबुभूषति, प्रजिहीर्षति वा, तर्हि सर्व-शरीरी भगवान् द्विष्टं पराभूतं प्रहृतम् आत्मानं मन्येत। क्रुद्धे भगवति आसुरीषु योनिषु क्लिष्टतरं जन्म भविता। कुसुममाला कण्ठे कञ्चुकस्योपरि वा समर्पिता यथा चेतनं कञ्चुक-धारिणं प्रीणयति, तथा चेतन-वर्गस्य भगवतः शरीर-भूतस्य विषये प्रवर्तिता द्वेषाऽसूयादयः, अन्ततः सर्व-शरीरिणो भगवतोऽप्रीतिं जनयेयुर् इत्य् आशयानः कालिदासः परस्पर-हितैषित्वं भगवतः प्रसादाय, लोकस्य महते क्षेमाय चाऽवकल्पेतेत्य् एतत् सर्वम् अनुसन्दधानो महाकविर् नान्दी-त्रयम् अवतारयति। कविः 'यस्मिन्नीश्वर इति हेतोः अनन्यविषयः सर्वोऽपि शब्दो यथार्थाक्षरः भवति' इति प्रतिपादयन् शृङ्खलितं परमं तत्त्वम् आख्याति। भगवतः सर्व-व्यापकत्वात् सर्वान्तर्यामित्वाच् च सर्व-वस्तु-सामानाधिकरण्यं सेत्स्यति। कर्मसु वेदोक्तेष्व् अनुष्ठितेषु सर्व-देवता-वाचकाः शब्दाः परमात्मानं कञ्चुकिनम् अभिदधतः सर्व-कर्म-समाराध्यतां सर्व-फल-प्रदत्वं च तस्यैवाऽवगमयन्ति। इदम् एव तत्त्वं रघुवंशे दशमे सर्गे विस्तरेण विष्णु-वर्णने व्याख्यातम्।

यदि सर्व-व्यापकः सर्वान्तर्यामी भगवान् सर्व-शरीरीति तस्याऽऽराधनाय तस्याऽवयवभूतश् चेतनाऽचेतन-वर्ग इति सर्वोऽपि लोकोऽनुसंदधीत,

(शिष्टं पृ. १३८ द्र.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माया सर्वदर्शनानुस्यूता

केदारनाथ ओझाः*

महामाये मातः सकलगुणकाये चितिरते ।
निकाये ब्रह्माख्ये गतविविधदाये परिगते ॥
गतच्छाये जीवे वितर दययेशे सुनयने ।
नयेनासीना त्वं सरसविटपे दर्शनवने ॥

वैदिक-दर्शन-सम्प्रदायस्य मौलिक-निबन्धेषु बहुलम् उपगीता माया। तान् निबन्धान् अनुसरन्ति तेषां समन्वयं चाऽभिवाञ्छन्ति दर्शनानि मायायाः सम्मानम् अन्तरा कथं मानम् अर्हन्तीति मायायाः सर्व-दर्शन-व्यापकता। तस्याः स्वरूपे परं प्रतिदर्शनं कश्चिद् रूपभेदोऽवश्यम् आयाति, स च पश्चात् प्रस्फुटीभविष्यति । प्रथमं सम्प्रदायम् एव प्रदर्शयामि । तद् यथा श्वेताश्वतरोपनिषदि—

यस्मान्मायी सृजते विश्वमेतत् ।
तस्मिँश्चान्यो मायया सन्निरुद्धः ॥
मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥[1]

माया-शक्ति-विशिष्टे मायिन्य् एव विश्व-सृष्टि-कर्तृत्वं न तु शुद्धे निर्लेप-चैतन्ये, प्रथम-मन्त्रोत्तरार्धेन जीवानां माया-वशगत्वम्, प्रकृष्ट-करणार्थक-प्रकृति-शब्देन सर्जन-शक्तिः, मायिनो महेश्वर्य-वचनाच् चैतन्यं केवलं प्रकाशः, अन्य-विधा सर्वा शक्तिर् माया, मायाया अवयवा मायिन्य् अध्यस्ताः, अतः सर्वं जगद् मायिनोऽप्य् अवयव-भूतं ततश् चाऽन्तर्यामित्वम् इत्यादि

*राजकीय संस्कृत महाविद्यालय; पटना ।

१. श्वेताश्वतरोपनिषद्, ९,१० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्शितम् । अविद्या-शब्देनाऽपीयं व्यपदिश्यते । तद् यथा—

दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता ।
विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त ॥[१]
अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः ।
दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥[२]

महतः परमव्यक्तमव्यक्तात् पुरुषः परः ॥[३]

इत्यादिनाऽनादि-बन्ध-कारणत्वम् अव्यक्त-शब्द-वाच्यत्वं चाऽविद्याया दर्शितम् । ज्ञान-निवर्त्याऽतोऽज्ञान-शब्देनाऽप्य् अस्या वर्णनं प्राप्यते । यथा लिङ्गपुराणे—

तस्मादज्ञानमूलो हि संसारः सर्वदेहिनाम् ।
परतन्त्रे स्वतन्त्रे च भिदाऽभावाद् विचारतः ॥ इति ।

'मायामात्रं कात्स्न्येनाऽनभिव्यक्तत्वात्' इत्येवं ब्रह्मसूत्रे पूर्णतया चैतन्यस्याऽभिव्यक्ति-विरोधित्वम् अस्या वर्णितम् ।

आचार्यगौडपाद-कारिकायां बहुशोऽस्याश् चर्चा—'संघाताः स्वप्नवत् सर्वे आत्ममायाविसर्जिताः' इति । आत्मनो मायाऽविद्या तद्-वशाद् नानाविधा मिथ्याभूता सृष्टिर् इति व्याख्या । तत्रैव—'नेह नानेति चाम्नायादिन्द्रो मायाभिरित्यपि' इति । पूर्ववत् तात्पर्यम् ।

'कल्पयत्यात्मनाऽऽत्मानमात्मा देवः स्वमायया' इत्य् अत्रैकाधिष्ठानेऽनेक-कल्पनम् ।

'स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा' इत्य् अत्र मिथ्या-वस्तुषु माया-शब्दः ।

'जन्म मायोपमं तेषां सा च माया न विद्यते' इत्यत्राऽनिर्वचनीया माया ।

न केवलम् एतावद् एवाऽपि त्व् अद्वैतसिद्धौ तट्-टीकादिषु च ग्रन्थेषू-पवर्णितेयं बहुशः ।

श्रीमदुदयनाचार्यः पाप-पुण्य-रूपम् अदृष्टं नैकविधं संसाध्य

१. कठोपनिषद्, १,२,४ । २. तत्रैव, १,२,५ । ३. तत्रैव १,३,११ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माया, अविद्या, सहकारि-शक्तिः, प्रकृतिर् इत्यादि-शब्दैर् अदृष्टस्यैव शास्त्रेषु वर्णनम् इत्य् उपसञ्जहार न्यायकुसुमाञ्जलि-प्रथम-स्तवकम्। यथा—

इत्येवं सहकारिशक्तिरसमा माया दुरुन्नीतितो
मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता।
देवोऽसौ विरतप्रपञ्चरचना कल्लोलकोलाहलः
साक्षात् साक्षितया मनस्यभिरतिं पुष्णातु शान्तो मम॥

जीवानां कृत-कर्मण उपभोगायैव जगतः सृष्टिः, परमेश्वरोऽपि जीवाऽदृष्टं विना सृष्टि-संहारौ विधातुं नेष्टे। अतः कर्मेश्वरस्याऽसमा सहकारिशक्तिः। तस्यैवाऽपरं नाम माया। लोके दुःखेनोन्नेये दुस्तर्के वस्तुनि माया-शब्दः प्रयुज्यते। कर्माऽप्य् अदृष्टं तथा, प्रकृतिः सृजति, प्रकृतिर् जगत्-कारणम् इति यत्र तत्राऽऽयाति। मूले आदिम-कारणे हि प्रकृति-शब्दस्य प्रयोगः, अदृष्टम् अपि सृष्टेर् मूल-कारणम्। या हि विद्यया विनाश्यते साऽविद्या 'ज्ञानाग्निः सर्व-कर्माणि भस्मसात् कुरुतेऽर्जुन' इति गीतोक्तेन भगवतः कृष्णस्य वचनेन कर्मणाम् अपि ज्ञानेन विनाशात् कर्माऽविद्येत्य् अनर्थान्तरम् इति वक्तुं शक्यते।

अदृष्ट-भिन्नं संसाराऽनर्थ-कारणं प्रवाह-रूपेणाऽनादि मिथ्याज्ञानम् इत्य् अपि नैयायिका ऊचुः, तत्राऽपि वेदान्तिनाम् इव माया-शब्दोऽधिकम् उपयुज्यते। तथा हि 'दुःख-जन्म-प्रवृत्ति' इति न्यायसूत्रे सोपपादनं मिथ्या-ज्ञानं सर्वाऽनर्थ-कारणम् इति प्रतिपादितम्। श्रीशाङ्कर-शारीरकाध्यास-भाष्येऽपि 'मिथ्याज्ञान-निमित्तः' इत्यत्राऽध्यास-विशेषणतया स एव मिथ्या-ज्ञान-शब्द उपात्तः, तत्र केचन व्याख्यातारः—मिथ्या अज्ञानं मिथ्याभूता अविद्या माया इत्यादि वर्णयन्ति च। तथा च न्याये वेदान्ते चाऽध्या-सस्य भ्रम-प्रतीतेः कारणत्वं सत्यानृत-मिथुनीकरणत्वम् अनादि-भाव-रूपत्वं तत्त्वज्ञान-निवर्त्यत्वं च मिथ्याज्ञानस्य समानम्। अनादि-प्रवाह-पतितानाम् उप-भोग-पर्यवसायिनां कर्मणाम् उपभोगायैव सर्जनम् इति मायाया अदृष्ट-रूपत्व-वचनम् अपि समानम् एव। मिथ्याज्ञान-कर्मणोस् त्रिचतुःक्षणादि-स्थायित्वम् अस्तु नाम विशेषः, परं प्रवाह-रूपेणाऽनादित्वं मायापद-प्राप्त्यै पर्याप्तम् एव। मिथ्या-ज्ञानस्य दृढा स्थायिनी वासना वा माया-पदं प्राप्नुयात्।

यद्यपि शरीरादिष्व् अहं-ममेत्यादि-विविधाऽध्यासम् अन्तरा न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कश्चिच् शरीरादिभिश् चेष्टते । समुपपादितं तच् शाङ्कर-शारीरक-भाष्यादिषु । नैयायिका अपि शरीरादि-भिन्नाऽऽत्म-सिद्धान्तिनः शरीरादिष्व् अहं-ममाध्यास-मूलिकाम् एव चेष्टां ब्रूयुः, तथा च कर्मभ्यः प्राग् एवाऽध्यासस् तन्मूलं माया चाऽऽयातीति कर्माणि न माया-पदं भजेयुः, तथाऽपि शरीरादिषु समुत्पन्नेषु तत्राऽहं-ममाध्यासः, उपभोग-जनक-शरीरादि-जनकानि कर्माण्य् अपि तादृशाध्यास-प्राग्-वर्तीनि वक्तुम् अवसरः। अध्यासस्य यानि लक्षणानि शारीरक-भाष्यादिपूपलभ्यन्ते तानि नैयायिकादीनां मिथ्या ज्ञाने सम्यक् समनुयन्ति ।

वेदान्त-विरोधम् अकामयमानोऽपि श्रीनागोजीभट्टो वैयाकरण-सिद्धान्त-लघुमञ्जूषायां बौद्धाऽर्थ-निरूपणे आधुनिकैः स्वीकृतं मायायाः स्वरूप-निर्वचनं निरस्यन् सूत्र-भाष्य-भामती-कल्पतरु-प्रभृति-सन्दर्भांश् च संयोजयन्न् अनादिपरम्परया प्रचलन्ती मिथ्याज्ञान-तद्-वासना-रूपैव मायाऽविद्या वेति सिद्धान्तयामास। तथा च कतिपय-वेदान्तिनोऽपि मिथ्या-ज्ञान-रूप-माया-वादिन इति कथयन् तान् अपराध्यति । मिथ्या-ज्ञान-साधनानीन्द्रियाण्य् अध्यासम् अन्तरा न जायन्त इति मिथ्याज्ञानात् प्राग् अध्यासस्य स्थानम् इति दुष्प्रत्यवस्थानम् अध्यासस्य मिथ्याज्ञान-रूपत्वात्। प्राग्वर्तिनो मिथ्या-ज्ञानस्य प्रवर्तकत्वात्, जानाति इच्छति यतत इति क्रमिक-सिद्धान्तस्य व्याकोपापत्तेः स्वतः क्वचिद् इन्द्रियादीनां प्रवृत्ति-स्वीकाराच् च ।

सांख्यदर्शने वेदान्ताऽभिमत-मायाया विक्षेपशक्ति-प्रयुक्तं कार्यं स्वतन्त्रं प्रधानं साधयति। परं विवेक-ख्यात्या मायाया इव न प्रधानस्योच्छेदः किन्त्व् औदासीन्यम् । मायाया आवरण-कार्यं तु तमोगुणस्य कार्यम्, तमो-गुणोऽपि प्रधान-रूपम् एव, गुणानां पृथग् अप्रवृत्तेः । तथा च प्रकृतिर् एव माया-पदम् अलङ्कुर्वीत । प्रकृतेर् मुक्तान् प्रत्यौदासीन्यं तु न मायायास् तादृश-व्यतिरेक-करम्, वेदान्तेऽपि मायाया एकत्वे अनेक-जीववादे क्रमिक-मुक्तौ च तादृशौदासीन्य-समशीलस्य कस्यचिद् अवश्यम् अङ्गीकारात् । एवं च माया-सदृशं वस्त्व् अन्येषाम् अपि दार्शनिकानाम् अभिमतम्, न केवलं वेदान्त-सम्प्रदाय एव एतादृशस्य विलक्षण-वस्तुनः स्वीकारस्य भारः ।

अविवेकस् तु सांख्यानां व्यवहार-विषयो न माया-स्थानम् अधि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिष्ठति, नञर्थ-घटिततया सत्त्व-पुरुषयोर् विवेकेन भेदेन ज्ञानाऽभावरूपः। विवेकेनाऽगृह्यमाणा प्रकृतिश् चैतन्याऽऽवेशं लभते, ततश् च प्रवर्तते। विवेकेन गृह्यमाणा तु चैतन्याद् उदासीना न प्रवर्तत इति सिद्धान्तात्, अभावस्याऽविवेकस्य भावरूप-जगज्-जनकत्वं नाऽद्भुतं प्रकृतेर् उपादानत्वाद् अविवेकस्य च निमित्तकारणत्वात्। अभावस्य भावोपादानत्व-मात्र-विरोधात्। अन्ये तु भाव एव अविवेकः, अत एव कुत्रचिद् अविवेक-ख्यातिर् इति भाव-रूपेण ख्यातिपदेनोल्लेखः। अन्यत्र प्रकृति-पुरुषयोर् बुद्धि-पुरुषयोर् वा 'एकं संवेदनम्' इत्य् आयाति। योगसूत्रे च ख्याति-विशेषस्यैवाऽविद्या-शब्देन समुल्लेखः। मायाया इव तादृशाऽविद्यायाः सर्वाऽनर्थ-मूलत्वं विवेक-ख्यात्या निवर्तनीयत्वं च वर्णितम्। एवं च मायाया नामान्तरम् इव सांख्यस्याऽविवेकः प्रतिभाति।

प्रत्यभिज्ञा-दर्शनस्य मायाऽप्य् अद्वैति-मायाम् अनुहरति 'फलादीनां तत्त्वानाम् अविवेको माया' इति शिवसूत्राऽभिमतम् अविवेकपदस्य निर्वचनं सांख्यानाम् अविवेकम् अपि अनुसरति, शिव-चैतन्यात् स्वातन्त्र्य-वशाज् जायमानेषु जडेषु उपादान-रूप-शिवाऽऽत्मता अविवेक-वशान् न स्फुरतीति तत्-कार्य-वर्णनम्। तेनाऽहम्-अंश-चिद इदम्-अंश-जडस्य च पृथग् अवभासः, तेन द्वैतं स्फुटं स्फुरति। क्रमशश् चैतन्यांऽशस्य सर्वाऽनुस्यूतत्व-संकोचो जायत इति तात्पर्यम्। अद्वैतिनां मायया साम्यं त्व् अविवेक-पदेन सत्याऽनृत-मिथुनीकरणम्, जडेषु शिवात्मता न प्रकाशत इत्य् अनेनाऽधिष्ठान-शिवस्याऽऽवरणम् इति आवरण-शक्तेर् वर्णनम्, पृथग् अवभास-शब्देनैकस्मिन्न् अनेक-प्रकटन-रूप-विक्षेप-शक्तेः सूचनं च।

तथा विशेषस् तु जड-वर्गेषु शिवाऽऽत्मत्व-स्फूर्तेर् निरोधम् आरभ्यैवाऽनन्तरं माया-कार्यं निर्दिशति प्रत्यभिज्ञा-दर्शनम्। ततः प्राक्तनस्य 'अहम्' 'अहम् इदम्' इत्यादि-स्फुरणस्य विमर्श-शक्त्या शुद्धविद्यातत्त्वेन च निर्वाहः क्रियते, वेदान्ते च विमर्श-शक्तेर् अपि कार्यं माया-कार्यम् एव स्व-प्रकाश-चैतन्य-स्वरूपे ब्रह्मणि स्वतः स्फुरणादि-कर्माऽसंभवात्। शक्तिश् च मायैव। एष विशेषोऽप्य् एतावता यत् प्रत्यभिज्ञा-दर्शनं चैतन्ये क्रिया-शक्तिं स्वीकरोति, शाङ्कर-दर्शनं तु चैतन्ये सर्वथा कर्माऽसंभवं मनुते।

बौद्ध-दर्शनेऽप्य् अविद्या-शब्देन शक्ति-शब्देन वासना-नाम्ना संवृति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सद् इत्यादौ संवृति-पदेन च विज्ञानस्य विविधाऽऽकार-प्रकाशन-शक्तेर् वर्णनम् आयाति। तादृशं वस्तु भाव-रूपम् अनादि-प्रवाह-परम्परया प्रचलत् सर्वाऽनर्थ-मूलम्, तद्-बलाद् विज्ञानेषु नैकविधा विषयाः स्फुरन्ति। शुद्ध-चैतन्यं न स्फुरति। शुद्ध-चैतन्यस्य निराकारस्य धारैव मोक्षः। स च मायाया निरोध एव जायते। तादृश-माया-निरोध एव पुरुषार्थः। सर्वस्य क्षणिकत्वाद् वासनाऽऽधारत्वेन कस्यचिद् अङ्गीकाराच् च स्थिरं वस्तु माया नाऽस्ति, किन्तु कस्यचिद् विषयाऽनुभवस्याऽनन्तरं स्वकारण-महिम्ना विज्ञान-सन्ततौ कश्चित् प्रभाव-पातो जायते, 'चतुर्गुणिताः पञ्च पञ्चविंशतिर्' इति समान-शब्दैः प्रथमं पठतो बालस्य गणितज्ञस्य वृद्धस्य च बुद्धौ भवति विशेष इति नाऽपरोक्षं केषांचित् मनोविज्ञान-परिशीलन-शालिनाम्, तस्य च प्रभाव-पातस्य सन्तानोऽनादितेति विपर्यास-हेतुर् मुक्तिं यावद् अनुवर्ति किम् अपि अनादि-भाव-वस्त्व् इति। तत्-स्थानेऽत्र मायाऽभिधानम्।

कुत्रचिद् वैष्णव-दर्शने माया-शब्देन ईश्वरेच्छाऽपि व्यवहृता, यथा शुद्धाद्वैत-वल्लभदर्शने शब्दस्याऽस्य बाहुल्येन प्रयोगः प्राप्यते, सा नित्या भावरूपा, तया चेच्छया मिथ्या-वस्तुनोऽपि सर्जनं भवति। परं माया मुक्तौ नाऽनुवर्तते, ईश्वरेच्छा तु सनातनीति नाऽस्याः समुच्छेदः, किन्तु सहकारि-साकल्य-वैलक्षण्येन न मुक्तौ मिथ्या सृष्टिः। रामानुज-दर्शनेऽपि शास्त्रीय-वचसां समन्वयायाऽसकृद् अज्ञान-शब्देन कर्मणां व्यवहारोऽङ्गीकृतः।

एवं च सर्वेषु दर्शनेषु मायाया अङ्गीकारोऽवश्यं वर्तते, परं स्वरूप-विचारे प्रतिदर्शनं कश्चिद् विशेषो दृश्यते एव।

✓ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः,
पापात्मनां कृतधियां हृदयेषु बुद्धिः।
श्रद्धा सतां कुल-जन-प्रभवस्य लज्जा,
तां त्वां नतोऽस्मि परिपालय देवि विश्वम्।

इति दुर्गासप्त-शती-रीत्या नैक-रूपया भगवत्या मायया कस्याऽपि सम्प्रदायस्य, धर्मस्य, दर्शनस्य, जातेः, सभ्यतायास् च विद्वेषः संभवति? तथा च सर्वानुस्यूतत्वं मायायाः।

शाङ्कराऽद्वैत-दर्शने त्व् अपरिणामिनः शुद्धस्य स्वयं-प्रकाशस्याऽऽनन्दात्मकस्य ब्रह्मणोऽनादि-कालाद् आवरणम्, ब्रह्मण्य् अध्यस्तस्यैव स्फुरणम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अध्यासेनैव विक्षेप-शक्त्यैकस्मिन् ब्रह्मण्य् अनेकत्व-ज्ञानं, जीवत्वस्याऽनादेः सम्पादनम्, जीवानां भेद-विधानम्, जडात्मतया जीवानाम् अध्यासः शरीरेन्द्रियाद्यात्मना जीवानाम् अध्यासः, सत्यानृत-मिथुनीकरणम्, किमुत, ज्ञाने विषयाणाम् अध्यस्ततयैव प्रकाश इति सृष्टि-स्थिति-प्रलय-जागतिक-सर्वव्यवहार-निष्पादकत्वं मायाया अभिप्रैति।

माया हि स्वयम् अनिर्वाच्या मिथ्याऽतस् तत्-कार्याण्य् अपि मिथ्या-भूतानि, तेन तत्त्व-ज्ञानेनाऽधिष्ठान-ब्रह्म-साक्षात्कारेण मायायास् तत्-कार्याणां च मिथ्या-भूतानां समुच्छेदः। सतो हि सांख्यदर्शन-प्रधानस्य नैयायिकादीनां कर्मणश् च ज्ञानेन समुच्छेदो न संभवति। ज्ञानेन ह्य् अज्ञानस्याऽज्ञान-कार्यस्य च निवृत्तिर् अनुभव-सिद्धा न ह्य् अन्यस्य। 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन' इत्यादिशास्त्राणि नाऽपूर्व-विधायकान्य् अपितु ज्ञानेनाऽन्तः-करणे आत्मनोऽध्यासस्य निवृत्तिः। ततश् च कर्मणाम् आत्मना सह सम्बन्धाऽभावाद् भोगाऽजनकत्वं तदनुवादीन्य् एव पूर्वोक्त-शास्त्र-वचनानि। प्रधानस्यौदासीन्ये न विश्वासः, प्रधानस्य जडतया तत्र राग-द्वेषयोर् असंभवाद् राग-द्वेषाभाव-रूपस्योपेक्षात्मक-ज्ञान-रूपस्य चौदासीन्यस्योपपादनाऽसंभवात्। अचेतनम् अपि प्रधानं रज्यति, उदास्ते चेति वर्णनं माया-वर्णनम् एव इति मनुते। अन्येषां वस्तुवादि-दार्शनिकानां कार्य-कारण-भावादि-दिशा व्यवहार-व्यवस्थापने यत्र यदा चाऽद्भुतत्वस्य प्रवेशस् तत्रैव तदैव च माया-प्रवेश इति पश्यति च। यथा परमाणु-कारण-वादे परमाणवः क्रिया-स्वभावा अक्रिया-स्वभावा वा ? उभयथाऽपि न सृष्टि-प्रलय-व्यवस्थायाः सम्भवः। क्रियाया आगन्तुक-कारणकत्वे प्रलय-दशायां तादृश-कारणानाम् असंभवः। तत्र यत् किम् अप्य् अद्भुतं वर्ण्यते तन्माया-प्रभाव-वर्णनम् एव। अघटित-घटना-पटीयो वस्तु सर्वम् एव दर्शनम् अङ्गीकरोतीति भावः।

प्रत्यभिज्ञा-दर्शनं तु मायाम् आश्रयत एव किं तु शिवस्य शक्तिं मायाम् एवाऽवगच्छत्व् इत्य् एव नूतनम् उक्तप्रायम् एव।

प्रत्ययवादि-बौद्धदर्शने तु सर्वं वस्तु ज्ञानाकारम् एव यथा स्वाप्निकम् इति वर्ण्यते। तत्र पर्वते पश्यतो बालस्य हृदि पर्वतो वर्तते इति यदि कश्चित् साधयेत् तं मायावीत्य् एव जना वदेयुः। एवं स्वप्न इव जाग्रति गृहे बहिर् वा धूम्र-शकटया मोहमयी-यात्रां प्रदर्शयेत् ताम् अद्भुतां मायाम् एव द्रष्टारो मन्येरन्। तथा च शशश्रृङ्ग-प्रायं बाह्यं वस्तु न श्रद्दधाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्ति-चेतः। अदसीय-माया-विनिर्मितानि तु जागतिक-वस्तूनि प्रत्यक्षानुमानादि-प्रमाणैर् यथा यथा परीक्षकाः प्रमिण्वन्ति भौतिक-शास्त्रज्ञैर् इव रसायन-रसज्ञैर् मनोवैज्ञानिकैर् वा यथा व्यवस्थाप्यन्ते तानि तथैव। तत्र न कश्चिद् विरोधः। शुद्ध-ब्रह्म-साक्षात्कार-बाध्यत्व-मात्रेण तु तेषां मिथ्यात्वम् इति न तत् केचन बाधन्ते इति शम्।

माया मदीयदयनीयमनो दयार्द्रा
भद्रा करोति भवदारुणदुर्गदाहम्।
तन्द्रा प्रयातु विलयं न लयं चितिर्मे
वाचोऽर्पितास्तव-पदाब्जरजः श्रयन्ताम् ॥

(१३० पृष्ठस्य शेषः)

तर्हि लोके परस्पर-द्वेषाऽसूयाद्यरि-षड्वर्गः झटित्य् अन्तर्दधीत। यदि परस्पर-हितैषित्वं, परस्पर-मैत्री, परस्पर-क्षेमैक-परायणता, मिथः सन्तोषाभिवर्धित-सुख-विकास इत्यादयोऽभिवर्धेरन्, तर्हि 'सर्वं खल्विदं ब्रह्म' इति जोघुष्यमाणः परम-पुरुषः प्रसीदेत्, अपुनर्भवरूपं सर्वं भव्यम् अनुगृह्णीयात् इत्य् एतत् सर्वं नान्दी-त्रयेण संगृह्णानः श्रुति-स्मृति-सूत्राणाम् ऐककण्ठ्यम् आतन्वानः, शिवेतर-क्षतये नाटक-त्रयं रचयन् कालिदासो लोक-क्षेमैक-परायणः परम-पुरुष-वरणीयता-हेतु-गुण-सनाथो जगतः सत्यताम् अर्थापयन् विजयतेतमाम्।

वस्तुतस् तु पर्यालोच्यमाने कविर् अयं शैव-विशिष्टाद्वैती भवितुम् अर्हति। अस्य मते मूर्ति-त्रयस्याऽपि परब्रह्म-रूपत्वान् नाऽस्माकं निर्भरता शिवस्य विष्णोर् वा पारम्य-प्रकाशने। इदम् एव परमं रहस्यं भवितुम् अर्हति, यत् कालिदास-प्रतिपादितानि तत्त्वानि विशिष्टाद्वैतस्य प्राचीनतां प्रकाश्य, जगतः सत्यतां चाऽऽविष्कृत्य वेदान्त-प्रासादे विराजन्तेतमाम् इति।

कालिदासो जगत् सर्वं शरीरं ब्रह्मणो वदन्।
प्रस्थानत्रयसारांशं विशिष्टैक्यं न्यरूपयत् ॥ इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किमर्थमित्थं परमं प्रहृष्टाः

अ. वे. सुब्रह्मण्यः*

वनदेवता रामं सीतां लक्ष्मणं च निरीक्ष्य पृच्छति—

'यूयं वनं प्राप्य विसृज्य राज्यं,
किमर्थमित्थं परमं प्रहृष्टाः' इति।

रामो वक्ति—

मत्स्यादिके जलचरत्वनिसर्गहेतोर्
जन्मत्रये वसतिरम्बुधिरेव मेऽभूत्।
स्तम्भे च संकुचित-धामनि यज्ञवाटे
जन्मद्वयं दनुज-निर्दलने व्यतीतम्॥

लब्ध्वा जनोऽयमवनीविबुधेषु जन्म
स्थानं मुनेर्वनभुवि स्वपितुर्विसृज्य।
अन्वेष्टुमात्तपरशुर्नगरेषु राज्ञः
तन्निग्रहाय चतुरन्तमहीं चचार॥

कामो मुनीन्द्रचरितानि निषेवितुं यः
वैकुण्ठतोऽवतरणान्मम काननानि।
संवर्धितः प्रथमपञ्चजनिष्वभुक्तेः
पूर्णः स मेऽत्र वनवासचिराभिलाषः॥

यत्ताटकेयमहतं विससर्ज पूर्वं
कोदण्डमेतदयशः प्रतिपादकं मे।
प्राप्तोस्म्यमोघशरताप्रतिपादनार्थम्
अन्विष्य काननगतं मुनिवेषभाजम्॥

---

*सीनियर डिप्टी एकाउण्ट जनरल; एकाउन्टेन्ट जनरल ऑफिस बम्बई–१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सीता वक्ति—

अरुन्धती मामेवम् उवाच—

'प्रायः प्रचण्डकिरणप्रभवेष्वपत्य-
संरोधि यद् दुरितमुत्कटमन्वयस्थम् ।
तद्धेतुना तव सुते तनुजस्य लाभः
तत्पाप्मनः प्रशमनेन विना न भूयात् ॥

पुण्ये विधूतवृजिने श्रितनिर्जरौघे
गोदावरीसलिलपावितसंनिवेशे ।
संवत्सरं निरसनाय मया हि तस्य
पुत्रव्रतं प्रयतया चरितव्यमासीत् ॥

नैच्छद् वहिर् नगरतो गमनं प्रजार्थं,
नाथस्तदा प्रभृति मत्सखिचोदितोऽपि ।
संप्रार्थ्य केकयसुतां तु सहस्रकृत्वः
तस्याः प्रसादमधिगम्य वनं प्रयाताः ॥

लक्ष्मणो वक्ति—

राज्येन किं प्रकृतिपालनधर्मणा मे
राज्यस्य धूर् भरतरामशिरोऽर्पितव्या ।
कैंकर्यराज्यपरिपालनसिद्धिमिच्छोः
क्लृप्ता ममात्र वसती रघुनाथपार्श्वे ॥

(१४५ पृष्ठस्य शेषः)

योग-चरकमतानुयायिनः प्रधान-परिणामवादिनः । प्राचीना भर्तृप्रपञ्चाऽऽदयः पराचीनो वल्लभाचार्यश् च ब्रह्म-परिणाम-वादिनः । बौद्धाः प्रतीत्य-समुत्पाद-वादिनः । शाङ्कर-वेदान्तिनो विज्ञानवादिनः शून्य-वादिनश् च विवर्त-वादिनः । जैना अपि परिणाम-वादिनः । तेषां मते परमाणवश् चेतन-तत्त्वानि च परिणामीनि ।

तद् इत्थं प्राचीन-कालाद् अयम् अनेक-मुखो विचार-प्रवाहः पर-तत्त्व-सागराऽभिमुखोऽनवरतं प्रवहतीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बौद्धागमे प्रमुखा वादाः

व्रजनन्दनमिश्रः*

विचारो हि शुद्ध-बुद्धि-प्रभवः। यस्याऽन्तः-प्रसादो यत्-प्रमाणो भवति, बुद्धि-शुद्धिर् अपि तस्य तत्-प्रमाणैव भवति। अन्तः-प्रसादश् च वशीकृताऽऽत्मनां भवति। वशीकृताऽऽत्मानोऽप्य् आभ्यन्तरिक-भूमिकासु तारतम्येन समारूढा भवन्ति। अतस् तेषां विचारा अपि विशुद्धि-तारतम्यम् अपेक्ष्य तारतम्य-भाजो भवन्ति। अत एव विचार-भेदः कृत-स्थानो भवति।

स चाऽयं विचारः स्व-सापेक्षः पर-सापेक्षश् च भवति। तत्र कस्यचिद् वस्तुनो निर्णयायोहाऽपोह-पूर्वको यो बुद्धि-व्यापारः स स्व-सापेक्षः। पर-सापेक्षश् च स्वाऽभिमताऽर्थ-सिद्ध्यर्थं प्रश्नोत्तर-पूर्वकं परस्पर-कृतो वाग्-व्यापारः। सोऽयं पर-सापेक्षो विचारः संभाषा-कथा-वाद-शब्दैर् व्यवह्रियते। तत्र संभाषा वैद्यक-शास्त्रे प्रसिद्धा, कथा च न्याय-शास्त्रे, वादः पुनर् बौद्ध-परम्परायाम्। संभाषा सन्धायसम्भाषा-विगृह्यसंभाषा-भेदेन द्वि-विधा। कथा च वाद-जल्प-वितण्डा-भेदेन त्रि-विधा। वादश् च सद्धर्मवाद-विवादाऽऽदि-भेदः। एतेषु सन्धाय-संभाषा वाद-कथा सद्धर्मवादश् च समानाऽभिप्रायाः। सत्यस्य जिज्ञासया जिज्ञापयिषया च यो विचारः प्रस्तूयते स एव सन्धाय-संभाषेति वाद-कथेति सद्धर्म-वाद इति च व्यवह्रियते। विजिगीषया छल-जाति-निग्रहस्थान-सहकारेण पक्ष-प्रतिपक्ष-परिग्रह-पूर्वको यो विचारः स जल्पः। स्वपक्ष-स्थापना-हीनः पर-पक्ष-खण्डनाऽऽत्मकः स एव वितण्डा। न्यायाऽभिमते एते जल्प-वितण्डा-कथे विगृह्य-संभाषायाम् अन्तर्भवतो वैद्यक-मते, बौद्ध-मते च विवादादिषु। आपरकालिका बौद्ध-तार्किकाः सत्येप्सा-विरोधित्वाज् जल्प-वितण्डे त्याज्य-कोटौ निक्षिपन्तो वाद-कथाम् एव ग्राह्य-कोटौ न्यवेशयन्। जैन-तार्कि-

---

*व्याकरणाचार्यः, विश्वेश्वरानन्द-संस्थानम्, साधुआश्रमः; होशिआरपुरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कास् तु जल्प-वितण्डयोर् अग्राह्यताऽऽग्रहपराः। अतस् ते प्राधान्येन वाद-कथाम् एवाऽङ्गीकृत्य स्व-विचारं प्रावर्तयन्।

यद्यपि श्रुतयो बौद्ध-त्रिपिटक-ग्रन्था जैनागम-ग्रन्थाश् च सत्-तत्त्व-परिज्ञापनाय प्रवृत्ताः, अतस् तेषु वाद-कथयैव भवितव्यम्। परं तु तत्राऽपि जल्प-वितण्डा-कथा-बीजं कृताऽऽस्पदम्। ऋग्वेदे हविष्पान्तीय-सूक्ते (१०,८८) अष्टादशे मन्त्रे[१] 'उपस्पिजम्' इति शब्दो वर्तते। तत्र उपस्पिक्-पदार्थस् तु विजिगीषार्थं प्रश्नः[२]। अतोऽनुमीयते वेद-कालेऽपि वाद-कथाऽतिरिक्तयोर् जल्प-वितण्डा-कथयोर् अपि प्रचार आसीद् इति। ततस् तद्-अवर-काले सुतरां तत्-सत्ता सिध्यति। एवं च त्रि-विधाऽपि कथा पुरातन-कालाद् एव स्थितिमतीत्य् असन्दिग्धम्।

इयं कथा-परम्परा पुरा-काल एव बहूनां वादानाम् उद्भाविकाऽभूद् इत्य् अनुमीयते। तत्र त्रिपिटकेषु द्वि-षष्टि-वादाः मुख्यरूपेणोपलभ्यन्ते। तेष्व् अष्टादश पूर्वान्तकल्पिक-वादिनां वादाः, चतुश्चत्वारिंशच् चाऽपरान्त-कल्पिक-वादिनां वादाः। तत्र पूर्वान्तकल्पिक-वादिनः पूर्व-कालम् आश्रित्य आत्मनो लोकस्य च विषये वाद-पराः। अपरान्तकल्पिक-वादिनश् चाऽपर-कालम् आश्रित्य वाद-पराः।

पूर्वान्तकल्पिक-वादिषु चतुर्-विधाः शाश्वत-वादिनां वादाः। ते हि समाधि-सहकारेण तर्क-सहकारेण चाऽऽत्मानं लोकं च शाश्वतं वदन्ति। एतेषु प्रथमे त्रयः समाधि-सहकारेण चतुर्थास् तु तर्क-सहकारेण तथा-विध-वादिनः।

चतुर्-विधाः शाश्वताऽशाश्वत-वादिनां वादाः। ते पुनर् आत्मानं लोकं च शाश्वतम् अशाश्वतं च वदन्ति। एतेष्व् अप्य् आदितस् त्रयः समाधि-सहकारेण चतुर्थास् तु तर्क-सहकारेण तथाविध-वाद-पराः।

चतुर्विधाश् च सान्ताऽनन्त-वादिनां वादाः। ते हि लोक-विषये सान्ताऽनन्त-वादिनः। तत्र प्रथमे वादिनो लोकम् इमं सान्तं परिमितं च

---

१. कत्यग्नयः कति सूर्यासः कत्युषासः कत्यु स्विदापः।
नोपस्पिजं वः पितरो वदामि पृच्छामि वः कवयो विद्मने कम्॥

२. द्र. वेङ्कटः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्यन्ते। द्वितीयाः पुनर् अनन्तम् अपरिमितं च। तृतीयास् तु सान्तम् अनन्तं च। एतन्-मते ऊर्ध्वम् अधश् च सान्तोऽयं लोकः, तिर्यक् चाऽनन्तः। तुरीयाणां मते तु नाऽयं लोकः सान्तो न चाप्य् अनन्तः। एतेषाम् आद्यास् त्रयः समाधि-सहकारेण चतुर्थास् तु तर्क-सहकारेण तथा-विध-वादिनो भवन्ति।

चतुर्-विधाः पुनर् अमराविक्षेप-वादिनां वादाः। तेषु वादिषु त्रयः कुशलाऽकुशलयोर् यथार्थ-ज्ञान-शून्या भवन्ति। ते कम् अपि प्रश्नं पृष्टाः 'एवम् अपि नाऽहं मन्ये, तथेत्य् अपि नाऽहं मन्ये, अन्यथेत्य् अपि नाऽहं मन्ये' इत्यादि-प्रकारां निरर्थां वाचं वदन्ति। तेषु प्रथमे मृषा-वाद-भयाद्, द्वितीया उपादान-भयात्, तृतीयाश् चाऽनुयोग-भयाद् एवं-विध-वाद-परायणा भवन्ति। चतुर्थाः पुनर् मूढात्मानो भवन्ति। ते हि मौढ्यात् प्रश्नानाम् उत्तरणेऽसामर्थ्यं सूचयन्तीति।

अधीत्य-समुत्पन्नवादिनां (अकारण-वादिनां) द्वौ वादौ। उभयेऽप्य् आत्मनो लोकस्य चाऽपूर्वां सत्तां मन्यन्ते। तत्र प्रथमे समाधि-सहकारेण, अपरे च तर्क-सहकारेण तथा-वादिनो भवन्ति। एतेषां मते आत्मा लोकश् चाऽभूत-पूर्व एवोत्पद्यत इति।

अपरान्तकल्पिक-वादिषु केचन वादिनो मरणोत्तरम् आत्मनः संज्ञित्वं वदन्ति। ते हि मरणोत्तराऽऽत्म-संज्ञित्व-वादिनः। तेषां षोडश वादाः। प्रत्येकं वादेष्व् आत्मनोऽरोगत्वं संज्ञित्वं च समानम्। पार्थक्यं पुनः प्रथमे वादे रूपित्वम्, द्वितीये अरूपित्वम्, तृतीये रूपित्वाऽरूपित्वोभय-विशिष्टत्वम्, चतुर्थे रूपित्वाऽरूपित्वोभयाऽभाव-विशिष्टत्वम्, पञ्चमे सान्तत्वम्, षष्ठे अनन्तत्वम्, सप्तमे सान्तत्वाऽनन्तत्वोभय-विशिष्टत्वम्, अष्टमे सान्तत्वाऽनन्तत्वोभयाऽभाव-विशिष्टत्वम्, नवमे एकात्म-संज्ञित्वम्, दशमे नानात्म-संज्ञित्वम्, एकादशे प्ररिक्त-संज्ञित्वम्, द्वादशे अप्रमाण-संज्ञित्वम्, त्रयोदशे एकान्त-सुखित्वम्, चतुर्दशे एकान्त-दुःखित्वम्, पञ्चदशे सुखित्व-दुःखित्वोभय-विशिष्टत्वम्, षोडशे तु सुखित्व-दुःखित्वोभयाऽभाव-विशिष्टत्वम् इति।

अपरे पुनर् मरणोत्तरम् आत्मनोऽसंज्ञित्वं वदन्ति। ते वादिनस् तु मरणोत्तराऽऽत्माऽसंज्ञित्व-वादिनः। तेषां वादा अष्ट-विधाः। प्रत्येकं वादेष्व् आत्मनोऽरोगत्वम् असंज्ञित्वं च सदृशम्। पार्थक्यं पुनः प्रथमे वादे रूपित्वम्, द्वितीये अरूपित्वम्, तृतीये रूपित्वाऽरूपित्वोभय-विशिष्टत्वम्, चतुर्थे रूपि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वारूपित्वोभयाऽभाव-विशिष्टत्वम्, पञ्चमे सान्तत्वम्, षष्ठे अनन्तत्वम्, सप्तमे सान्तत्वानन्तत्वोभय-विशिष्टत्वम्, अष्टमे च सान्तत्वानन्तत्वोभयाऽभाव-विशिष्टत्वम् इति।

अन्ये पुनर् मरणोत्तरम् आत्मनः संज्ञित्वाऽसंज्ञित्वोभयाऽभाव-विशिष्टत्वं वदन्ति। तेषाम् अप्य् अष्टौ वादाः। प्रत्येकं वादेष्व् आत्मनोऽरोगत्वं संज्ञित्वासंज्ञित्वोभयाऽभाव-विशिष्टत्वं च तुल्यम्। पार्थक्यं पुनः प्रथमे वादे रूपित्वम्, द्वितीये अरूपित्वम्, तृतीये रूपित्वारूपित्वोभय-विशिष्टत्वम्, चतुर्थे रूपित्वारूपित्वोभयाऽभाव-विशिष्टत्वम्, पञ्चमे सान्तत्वम्, षष्ठे अनन्तत्वम्, सप्तमे सान्तत्वानन्तत्वोभय-विशिष्टत्वम्, अष्टमे च सान्तत्वानन्तत्वोभयाऽभाव-विशिष्टत्वम् इति।

केचन आत्मोच्छेद-वादिनः। तेषां सप्त-विधा वादाः। प्रत्येकं वादेषु शरीर-नाशाऽनन्तरम् आत्म-नाशोऽभिमतः, आत्माऽभिमतिस् तु विभिन्ना। तत्र प्रथमे वादिनश् चातुर्महाभूतिकं मातापितृ-संभवम् एतच् शरीरम् एवाऽऽत्मानं मन्यन्ते। द्वितीयाः शरीराद् अतिरिक्तं दिव्यं रूपिणं कामाऽवचरं कवलाहार-भक्षम् आत्मानं निर्दिशन्ति। तृतीया इतोऽप्य् अतिरिक्तं दिव्यं रूपिणं मनोमयं सर्वाङ्ग-प्रत्यङ्ग-युक्तम् अहीनेन्द्रियम् आत्मानं प्रतिपादयन्ति। चतुर्था आकाशायतनोपगम् आत्मानं वदन्ति, पञ्चमा विज्ञानाऽऽयतनोपगम्, षष्ठा आकिञ्चन्याऽऽयतनोपगम्। सप्तमाः पुनः संज्ञाऽसंज्ञोभयाऽऽभावाऽऽयतनोपगम् आत्मानं वदन्तीति।

के चन वादिनो दृष्ट-धर्म-निर्वाण-वादिनः (जीवन्-निर्वाण-वादिनः)। ते हि सतः सत्त्वस्य निर्वाणं वदन्ति। तेषां पञ्च भेदाः। तत्र प्रथमे वादिनः पञ्चेन्द्रिय-विषयैः समन्वागतस्य संतृप्तस्य सतः सत्त्वस्य निर्वाणं वदन्ति। द्वितीया इन्द्रिय-विषयाणाम् अनित्यत्वाऽऽदि-दोष-ग्रस्तत्वाद् इन्द्रिय-विषयेभ्योऽसत्-सङ्कल्पेभ्यश् च विविक्तस्य सवितर्क-सविचार-विवेकज-प्रीति-सुख-रूप-प्रथम-ध्यानम् उपसम्पन्नस्य सतः सत्त्वस्य निर्वाणं वदन्ति। तृतीयाश् चाऽत्र ध्याने वितर्कस्य विचारस्य च सत्त्वाद् दोषं संप्रेक्षमाणा वितर्क-विचार-व्युपशमाद् अध्यात्म-सम्प्रसादनं चेतस एकाकित्व-रूपम् अवितर्कम् अविचारं समाधिज-प्रीति-सुखं नाम द्वितीयं ध्यानम् उपसम्पन्नस्य सतः सत्त्वस्य निर्वाणं वदन्ति। चतुर्थाः पुनः प्रीति-सद्भावाच् चेतसश् चाञ्चल्य-संभावनाद् अत्र ध्याने दोषम् उत्प्रेक्षमाणास् तृतीय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्यानम् उपसम्पन्नस्य सतः सत्त्वस्य निर्वाणं वदन्ति। अस्मिन् ध्याने सत्त्वः प्रीति-विरक्तिमत्त्वाद् उपेक्षकः स्मृतिमान् सुख-विहारी च भवति। पञ्चमाः पुनर् अत्र ध्याने सुख-सत्त्वाच् चेतस आभोगम् उत्प्रेक्षमाणाः सौमनस्य-दौर्मनस्ययोर् अस्तं-गमनात् सुख-दुःखयोश् च प्रहाणाद् अदुःखम् असुखम् उपेक्षा-स्मृति-परिशुद्धिं नाम चतुर्थं ध्यानम् उपसम्पन्नस्य सतः सत्त्वस्य निर्वाणं वदन्ति। इत्य् एते पञ्च दृष्ट-धर्म-वादिनः। इत्य् अपरान्तकल्पिक-वादाः।

इतोऽतिरिक्ताः प्रतीत्यसमुत्पाद-संसारविशुद्धि-चातुर्यामसंवराऽऽदयोऽन्येऽपि विविधा वादाः समुपलभ्यन्ते।

दार्शनिक-युगे तु चत्वारो वादा विद्वद्भिर् आश्रिताः। ते हि आरम्भवादः, परिणामवादः, प्रतीत्यसमुत्पादवादो विवर्त्तवादश् च। तत्र परिणामवादः प्रधान-परिणामवाद-ब्रह्मपरिणामवाद-भेदेन द्वि-विधः। विवर्तवादश् च नित्य-ब्रह्म-विवर्तवादः क्षणिक-विज्ञान-विवर्तवादश् चेति द्वि-विधः।

तत्र आरम्भ-वादिनः परस्पर-भिन्नान्य् अनन्त-मूल-कारणानि, कार्य-कारणानाम् आत्यन्तिकं भेदम्, कारणानां नित्यत्वेऽप्य् अनित्यत्वेऽपि च कार्योत्पत्ताव् अपरिणामित्वम्, उत्पत्तेः पूर्वम् असतः कार्यस्य चोत्पत्तिं मन्यन्ते।

परिणामवादिनस् तु मूल-कारणस्यैकत्वम्, वास्तविक-दृष्ट्या कार्य-कारणयोर् अभेदम्, नित्य-कारणस्याऽपि परिणामित्वं प्रवृत्तिमत्त्वं च, प्रत्येकं कार्याणां स्व-स्व-कारणेषु सकल-कार्याणां च मूल-कारणे काल-त्रयेऽप्य् अस्तित्वम् इति स्वीकुर्वते।

प्रतीत्यसमुत्पादवादिनश् च कार्य-कारणयोर् आत्यन्तिकं भेदम्, कस्याऽपि नित्यस्य परिणामिनो वा कारणस्य सर्वथाऽसत्त्वम्, असत एव कार्यस्योत्पादं च मन्यन्ते।

विवर्तवादिनश् चोत्पत्ति-परिणाम-रहितस्यैकस्य पारमार्थिक-तत्त्वस्य सत्ताम्, स्थूलस्य सूक्ष्मस्य वा भासमानस्य जगत उत्पादस्य परिणतेर् वा सर्वथाऽभावम् अवास्तविकाऽस्तित्वं च मन्यन्ते।

नैयायिका वैशेषिकाः पूर्वमीमांसकाश् च आरम्भ-वादिनः। सांख्य-

(शिष्टं पृ. १४० द्र.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृत-भाषायाः पत्रकारिता-क्रमविकाशः

गणेशरामः*

(गताङ्काद् अग्रे)

संस्कृत-साहित्य-परिषत्पत्रिका इत्याख्या मासिक-पत्रिका १६८।१, राजा-धनेन्द्र-स्ट्रीट, श्यामबाजार, कलकत्ता इति स्थानात् प्रकाश्यते। आदौ स्व. कवि-शिरोमणि-भट्टश्रीमथुरानाथ-साहित्याचार्य-द्वारा सम्पादितं स्व. म. म. गिरिधरशर्म-चतुर्वेद-महाभागादिभिः संरक्षितं च जयपुरात् सुचिरं प्रकाश्यमानं तदनु च वाराणसीतः सर्व-तन्त्र-स्वतन्त्र-पण्डित-महादेवशर्मणः कवितार्किक-चक्रवर्तिनः प्रधान-सम्पादकत्वे श्रीरघुराजमिश्र-न्यायाचार्यस्य सह-सम्पादकत्वे, ततः पुनर् अपि जयपुरतः स्व० पण्डितवृद्धिचन्द्र-शर्म-शास्त्रिणः सम्पादकत्वे, ततश् चाऽखिल-भारतीय-संस्कृत-साहित्य-सम्मेलनस्य देहलीस्थस्य समवधाने प्रकाश्यमानं संस्कृतरत्नाकर इति पत्रं को वा न जानीते ? पत्रस्याऽस्य सम्पादनं कंचित् कालं म. म. श्रीपरमेश्वरानन्द-शास्त्रि-महाभागेन तथा सुचिरं स्वर्गीयैः केदारनाथ-सारस्वत-महोदयैर् अपि कृतम्। स च संस्कृत-रत्नाकरोऽधुनाऽखिलभारतीय-संस्कृत-साहित्य-सम्मेलनस्, देहली-६ इति संस्थानस्य मन्त्रिणा डा० मण्डनमिश्र-महाभागेन मीमांसाचार्येणाऽखिल-भारतीय-संस्कृत-साहित्य-सम्मेलनस्य मुखपत्र-रूपेण सम्पाद्यमानः प्रकाश्यमानश् च वर्तते।

अथ श्रीभारतधर्म-महामण्डलस्य काशिकस्य समवधाने त्यक्त-महा-महोपाध्याय-पदवीकैः पञ्चानन-तर्करत्न-भट्टाचार्यैः श्रीमद्-अवधेशप्रसादशर्म-द्विवेद-सहितैः सम्पाद्यमानं सूर्योदय-नामकं मासिक-पत्रं च संस्कृत-विदां सुपरिचितम् एव।

विहार-संस्कृत-सञ्जीवन-समाजः, वारीपथ, पटना-४ इत्य् एतस्मात् स्थानात् संस्कृत-सञ्जीवनम् इत्याख्यं मासिक-पत्रम् अपि प्राकाश्यं याति।

*विद्याभूषणः, डुँगरपुरम् (राजस्थानम्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ च स्वर्गीय-बुर्ली-श्रीनिवासाचार्यैः प्रवर्तिता संस्कृत-साहित्यरत्नेन पण्डित-श्रीगलगलीरामाऽऽचार्येण प्रधानसम्पादकेन संस्कृत-साहित्य-सुधाकरेण श्रीगलगलीपण्ढरी-नाथाचार्येण सह-सम्पादकेन सम्पादिता मधुरवाणी-नाम्नी पत्रिका कर्णाटकस्थ-गदग-स्थानत आविर्भवति।

श्रीगोविन्दप्रसाद-शास्त्रिणा दाधीचेन सम्पादिता श्रीबाबूलाल-जैन-द्वारा प्रकाशिता, 'खण्डेल-हाउस, कल्याण जी का रास्ता, चाँदपोल-बाजार, जयपुर' इत्य् अतः कल्याणी-नामिका मासिकी पत्रिका प्रकाश्यते। संस्कृत-भाषाया मासिक-पत्राणां सैषा महती संख्या संस्कृताऽनुरागिणां मनसि खल्व् आशां सञ्चारयति।

एभ्यो मासिक-पत्रेभ्योऽतिरिक्तं संस्कृत-सभायाः पुण्यपुर-स्थाया भारतवाणी इत्याख्या पाक्षिकी पत्रिकाऽपि प्रादुर्भवति। अस्याः पत्रिकायाः प्रधान-सम्पादको डा० व० ग० राहूरकर-महाभागस् तथा कार्यकारि-सम्पादकः प्राध्यापको डा० ग० श्रीवारे वेदान्तशास्त्री वर्तते। अस्याः पत्रिकायाः सम्पादक-मण्डले प्रा० वि० भा० देव-महाशयः, डा० म० त्र्यं० सहस्रबुद्धे, डा० व० यं० झांबरे, डा० श्री ग० बा० पलसुले इत्य् एते महानुभावाः सदस्या विद्यन्ते। अयोध्या-पुरीतः संस्कृतसाकेतः इत्याख्यं पाक्षिकं पत्रं प्रादुर्भवद् आस्ते।

संस्कृतम् नाम साप्ताहिकं पत्रं 'संस्कृत-कार्यालयः अयोध्या' इत्य् अतः प्रचरति। 'संस्कृत-प्रचारिणी सभा, नागपुर' इत्य् अतः संस्कृतभवितव्यम् इत्याख्यं साप्ताहिकं पत्रम् आविर्भवति।

अथ संस्कृतस्य दैनिकं पत्रं केवलम् एकम् एव संस्कृतिः इत्याख्यं वर्तते। तद् इदं पत्रं श्रीमद्बालाचार्य-वरखेडकर-महाभागानां सम्पादकत्वे, डेक्कन कॉलेज, पूना–६ इत्य् अस्मात् स्थानात् प्राकाश्यं याति।

अथ चैताभ्यः पत्रिकाभ्योऽतिरिक्ता अपि प्रकाश्यमानाः स्युर् इति सम्भवति, परम् अपरिचितत्वात् तन्-नामादीनाम् अत्रोल्लेखम् अकुर्वाणोऽयं जनः स्वस्याऽज्ञानाय तत्-तत्-सम्पादक-बन्धून् सप्रश्रयं क्षमां याचमानोऽस्ति।

एतासां सर्वासाम् उपर्युक्तानां संस्कृत-पत्र-पत्रिकाणाम् अस्तित्वं तावत् संस्कृत-पत्रकारितायाः सजीवं प्रत्यक्षं च प्रमाणम् आस्ते। धन्यास् ते महामनसो विद्वज्जना ये प्रतिकूलेऽपि देशे काले भूयांसि कष्टानि क्लेशांश्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च विषह्य कथम् अपि पत्राणि नानाविधानि सम्पाद्य, प्रकाश्य च विदेशीयैः स्वदेशीयैश् च कृतं 'संस्कृत-भाषा मृत-भाषा' इति परीवादम् अपोह्य सुर-भारतीं जीवन्तीं प्रमाणयन्तः संस्कृत-पत्रकारितायाः प्ररोहाऽङ्कुरं संरक्षयन्ति ।

एतद् अपि मन्तव्यं भवेद् यत् सैवा पत्रकारिता संस्कृत-भाषायाः सद्योऽङ्कुरिता स्वशैशव-काल एव वर्तमानाऽस्तीति। यतोऽस्मिन् युगे 'पत्रकारिता'-शब्दात् पुरुषार्थो राष्ट्र-सेवा, मानव-सेवा, समाज-सेवा, ज्ञान-विज्ञानोपासना, साहित्य-सेवा इत्यादयो ये येऽर्थाः परिगृह्यन्ते ते सर्वेऽधुनाऽवधि संस्कृत-पत्रकारितोद्योग गम्भीरया, व्यापकया, परमार्थया च दृष्ट्या नैवाऽन्तर्भूता भवन्तीति स्वीकरणम् उचितं स्यात्। पत्रकारिता नाम न केवलं पत्राणां सम्पादन-मात्रम् एव। केवलं पत्र-सम्पादनं साहित्य-सेवा, समाज-सेवा किं वा विद्याकलानाम् आराधन-मात्रम् एव भवितुम् अर्हति। वस्तुतः पत्रकारिताया नाना हेतवो, बहूनि प्रयोजनानि, अनेकान्य् उद्देश्यानि च वर्तन्ते। अतो नाऽत्र केवलं केषांचन साहित्यिकानां समाज-सङ्घटनाय वा प्रवृत्तानां पत्राणां सम्पादन-मात्रम् एव पत्रकारिता मन्तव्या, अपि तु पत्रकारितायाः सुविस्तृतो व्यापकोऽर्थो ग्रहीतव्यः। ज्ञान-विज्ञान-भासुरेऽति-व्यापके विशालेऽपि संस्कृत-साहित्ये न पत्रकार-पथ-प्रदर्शनोपयुक्ता काऽपि 'पत्रकार-संहिता' समुपलभ्यते। सत्यम् एव हि पत्रकारित्वं नाम विकासं भजमानस्याऽस्य विश्वस्य किम् अपि नवीनम् ऐदंयुगीनं तत्त्वं, नवीना विद्या, नवं विज्ञानं, नवा कला, नूतनं शिल्पं, नवीनं शास्त्रं, नव्या सेवा-प्रणाली वर्तते। ततोऽत्र वयं पत्रकारिताया व्यापकम् अर्थं हृदयं गमयितुं कानिचिद् वचनानि समुद्धरामः। तथा हि श्रीकमलापतित्रिपाठी—

'साधकस्य कृते साधनायाः, त्यागिनः कृते त्यागस्य, तपस्विनः कृते कष्ट-सहिष्णुतायाः, अनासक्तस्य कृतेऽनासक्तेर् योद्धुः कृते सङ्घर्षस्य रणस्य च, कवेः कृतेऽनुभूतीनाम् अभिव्यक्तेः, कलाकारस्य कृते संसृतेर् गूढानां रहस्यमयानां च चित्राणां चित्रणस्य, आलोचकस्य कृते जीवनस्य स्थूल-सूक्ष्मधारायाः विवेचनस्य, साहित्यिकस्य कृते लौकिकस्य भावुकस्य च जगतोऽभिव्यक्तेः पन्थानं युगपद् उपस्थापयितुं पत्रकारिताया ऋते को नु खलु समर्थोऽस्ति ?

'ज्ञानस्य, विज्ञानस्य, दर्शनस्य, साहित्यस्य, कलायाः, शिल्पस्य,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजनीतेर् अर्थ-नीतेः, समाज-शास्त्रस्येतिहासस्य, सङ्घर्षस्य, क्रान्तेः, उत्थानस्य, पतनस्य, निर्माणस्य, विनाशस्य, प्रगतेर् दुर्गतेः, किञ् च, लघु-महतां सर्वेषां मानव-जीवनस्य प्रवाहाणां प्रतिबिम्बाऽऽपादने पत्रकारितेव कोऽन्यः सफलो भवितुम् अर्हति ? जीवनस्य, समाजस्य, संस्कृतेर् विश्वस्य चोत्कृष्ट-दर्पणत्व-साधने पत्रकार-कला-सदृशम् अद्यत्वेऽन्यत् किम् आस्ते ?

'अन्यायस्य प्रतिरोध-करणे, नव-विचाराणां कल्पनानां च वाहनत्वे, नव-रचनायाः सन्देशस्याऽग्र-दूतत्वे तथाऽन्ततो जीवन-सागरे प्रोत्तिष्ठमानाम् उल्लोल-कल्लोल-हिल्लोलानां, विप्लवोपप्लवानां च प्रतिनिधित्वोपढौकने ननु पत्रकार-कलायाः सजीव-प्रतिमा-रूपाण्य् अधुनातनानि पत्राणीव नाऽन्यत् किम् अपि साधनान्तरं विद्यते' इति ।

अथ दार्शनिको विद्वान् नहि पत्रकारो वक्तुं युज्यते, कामं स शास्त्रज्ञो वा चिन्तको वा भवतु । कविः पत्रकारो न भवितुम् अर्हति, यतस् तस्य गतिर् भाव-साम्राज्ये स्वच्छन्दतया विहरणे भवति । लेखकोऽपि पत्रकारो न भवति, यतस् तस्य कर्म-क्षेत्रं लेखादि-रचना-पर्यन्तं परिसीमितं भवति । ग्रन्थकारः पत्रकारो न भवति, यस्मात् तस्य ग्रन्थ-प्रणयनम् एव कार्यम् अस्ति । साहित्यिक-पत्र-पत्रिकाणां सम्पादकः पत्रकारो नोच्यते, स खलु सम्पादको वा साहित्यकारो वा केवलं स्यात् । एवम् एवाऽभिनेता, नाट्यकारः, संगीतज्ञश् चित्रकारोऽपि पत्रकारो भवितुं नाऽर्हति । परन्त्व् एतेषां सर्वेषाम् एव गुणानाम् एकत्र हृदि धारको बहुश्रुतो राजनीतिज्ञो नेतृत्व-गुण-सम्पन्नो जागरूको जगद्-गति-व्यापारान् निगुणं जानानो घटनान्तराणां ज्ञाता, संसारस्य सर्वाण्य् अपि परिवर्तनानि च विद्वान् नानाविद्यासु कला-कलापेषु च व्युत्पन्नो भवति पत्रकारः । सेयं पत्रकारिता किम् अपि विचित्रम् एव प्रतिभानवत्त्वम् अपेक्षते ।

सैषा पत्रकारिता स्वात्मनि परश्शतान् समुत्कर्षान् धत्ते । मुख्यतः पत्रकारो मानवतायाः, समाजस्य, राष्ट्रस्य, साहित्यस्य, विद्यायाः, कलानां, ज्ञानस्य, विज्ञानस्य, शिक्षायाः, संस्कृतेः, सभ्यतायाः, नैतिकतायाः, धर्मस्य चोन्नायकोऽपि सन् विनम्रो मूक-सेवको भवति । स मर्यादाम् अनुपालयन्न् अपि सर्वतन्त्र-स्वतन्त्रं चेष्टते । क्रान्त-दर्शी चाऽपि स्वाधीन-दृशा पश्यति विश्व-प्रपञ्चं निखिलम् । क्रान्तिकरोऽपि स प्रशान्तचेता धैर्य-धनो, भावुकोऽपि यथार्थवादी कर्तव्य-निष्ठुरो भवति पत्रकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्रकारः स्वकार्योपयोगिनां तत्त्वानां सपदि सारं सङ्गृह्णीते। स खलु मानसिकीं सतर्कतां, समयानुसारिणीं वृत्तिं, सूक्ष्मां निरीक्षण-शक्तिं, बुद्धि-प्रभावाद् घटनाऽन्तराणाम् अन्तस्तत्त्वज्ञतां, सहन-शीलतां, साहस-प्रियतां, सावधानतां, निष्पक्षतां, मौलिकतां, कल्पना-प्रवणतां, निर्लिप्ततां, निर्भीकतां च दधानो भवति। पत्रकारस्य सर्व-श्रेष्ठो गुणो जगज्-जीवनं प्रति संवेदन-शीलता विद्यते।

संसारेऽस्मिन् तादृशो नाऽस्ति कोऽपि विषयः, नाऽस्ति कोऽपि प्रश्नः, नाऽस्ति काऽपि समस्या या पत्रकारस्य कर्म-क्षेत्र-सीमायां नाऽन्तर् भवति। समयाऽनुरोधात् परिस्थित्यनुसारं पत्रकारो जन-हिताय वाक्कीलत्वं, नेतृत्वं, शिक्षकत्वं, दार्शनिकतां, साहित्यिकतां, भाष्यकारत्वं, शास्त्रज्ञताम् आलोचकतां, राजनीतिज्ञतां कलाकारत्वं सर्वम् अपि चाऽङ्गीकुरुते। एवं कुर्वाणोऽपि पत्रकारोऽन्ततः सर्वथा कूटस्थो मौलिकश् च भवति। स खल्व् आन्दोलयन्न् अपि जन-मनोवृत्तीः स्वयं निष्पन्दोऽविचल-वृत्तिः स्थित-प्रज्ञताम् आत्मनो दर्शयति।

निवेदनस्याऽयम् आशयो यत् पत्रकारो नाम कश्चन विलक्षणो विचित्रश् च व्यक्ति-विशेषो भवति। पत्रकारस्य व्यक्तित्वं किम् अप्य् अन्या-दृशम् एव वर्तते। पत्रकारिता हीयं स्वात्म-संयमं, स्वात्म-शिक्षणं, स्वात्मा-नुशासनं, स्वात्मविकाश-चेष्टां, प्रबलां काम् अपि महत्त्वाकाङ्क्षां, सेवा-भावं चाऽपेक्षते।

एवं तदेतत् सर्वं मनसि सम्प्रधार्याऽऽदौ ततो यदि संस्कृतज्ञानाम् अस्माकं ज्ञान-विज्ञान-निधेः पुरातन-साहित्यस्य पुनर् उज्जीवनं, संरक्षणं, तत्प्रचारादिकम् आवश्यकं, यदि च संस्कृत-भाषायां नव-साहित्य-सृष्टिर् जायमानाऽपेक्ष्यते, यदि संस्कृत-समाजस्य नव-युगाऽपेक्षि दृढतरं सङ्घटनम् अभिलष्यते, यदि वयं ताम् इमां प्राचीनाम् अपि संस्कृत-भाषां स-प्राणां स्वस्थं जीवन्तीं युगधर्माऽनुष्ठानायोपयोगिनीं विधातुम् इच्छामो, यदि च भारत-राष्ट्रेऽधुना सम्पाद्यमाने नव-निर्माणे संस्कृतस्य काम् अपि तात्त्विकं व्यवहारं सदुपयोगं च समर्थयामहे, यदि च वर्तमान-विश्वस्य ज्ञान-विज्ञान-कलादीनां तच्छिल्प-गतानि तत्त्वानि संस्कृत-भाषाया माध्यमेन संस्कृत-समाजस्य सदस्येभ्यो वितरीतुम् इच्छामः, यदि चाऽत्र देशे प्रजातन्त्रात्मि-कायां शासन-पद्धतौ प्रवर्तमानायां संस्कृतज्ञानां बहु-मतापादन-पूर्वकम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधिकार-संरक्षणं कामयामहे, यदि च संस्कृतं विदुषां विज्ञान-क्षेत्रे, राजनीत्यां, प्रशासने, राष्ट्रिय-जीवनस्य नाना-क्षेत्रेषु च क्रियात्मकं योग-दानं वाञ्छामः, यदि संस्कृत-सेवि-जनानाम् उत्कर्षमयं जीवनम् अधिकार-भुक्तिं च निर्विघ्नाम् इच्छामः, यदि च वयं संस्कृतज्ञाः स्व-विद्या-वैभवेन, ज्ञान-प्रकाशेनाऽनुभवेन च विश्व-मानवेभ्यो देश-बन्धुभ्यश् च संस्कृत-वाङ्मय-द्वाराऽऽध्यात्मिकीम् आधिदैविकीम् आधिभौतिकीञ् च सेवां समर्पयितुम् अभिलषामः, यदि संस्कृत-गिरां संस्कृत-साहित्यस्य कम् अपि दिव्यं सन्देशं विश्व-शान्तये श्रावयितुम् उद्युञ्ज्महे, यदि महर्षि-जन-सभ्यताया आर्य-संस्कृतेः सनातन-वर्णाश्रम-धर्मस्य च संरक्षणं, संवर्द्धनं, प्रचारं वा वयं स्व-कर्तव्यं मन्यामहे, यदि चाऽत्र राष्ट्रेऽस्माकं भारते सदाचारस्य, त्यागस्य, शौर्यस्य च महिमानं प्रसारयितुं धर्मतो न्यायतो वाऽऽत्मीयं कर्तव्यम् आवश्यकं विद्मः, तर्हि अवश्यम् एवाऽस्माभिर् युग-धर्म-धारा-प्रवाहानुसारं संस्कृत-पत्रकारिताया माध्यमेन स्व-नीत्या, सङ्घटनेन, स्व-पद्धत्या, स्वदृष्टि-कोणेन च सर्वतन्त्र-स्वतन्त्रम् अपि समर्यादं प्रवर्तितव्यम् एवेति सर्वथा समयोचितम्। राष्ट्रात्मा सोऽस्मान् कर्मण्य् अत्र प्रवर्तनार्थम् आह्वयति, प्रेरयति, प्रोत्साहयति च सर्वतः सर्वभावेन।

अथ स्वीकृतेऽपि संस्कृत-पत्रकारिताया विकाश-सिद्धान्तेऽत्यावश्यकेऽधुना सर्वाऽऽदौ किं कर्तव्यम् इति प्रश्नोऽतीव स्वाभाविकः। अतोऽत्र संक्षेपतः किम् अपि प्रस्तूयते—

सर्वादौ स-विधि-विधानं संस्कृत-पत्रकार-सङ्घः संस्थापनीयो यस्य कार्य-कारिण्यां समितौ, वर्तमान-समये ये संस्कृत-पत्र-पत्रिकाणां सम्पादका ये संस्कृत-संस्था-प्रतिष्ठानादीनां सङ्घटनानां सञ्चालकाश् च ते सर्वे प्राथमिकतया सदस्यत्वेन ग्रहीतव्याः।

स एष संस्कृत-पत्रकार-सङ्घः संस्कृत-पत्रकार-कलाया विकाशाय चेष्टताम्। चेष्टाया अस्याः प्रतीक-रूपं न्यूनान् न्यूनं पत्र-द्वयं सम्पाद्यतां, दैनिकं समाचार-पत्रम्, साहित्यिकी मासिक-पत्रिका चेति। दैनिक-संवाद-पत्र-द्वारा स्फूर्ति-स्फारं संस्कृत-समाजस्य सङ्घटनं संस्कृत-पत्रकारिता-स्वरूपं च सुस्पष्टम् आविर्भवितुम् अर्हति। मासिक-पत्रेण साहित्योन्नतिः संसाध्यताम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्तुतो दैनिक-पत्रस्य सम्पादनं, प्रकाशनं, तत्-प्रचारणम् एव हि तद्-रचना-शिल्प-गत-तन्त्र-सूत्रानुरोधाद् अतीव जटिलं कठिनं, बहुधन-सहयोगात् कठोर-श्रम-साध्यम् इति सर्वादौ सम्प्रधार्यं भवति। दैनिकस्य पत्रस्य सम्पादने, प्रकाशने, सञ्चालने च विविध-विषयाणां विशेषज्ञाः पृथक् पृथक् स्तम्भानां सम्पादकाः, समाचार-सङ्ग्रहीतारः, पत्र-प्रतिनिधयो विशेष-संवाद-दातारश् च नियोज्या भवन्ति। कर्मण्य् अत्र दैनिक-पत्र-सम्पादन-रूपे प्रचुर-द्रव्य-विनियोगः कर्तव्यः स्याद् इति न विस्मरणीयम्। प्रधान-सम्पादकस् तावद् अतीव सुयोग्यो विद्वान् कर्मठस् तत्-तद्-गुण-गम्भीरो धीरः श्रम-जीवी भवेद्, यः स्वयं स्व-कार्य-कलापान् सुचारु सम्पादयन्न् अपि स्व-सहयोगिनां मार्ग-दर्शनं विदध्यात्। प्रधान-सम्पादकः कुलपतिर् इव पत्रस्य सर्वासां प्रवृत्तीनां द्रष्टा परिपोषको रक्षकश् च भवति। ततः प्रधान-सम्पादकेन दैनिक-पत्र-सम्पादने सह-सम्पादका उपसम्पादकाः स्तम्भ-सम्पादकाश् च नियोक्तव्या भवन्ति। एवम् एव पत्रस्य स्थायिनो लेखकाः, विशिष्टा लेखकाः, कवयः, समालोचकाश् चित्रकारादयो न केवलं धनेनैव, किं तर्हि ? प्रीत्या, स्नेहेन, सम्मानेन, मार्ग-निदर्शनेन, प्रोत्साहनेन, प्रेरणया सप्रश्रयं सविश्वासं च पोषणीयाः स्युः। एतत् सर्वम् आदौ विचार्य ततः 'स्वल्पारम्भः क्षेमकरः' इति नीतिम् आदौ निर्धार्य प्रवर्त्तितव्यम्।

दैनिक-पत्रस्य प्रकाशन-विभागः, प्रबन्ध-सम्पादन-विभागश् च पृथग् भवितुम् अर्हतः। यावत् स्वाधीनो मुद्रणालयो न भवेत् तावद् दैनिक-पत्रस्य प्रकाशनं न निर्बाधं भवितुम् अर्हतीति सर्वेषाम् एव संस्कृत-पत्र-सम्पादक-धुरीणानाम् अनुभवः। धनाऽनुदानं स्वीकुर्वाणाऽपि सैषा संस्कृत-पत्रकारिता स्वावलम्बिनी भवेद् इति लक्ष्यं भवेत्।

दैनिकं वा मासिकं वा संस्कृत-पत्रं तावत् पर्यन्तं चिरायुः स्वस्थं स्व-जीवन-क्रमे विकाश-शीलं, जन-प्रियं च भवितुं न शक्नोति यावत् स्वाधीनो मुद्रणालयो ग्राहकाणां भूयसी संख्या, सहयोग-तत्परा लेखकाः, श्रम-शीलाः सम्पादकस्य सहायकाः कार्य-कर्तारो न स्युः। त एते सर्वे प्रचुरं पारिश्रमिक-धनं दत्त्वा परिपोषणीया एव। एवं कृते संस्कृतस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दैनिकं पत्रम् एकं संस्कृत-पत्रकार-सङ्घस्य मुख-पत्र-रूपं प्रचलेत् तदैव सङ्घस्याऽस्तित्वं स्वोपयोगात् सफलं सिद्धयेत् ।

अथ दैनिक-पत्रतोऽतिरिक्तं साहित्य-सेवाऽङ्गे संस्कृत-पत्रकार-सङ्घेनैकं मासिक-पत्रम् अपि सम्पाद्यं स्यात् । यद्यप्य् अधुना देशेऽत्राऽस्माकं कानिचित् संस्कृत-भाषायाः पत्राणि मासिकानि, त्रैमासिकानि च प्रकाश्यन्ते, तानि च स्व-स्व-क्षेत्रे संस्कृत-पत्रकारितायाः विकाशम् एव साधयन्ति वर्तन्ते इति शोभनम्, परं तु संस्कृत-पत्रकार-सङ्घ-द्वारा सम्पादितं प्रकाशितं च मासिकं पत्रं किम् अप्य् अन्यादृशम् अत्युच्च-स्तरीयं रमणीयं सद् अन्ताराष्ट्रिय-पत्रकारिता-क्षेत्रेऽपि स्वप्रभावोत्कर्ष-निदर्शकं सचित्रं विचित्रं च भवितुम् अर्हति । तत् पत्रं मुख्यतः साहित्यिकी मासिक-पत्रिका स्यात् । पत्रिकायां तस्यां दार्शनिक-विषयाणां, साहित्यिकानां, समाज-शास्त्र-सम्बन्धिनां, काव्यादि-रचनानां राजनीति-विषयाणां महिलोपयोगि-साहित्यस्य बालोपयोगि-साहित्यस्य, ललित-कलानाम् इत्य् एवं नाना-विषयाणां स्तम्भा भवेयुः । पत्रिकायाम् अस्यां विविध-वर्णानि चित्राणि कलात्मकानि भवितुम् अर्हन्ति । बहूद्देश्यं, बहु-जन-प्रियं, विविध-विषय-विभूषितं, सार्वभौमं प्रचरिष्णु निखिल-भारतीय-संस्कृत-समाजस्य प्रतिनिधि-स्वरूपम् एतत् मास-पत्रं तथा सम्पाद्यं यथा सर्व-वर्गीयाः पाठकाः संस्कृत-भाषायाः संस्कृत-साहित्यस्य च परिचयम् अधिकाधिकम् आप्नुवन्तो मोदेरन् । एवं बहु-जन-भोग्यां मासिकीम् उत्तमोत्तमां साहित्यिकीं पत्रिकां प्रकाश्य संस्कृत-पत्रकार-सङ्घः सुर-भारत्याः सेवां प्रचारम् अभ्युदयं च साधयितुं सयत्नः स्यात् तदा संस्कृत-पत्रकारितायाः विकाशोऽभीष्टां संसिद्धिं लभेत ।

यथाऽस्माभिः प्राग् एवोक्तं यत् संस्कृत-भाषायाः पत्रकारिता-विकाशः स्वावलम्बन-निर्भरो भवितुम् अर्हतीति । तत् पुनर् अत्र स्मरणार्हं यत् पत्रकारिता नाम बहु-धन-साध्या नाना-भौतिक-साधनान्य् अपेक्षते । तत आदौ धन-विनियोग-सम्बन्धीन्य् उपायाऽन्तराण्य् अवश्यम् एव चिन्तनीयानि भवन्ति । स एव पत्रकारितायाः शिल्प-तन्त्र-गतो भौतिक-पक्षो नोपेक्षणीयः । वस्तुतोऽत्र श्रेयान् पन्थास् त्व् अयम् एवाऽस्ति यत् संस्कृत-पत्राणि लोक-जीवने तथाऽऽवश्यकानि दैनिक-जीवने जनानाम् अङ्गी-भूतानि भवितुम् अर्हन्ति यथा तेषां पाठक-संख्या ग्राहक-संख्या च प्रभूता भूयसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्याद् यया धनाप्तिर् व्ययश् च तद्योग-क्षेमम् आवहन्तौ समानौ स्याताम्। लाभांशोऽधिको भवितुम् अर्हति, येन पत्रकार-सङ्घः स्थायि-कोशं संस्थापयितुम् प्रभवेत्। यदा संस्कृत-पत्राणि महत्त्व-पूर्णैस् तैस तैर् बाह्याऽभ्यन्तर-गुणैः सम्पन्नानि ग्राहकाणां मनोहराणि, चारूणि, समाकर्षकाणि च भविष्यन्ति तदैव तेषां सञ्चारो भूयान् ग्राहक-संख्या च साधीयसी सम्भाव्यते।

सत्य् अप्य् एवं संस्कृत-पत्रकार-सङ्घः प्रारम्भिक्यां स्थितौ पञ्च-वर्षाणि यावद् भारत-राष्ट्रे वर्तमानेभ्यः संस्कृत-प्रणयिभ्यो धनिकेभ्यो विश्वविद्यालयेभ्यः संस्कृत-संस्था-प्रतिष्ठानेभ्यः सभा-सम्मेलनादि-संस्कृत-सङ्घटनेभ्यः सर्व-प्रदेशीय-साहित्यिकीभ्यः संस्थाभ्यो व्यापारिक-संस्थानां दान-वीरेभ्यः केन्द्रिय-शासनात् प्रान्तीय-राज्य-शासनेभ्योऽन्येभ्यो वा स्रोतोभ्यो धन-साहाय्यम् अर्जयितुं प्रयतेत, तद् अप्य् आवश्यकम्। श्रेयस्करे कर्मणि कस्माद् अपि धन-साहाय्यादानं नाम न दोषकरं, परन्त्व् अत्रेदं सुनिश्चयाज् ज्ञातव्यम् यत् परमुखापेक्षिणां सङ्घटनानां वर्ग-प्रधानतया सक्रियेऽस्मिन् प्रजातन्त्रात्मके भौतिक-सङ्घर्षयुगे प्राग् इव लोकानां धर्म-भावनयैव संस्कृतम् स्व-जीवनं परिपालयेद् इति न सम्भवति, न च तद् वाञ्छनीयम् अपि। विशेषतः पत्रकारितायाः क्षेत्रे तु भिक्षा-वृत्तिः सर्वथा परिहार्या भवेत् पत्रकारैः। परोपजीविनाम् अन्येषां कृपया संरक्षितानां पत्राणां जीवनं कियद् इति प्राग् एव दृष्टम् अस्माभिः। ततो यथा संस्कृत-पत्रिकेयं सर्व-समन्वय-प्रधानाऽपि च सर्व-तन्त्र स्वतन्त्रा, विशेषतोऽर्थ-तन्त्रे स्वाधीना चिरञ्जीविनी भवेत् तथा प्रयतितव्यं भवति।

एवं तदैव सम्पद्येत यदा संस्कृत-पत्रकाराः पाठकान् एवादौ साधन-भूतान् मत्वा तान् प्रति सचेष्टा भवेयुः। सर्वसाधारणो भारतीयो यः कोऽपि भारतीयेतरो वा विश्व-नागरिकः संस्कृतस्य दैनिक-मासिक-पत्राणां गुणाकर्षणाद् एव तद्-ग्राहकत्वं परिपालयन् मोमुद्येत, तदैव स्वस्थं विकाशम् आश्रयेयुः संस्कृत-पत्राणि।

अथ पत्रकार-सङ्घस्य भाषा-माध्यमं तु संस्कृत-भाषैव स्याद् इति तु सर्वानुमोदितम् इव स्वतः सिद्धम् इवाऽऽस्ते, तथाऽपि भाषा-नीतिः सुस्पष्टा भवितुम् अर्हति। विषयानुसारिणी संस्कृत-भाषा सरला वा प्रौढा वा भवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एव, लेखकानां व्यक्तित्वानुरूपा शैली चाऽपि भवत्य् एव, तथाऽपि पत्रकार-सङ्घस्य दैनिक-पत्रस्य भाषा शैली च हिन्दी-समाचार-पत्राणाम् इव सरलाऽतिसरला, व्यावहारिकी, सर्वसाधारणस्य कृते सुबोधा तथ्य-पूर्णा च भवेद् इति परमावश्यकम्। दैनिक-पत्रस्य संस्कृत-भाषा तथाविधा स्वीकर्तव्या स्याद् यथा दैनिक-हिन्दुस्तान-पत्रस्य स्तम्भेषु प्रयुक्ता हिन्दी-भाषा संस्कृत-व्याकरणस्य विभक्ति-क्रिया-पदादिभिः कारक-चिह्नैः संस्कृत्य संस्कृती-कृता स्यात्। इत्थंविधया बहु-जन-भोग्यया सर्व-सामान्यैर् भारतीयैर् अन्यैर् वा साक्षरैर् व्यवहार्यया सरल-सुबोधया संस्कृत-भाषया दैनिक-पत्राणां सञ्चारः प्रचारो लोक-हृदये प्रतिष्ठा, ग्राहकेषु प्रीतिर् उपयोगितो-पादेयता च स्वाभाविकेन प्रकारेण संसिद्धयेद् एव।

मासिक-पत्रेषु तत्-तत्-स्तम्भानुरूपं विषयानुसारिणी दार्शनिकी, साहित्यिकी, शास्त्रार्थ-परिष्कार-प्रौढा, धार्मिकी वा सर्वविधा संस्कृत-भाषा व्यवहरणीया भवेद् यथेष्टम्। तत्र पाण्डित्य-प्रदर्शनस्य, कलकलाऽऽ-लापानां, तर्क-कर्कशानां विचाराणां, गम्भीर-विषय-विमर्शानां, शैली-चमत्काराणाम् अलङ्कार-विधानानां च भूयान् अवकाशो भवेद्, येन भारत-वर्ष-देशोऽसौ स्व-जगद्-गुरुत्वस्य मञ्जु-मुद्रां सर्व-भाषा-विदां हृदि समुट्टङ्कयितुं प्रभवेत्। मास-पत्रेष्व् अपि बाल-महिलोपयोगिषु स्तम्भेषु कोमल-कान्त-पदावली मधुरा ललित-पद-विन्यासाऽनायास-सुबोधा सरला सरसा च भव्या भद्रा भावुक-जन-मनोहरा संस्कृत-भाषा भवतु।

सति सामर्थ्ये संस्कृत-पत्रकार-सङ्घेन केचनाऽत्र विषये रुचिम् आदधानाः सम्पादका वा सम्पादन-कला-शिक्षाम् आकाङ्क्षमाणाः स्वकीया जनाः पत्रकारत्वस्य शिक्षा-प्रदानार्थं देशे क्वचिन् महति पत्र-कार्यालये सम्प्रेष्य प्रशिक्षणीयाः। यतः पत्राणां प्रकाशन-शिल्प-गतं तन्त्रम् अतीव जटिलं भवति। तज्ज्ञानं प्रायोगिकीं प्रत्यक्षानुभव-कौशल-संस्फीतां रचना-त्मिकां शिक्षाम् अपेक्षते नाम नूनम्। साक्षात्कृतेनाऽनुभवेन क्रियात्मकेन विना वर्ष-शतैर् अपि न कोऽपि बहु-सूत्र-प्रथितम् एतत् पत्र-प्रकाशन-शिल्प-तन्त्रं बोद्धुं सक्षमो भवति।

क्रमशो विकाशम् आसादयन् संस्कृत-पत्रकार-सङ्घो भारतस्य सर्वाण्य्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपि संस्कृत-पत्राणि स्वनीत्या प्रभावयेत् । न केवलं नीति-निर्देशैः परामर्श-दानैः प्रस्तावैर् वा स्वशक्त्या प्रादुर्भवन्ति संस्कृत-पत्राणि प्रभावयितुं प्रभवेत् संस्कृत-पत्रकार-सङ्घोऽपि तु तेषां हित-चिन्तनं प्रेयः श्रेयश् च संरक्षेद् धन-जन-साहाय्य-प्रदानैः । कृते किलैवं पत्रकार-सङ्घः सर्व-संस्कृत-पत्राणां प्रातिनिध्यं कर्तुं समर्थः स्यात् ।

स एष संस्कृत-पत्रकार-सङ्घोऽन्यान्य-भाषाणां पत्रकार-सङ्घैः सम्पादकैर् वरिष्ठैर् लेखकैः साहित्य-सेविभिर् ग्रन्थकारैः कविभिश् च सम्पर्कं संसाधयेत् । अखिल-भारतीय-पत्रकार-सङ्घः प्रादेशिक-भाषाणां सङ्घेषु स्व-प्रतिनिधीन् सम्प्रेष्य स्वास्तित्वं सजीवं प्रमाणयेत् स्व-प्रतिपत्तिं प्रतिष्ठाम् उपयोगं च विवर्द्धयेद् । एतद् अतीवाऽऽवश्यकम् ।

पत्रकार-सङ्घोऽसौ संस्कृत-पत्रकाराणां कृते सन्दर्भ-ग्रन्थान्, निर्देश-पुस्तिकाः (Directories), संस्कृत-पत्रकार-संहिताः, संस्कृत-पत्रकारिताया इतिहास-ग्रन्थान्, संस्कृत-पत्र-सम्पादकानां जीवन-चरितानि, संस्कृत-संस्थानम् इतिहास-ग्रन्थांश् च लेखयेद्, यैर् भाविनां संस्कृत-पत्रकाराणां मार्ग-दर्शनं प्रोत्साहनं च सम्भवेत् ।

एवं नानोपायैः सङ्घटन-प्रधानैर् वयम् इदानीम् एव संस्कृत-पत्रकारिताया विकाशाय सामूहिक-रूपेण सोत्साहं प्रबलं पुरुषार्थम् आचरेम तदाऽवश्यम् एव साफल्यम् उपलभेमहि । कस्याश् चिद् अपि भाषायाः, साहित्यस्य, सभ्यतायाः, संस्कृतेश् च विकाशो दीर्घ-कालीनं प्रयत्नम् अपेक्षते । सौभाग्याद् अधुना संस्कृत-भाषायाः पत्रकारिता-क्षेत्रं कैश्चित् तपस्विभिः कर्मठैः सिद्धासनैः सिद्ध-लेखनीकैः सम्पादकाचार्यैः सुपरिष्कृतम् अस्माकं पुरतो विद्यमानम् अस्ति । तस्मिन्न् अस्माभिः समयानुरोधात् सङ्घ-बद्धैर् अपि न प्रारम्भ-शूरैर् न च दीर्घ-सूत्रैः सद्भिर् शुभोदर्काणि बीजानि निक्षेप्तव्यानि, रक्षणीयानि, संवर्द्धनीयानि चेत्य् एतावद् दिङ्मात्रं निवेद्य विरम्यते विस्तरात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

•

होलिकाष्टकम्

ब्रह्मदत्तः*

द्रढयति सम्यग् गात्रं, छात्रं कुरुते गुणैस्तथा क्षात्रम् ।
दात्रं शिष्टगुणानां, श्रद्धापात्रं तदपि 'होली' ॥१॥

कपिलं पिङ्गलकं वा, बभ्रु वा किंशुकाश्लिष्टं पिष्टम् ।
कुङ्कुमपाटलकं वा, धातकीकमलकिञ्जल्कवत् ॥२॥

सर्षपपीतं चित्रं, गोधूमसौवर्णं वपुर्दधती ।
पुष्पैरञ्जितमञ्चा, प्रकृतिनटी सुरोचतेतराम् ॥३॥

सुरभिमनोज्ञामोदा, सुमनोहरसुमनोनुदितमनोजा ।
उपहरति मनोजाय, रतिमति वितती करोतीव ॥४॥

रक्तं यदि वा पीतं, हरितं नीलं च जम्बुफलसदृशम् ।
नारङ्गं कृष्णं वा, 'कोलतार'-पूर्णं वाऽपि मेचकम् ॥५॥

एते रञ्जयन्ति वै, परस्परं क्रीडन्ति मोदकामाः ।
रङ्गैश्चित्रितगात्राः, लोकाः प्रकृतिमनुकुर्वन्ति ॥६॥

रक्तमबीरगुलालम्, पाटलकालक्तकमनःशिलाऽऽलम् ।
कालं वाऽपि करालं, कियच्छोभते रङ्गजालम् ॥७॥

सकलं लुनातु विकलं, तनोतु नतिं सुनोतु सौमनस्यम् ।
चिनोतु साद्गुण्यचयम्, पुनातु 'होलिका' सर्वान्नः ॥८॥

---

*आयुर्वेदालङ्कारः, 'संस्कृतालोक-सम्पादकः, ए ४–आयुर्वेदिक-कालोनी, जामनगरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्याय-वैशेषिक-मतयोः श्रुति-स्मृति-स्वरूपम्

टी. एस्. श्रीनिवासशास्त्री*

सर्वाण्य् अपि आस्तिक-दर्शनानि वेदस्य प्रामाण्यम् अभ्युपयन्तीत्य् अत्र विषये न कोऽपि विप्रतिपद्यते। भगवान् कणादः स्वकीय-दर्शनोपक्रमे 'अथातो धर्मं व्याख्यास्यामः'[1] इति धर्म-निरूपणं प्रतिज्ञाय 'यतोऽभ्युदय-निःश्रेयस-सिद्धिः स धर्मः'[2] इत्य् अभ्युदय-निःश्रेयसयोः प्राप्तिर् यस्माद् भवति स धर्म इति धर्म-लक्षणम् अभिधाय 'तद्वचनाद् आम्नायस्य प्रामाण्यम्'[3] इति तृतीयं सूत्रम् आरचयामास। अस्य सूत्रस्यार्थः कः? इति विचारे आपातत एवं प्रतिभाति। तच्छब्दः पूर्व-प्रकृतं अर्थम् अभिधत्ते इत्य् उत्सर्ग-नियमः। द्वितीय-सूत्रे धर्मः प्रस्तुतो वर्तते 'यतोऽभ्युदय-निःश्रेयस-सिद्धिः स धर्मः'[2] इति। अतस् तद्वचनाद् इत्य् अत्र तत्-पदेन पूर्व-प्रकृतो धर्मः परामृश्यते। तस्य=धर्मस्य, वचनात्=प्रतिपादनाद् विधानात्, आम्नायस्य=वेदस्य, प्रामाण्यम् इति सूत्रार्थः संपद्यते। अभ्युदय-निश्रेयस-कारणीभूत-धर्म-विधायकत्वाद् वेदस्य प्रामाण्यम् इत्य् अभिप्रैति भगवान् कणाद इति। बौद्धाद्यागमा अपि अभ्युदय-निःश्रेयस-साधनत्वेन बह्वीः क्रिया अनुष्ठेयतयोपदिशन्ति। अभ्युदय-निःश्रेयस-करो धर्म इति विषये सर्वेषां संप्रतिपत्तिर् वर्तते. बौद्धादि-परिगृहीत-धर्मस्याऽप्य् अभ्युदय-निःश्रेयस-करत्वं यदि सिद्धं भवेत् तदा सर्वेऽपि शिष्टाः तं धर्मम् अनुष्ठेयतया परिगृह्णीयुर् एव। न हि शिष्टा बौद्धाद्यागम-विहिताः क्रिया अनुष्ठेयतया उपाददते। तत्र किं कारणम्? वेद-विहितत्वाऽभावात् ताः क्रिया न धर्म-शब्दाऽभिधेयताम् अर्हन्तीति मन्यन्ते शिष्टाः। अतो वेद-विहितस्यैव धर्मत्वम् अभ्युदय-निःश्रेयस-करत्वं चेत्य् आस्तिका अभ्युपगच्छन्ति। धर्म-

*कोप-विभागः, डेकन्-कॉलेज, पूना–६

१. वैसू०, १,१,१। २. तत्रैव, १,१,२। ३. तत्रैव, १,१,३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बोधकत्वेन यदि वेदस्य प्रामाण्यम् अङ्गीक्रियते तदा प्रमाण-भूत-वेद-विहितत्वाद् धर्म-पद-व्यपदेश्य-क्रियाया धर्मत्वम् अभ्युपेयत इत्य् अन्यो-न्याऽऽश्रय-दोषः प्रसज्यते। तथाहि। वेदस्य प्रामाण्यं निश्चित्य प्रमाण-भूत-वेद-विहितत्वात् क्रियाया धर्मत्वं निश्चेतव्यम्। धर्म-पदाऽभिधेय-क्रियायाः धर्मत्वं निर्णीय तादृश-धर्म-बोधकत्वाद् वेदस्य प्रमाणत्वम् अङ्गी-कर्तव्यम् इति स्पष्टः परस्पराश्रय-दोषः। सर्वेऽप्य् आस्तिक-दर्शनकाराः प्रमाण-भूत-वेद-चोदितम् एव धर्मं मन्वत इत्य् अत्र न कोऽपि संदिग्धे। अत एव भगवान् जैमिनिः 'चोदना-लक्षणोऽर्थो धर्मः'[१] इति वेद-प्रमाणकस्याऽर्थस्य धर्मत्वं बोधयामास। तस्मात् सर्वत्र उत्सर्गतस् तच्-शब्दस्य पूर्व-प्रकृत-परामर्शित्वेऽपि 'तद्वचनाद् आम्नायस्य प्रामाण्यम्' इत्य् अत्र विद्यमानस् तच्-शब्दो न पूर्व-प्रकृतं धर्मं परामृशति किं त्व् अप्रकृतम् ईश्वरम् अभिधत्ते। तेन ईश्वरेण आप्तेन, वचनात्=प्रणयनात्, आम्नायस्य=वेदस्य, प्रामाण्यम् इति वैशेषिकोपस्कार-प्रणेतारः श्रीशंकरमिश्रा अस्य सूत्रस्याऽर्थं वर्णयन्ति। प्रशस्तपादाचार्याः स्वकीये काणाद-सिद्धान्त-प्रतिपादके पदार्थ-धर्म-संग्रहे अनुमाने शब्दाऽन्तर्भाव-प्रकरणे 'श्रुति-स्मृति-लक्षणोऽप्याम्नायो वक्तृ-प्रामाण्याऽपेक्षः' इत्य् अभिधाय तद्-उपष्टम्भकतया 'तद्वचनादाम्नायस्य प्रामाण्यम्' इति प्रथमाध्याय-प्रथमाह्निक-तृतीय-सूत्रं, 'लिङ्गाच्चाऽनित्यो बुद्धि-पूर्वा वाक्य-कृतिर्वेदे' इति षष्ठाध्याय-प्रथमाह्निक-प्रथम-सूत्रं, 'बुद्धिपूर्वो ददातिः' इति षष्ठाध्याय-प्रथमाऽऽह्निक-तृतीय-सूत्रं चोदाजह्रुः।

प्रशस्तपाद-भाष्य-व्याख्यायां न्याय-कन्दल्यां श्रीधर-भट्टाऽऽचार्याः पूर्वोक्त-प्रशस्तपाद-भाष्य-वाक्यम् एवम् अवतारयन्ति 'यदि वक्तृ-द्वारेण शब्दः अर्थम् अवबोधयेत् तदा वेद-वाक्याद् अर्थ-प्रतीतिर् नैव घटेत। वेदे वक्तुरभावात्। अत आह श्रुति-स्मृति-लक्षणोऽप्याम्नायः वक्तृप्रामाण्यापेक्षः इति' इति। न केवलं लौकिकं वाक्यं वक्तुः प्रामाण्यम् अपेक्ष्य बोधयति, श्रुति-स्मृति-लक्षणोऽप्य् आम्नायो वक्तुः प्रामाण्यम् अपेक्ष्यैवाऽर्थ-प्रत्यायको भवति। असुरभि-गन्धवच् शब्दस् तु स्वभावतो नैव दुष्टः, अपि तु वक्त्रधीनम् एव दोषं भजति। अत एवाऽभियुक्ता आहुः—

शब्दे करण-वर्णादिदोषा वक्तृनराश्रयाः।
न हि स्वभावतः शब्दो दुष्टोऽसुरभिगन्धवत्॥ इति।

---

१. जैसू०, १,१,२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र पूर्वमीमांसकास् तावद् एवम् आक्षिपन्ति। 'वेदोऽपौरुषेयो नित्यः, तस्य वक्तुर् अभावात्, पुरुषाधीन-दोषाणाम् अनवकाशे सति निराशङ्कं प्रामाण्यं सिध्यति। वेदस्य पुरुष-प्रणीतत्वाऽङ्गीकारे निर्विचिकित्सं प्रामाण्यं न लभ्यते। कदाचित् पुरुषाणां राग-द्वेषादिभिर् अयथार्थस्याऽपि वाक्यस्य दर्शनात्' इति। आक्षेपम् इमं परिहरति भगवान् कणादः 'तद्वचनाद् आम्नायस्य प्रामाण्यम्'[1] इति। अस्मिन् सूत्रे तच्छब्देनाऽनागताऽवेक्षण-न्यायेन 'अस्मद्-बुद्धिभ्यो लिङ्गमृषेः' इति षष्ठाध्याय-प्रथमाह्निक-द्वितीय-सूत्रे प्रतिपादितस्याऽस्मद्-विशिष्टस्य वक्तुः परामर्शः क्रियते। तद्वचनात्=तेन विशिष्टेन पुरुषेण प्रणयनाद् आम्नायस्य=वेदस्य प्रामाण्यम्। वेदस्य वक्त्रधीनो यो दोषः तद्-विरह-निबन्धनम् एव प्रामाण्यं भवितुम् अर्हति, न तु वेदस्य नित्यत्व-प्रयुक्तं प्रामाण्यम्। यतः श्रोत्रेन्द्रियस्य मनसश् च तार्किक-मत-रीत्या नित्यत्वे सत्य् अपि आगन्तुक-दोषैः क्वचिद् अप्रामाण्यम् अनुभूयते। चक्षुरिन्द्रिय-प्रभृतीनां नित्यत्वाऽभावेऽपि तेषां दोष-विरह-निबन्धनं प्रामाण्यम् अनुभूयते। अतो नित्यत्वं न प्रामाण्य-प्रयोजकं भवितुम् अर्हति। आप्ततमे पुरुष-विशेषे ईश्वरे नैव दोषाः संभवन्ति इति वेदस्य ईश्वर-प्रोक्तत्वेन पौरुषेयत्वेऽपि न प्रामाण्यम् अपगच्छति। न हि यथार्थ-द्रष्टा प्रक्षीण-राग-द्वेषः कृपावान् उपदेशाय प्रवृत्तोऽयथार्थम् उपदिशतीति शङ्काम् आरोहति। पुरुष-विशेष ईश्वरो वेदं प्रणिनाय इति कथम् अवगम्यते इत्य् आक्षेपं समादधति श्रीधराचार्याः। तथाहि सर्वे च वर्णाश्रमिणोऽविसंवादेन वेदार्थं परिगृह्णन्ति। वेदस्य येन केनचित् पुरुषेण प्रणीतत्वे बुद्धादि-वाक्यवत्, सर्वे च परीक्षका अविसंवादेन श्रुति-विहितं नैवाऽनुतिष्ठेयुः। कस्यचिद् अप्रामाण्यावबोधेन विसंवाद-प्रतीतिर् अपि उदियात्। यत्र च सर्वेषां संवाद-नियमः, तत् प्रमाणम् एव यथा प्रत्यक्षादिकम्। तथा चेदम् अनुमानं निष्पन्नम्—'वेदः प्रमाणम्, सर्वेषाम् अविसंवादि-ज्ञान-हेतुत्वात् प्रत्यक्षवद्' इति। वेद-विहितेषु दृष्ट-फलकेषु कर्मस्व् अनुष्ठितेष्व् अपि क्वचन फलं नाऽनुभूयते, अतो वेदस्य यथार्थ-बोधकत्वं नाऽस्तीत्य् आक्षेप्तारं प्रतिक्षिपति कन्दली-

---

१. वैसू, १०,२,१;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारः—यथावत् सामग्री-संभवे फलम् अनुभूयते। यत्र दृष्टाऽर्थे कर्मणि अनुष्ठितेऽपि फलं न दृश्यते तत्र सामग्री-त्रैगुण्य-निबन्धनः फलाऽभाव इत्य् एव मन्तव्यम्। अतो 'वेदस्य न कदाप्य् अप्रामाण्यं भवितुम् अर्हति इति। वेदम् ईश्वरः प्रणिनाय इत्य् एतद् असंगतम्। वेदार्थानुष्ठान-कालेऽभियुक्ता अनुष्ठातारो न वेद-कर्तारं स्मरन्ति। यदि कर्ता तत्राऽभविष्यत्, अवश्यम् अनुष्ठातारो वेद-कर्तारम् अस्मरिष्यन्। कर्तुर् अस्मरणाद् वेदस्य कर्ता नाऽस्ति' इति मीमांसकाक्षेपं परिहरति सूत्रकारः कणादः—'लिङ्गाच्चानित्यः[१]। बुद्धिपूर्वा वाक्यकृतिर्वेदे'[२] इति।

'तद्वचनाद् आम्नायस्य प्रामाण्यम्' इत्य् अत्र उक्तम् आम्नाय-पदं प्रकृतत्वाद् इह संबध्यते। लिङ्गाद् आम्नायोऽनित्यो गम्यते इत्यर्थः। लिङ्गम् उपन्यस्यति 'बुद्धिपूर्वा वाक्यकृतिर् वेदे' इति। वेदे यानि वाक्यानि तेषां कृतिर् विरचना बुद्धिपूर्विका वाक्य-रचनात्वाल् लौकिक-वाक्य-रचनावत्। अर्थं बुद्ध्वैव सर्वे वाक्यानि विरचयन्ति। न ह्य् अबुद्ध्वाऽर्थं कोऽपि वाक्यं विरचयति। वेदस्याऽपि स्वर-वर्णाऽनुपूर्वी-विशिष्ट-वाक्यात्मकत्वात् तदर्थं सम्यग् बुद्ध्वा तदर्थ-प्रतिपादक-वाक्य-रचयिता कश्चन आवश्यक इत्य् अत्र नैव संशीति-लेशः। लिङ्गान्तरम् आह सूत्रकारः 'बुद्धिपूर्वो ददातिः'[३] इति। 'स्वर्गकामो गां दद्याद्' इति यद् दानस्य प्रतिपादनं कृतं तद् दानस्येष्ट-साधनत्वं ज्ञात्वैव कर्तुं शक्यते। अतो दानस्येष्ट-साधनता-ज्ञानवान् कश्चन पुरुष-विशेष एव वेदस्य कर्तेति ज्ञायते। तादृश-पुरुष-विशेषः कर्ता कः? इति प्रश्नस्योत्तरं श्रुतिर् एव ददाति—'प्रजापतिर् वा इदम् एक एवाऽऽसीत्। नाऽहर् आसीत् न रात्रिर् आसीत्। स तपोऽतप्यत, तस्मात् तपस्यतः चत्वारो वेदा अजायन्त'। 'तस्मात्तेपानात् (तपस्तप्यमानादित्यर्थः) त्रयो वेदा अजायन्त' इत्यादिना वेदस्येश्वरं कर्तारं बोधयन्ती। ईश्वराद् उत्पन्नो वेदः कथम् ईश्वरं ज्ञापयितुं शक्नुयाद् इति नैव शङ्कनीयम्। यथा वह्नेर् उत्पन्नो धूमो वह्निं ज्ञापयति तथा ईश्वराऽधीनाऽऽत्म-लाभो वेद ईश्वरं ज्ञापयितुं शक्नुयाद् एव। एतेनाऽस्मर्यमाण-कर्तृकत्वाद् वेदो

---

१. वैसू०, २,३,३२; २. वैसू०, ६,१,१। ३. वैसू०, ६,१,३;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नित्य इति मीमांसक-वादः परास्तः। किरणावल्याम् उदयनाचार्या अपि वैशेषिक-सूत्रस्य कन्दलीकारोक्तम् एवाऽऽर्थं द्रढयन्तो वेदस्येश्वर-कर्तृकत्वात् प्रामाण्यं कणादाऽभिमतं प्रत्यपादयन्। किरणावलीकाराणां कन्दलीकाराणां च मते 'अस्मद्बुद्धिभ्यो लिङ्गमृषेः' इति सूत्रस्याऽयम् अर्थः। अर्थं बुद्ध्वा शब्द-विरचनम् इति सर्व-संप्रतिपन्नम्। संपूर्ण-वेदार्थम् आकलयितुं अस्मद्-बुद्धिर् नैव प्रभवति। अतोऽस्मद्-बुद्धिभ्यो विशिष्टा काचन बुद्धिर् अपेक्ष्यते। सैव लिङ्गम् ज्ञापिका ऋषेः=वेद-विरचयितुः परमेश्वरस्य इति। उदयनाचार्य-श्रीधराचार्य-शंकरमिश्र-प्रभृतिभिर् यत् सूत्रार्थ-वर्णनं कृतं तद् नैव कणाद-प्रशस्तपादा-चार्ययोः संमतम् इति मम प्रतिभाति। यतः प्रशस्तपादाचार्या गुण-निरूपणे 'आम्नाय-विधातॄणाम् ऋषीणाम् अतीताऽनागत-वर्तमानेष्व् अतीन्द्रि-येष्व् अर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेष्व् अनुपनिबद्धेषु चाऽऽत्म-मनसोः संयोगाद् धर्म-विशेषाच् च यत् प्रातिभं यथार्थ-निवेदनं ज्ञानम् उत्पद्यते तत् तु प्रस्तारेण देवर्षीणां, कदाचिद् एव लौकिकानां यथा कन्यका ब्रवीति श्वो मे भ्राता आगन्तेति हृदयं मे कथयति' इति आर्ष-ज्ञानं लक्षणतो निरूपयन्ति। इमं ग्रन्थं श्रीधर-भट्टाचार्या एवं व्याख्यान्ति— 'आर्षं व्याचष्टे आम्नाय विधातॄणाम्' इति आम्नायः=वेदः, तस्य विधातारः कर्तारः ये ऋषयः तेषाम् अतीतेष्व् अनागतेषु वर्तमानेषु अतीन्द्रियेष्व् धर्माधर्मदिक्-कालप्रभृतिषु ग्रन्थोपनिबद्धेषु=आगम-प्रति-पादितेष्व् अनुपनिबद्धेषु=आगमाप्रतिपादितेषु च आत्मनसोः संयोगाद् यत्प्रातिभं ज्ञानं यथार्थनिवेदनं यथा-स्वरूपसंवेदनं संशयविपर्ययरहितं ज्ञानम् उत्पद्यते तदार्षम् इत्याचक्षते विद्वांसः। इन्द्रियलिङ्गाद्यभावे यदर्थप्रतिभानं सा प्रतिभा, प्रतिभैव प्रातिभम् इत्युच्यते तत्रभवद्भिः। तस्योत्पत्तिरनुपपन्ना कारणाऽभावाद् इत्यनुयोगे सति इदमुक्तं धर्मविशेषाद् इति। विशिष्यते इति विशेषः, धर्म एव विशेषः धर्मविशेषः, विद्या-तपः-समाधिजः प्रकृष्टो धर्मः, तस्मात्प्रतिभोदयः तत्तु प्रस्तारेण बाहुल्येन देवर्षीणां भवति। कदाचिद् एव लौकिकानामपि। यथा कन्यका ब्रवीति श्वो मे भ्राता आगन्तेति हृदयं मे कथयतीति। न चेदं प्रातिभं ज्ञानं संशयो भवितुम् अर्हति उभयकोटिसंस्पर्शाभावात्। न च प्रातिभं भ्रान्तं भवितुमर्हति संवादात्। अतः प्रमाणम् एव इति।

प्रशस्तपादाचार्याः 'वेदस्य कर्तारः ऋषयः' इति स्पष्टं कथयन्ति। 'तद्वचनादाम्नायस्य प्रामाण्यम्' इति सूत्रेऽपि तत्पदेनाऽऽप्ता ऋषयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परामृश्यन्ते। तैः प्रणयनाद् वेदस्य प्रामाण्यम् इत्य् एव कणाद-संमतः सूत्राऽर्थः। षष्ठाध्याय-प्रथमाऽह्निकस्थस्य 'अस्मद्बुद्धिभ्यो लिङ्गमृषेः' इति सूत्रस्य स्थाने बहुषु प्राचीनेषु कोशेषु 'न चास्मद्बुद्धिभ्यो लिङ्गमृषेः' इत्य् एव सूत्रम् उपलभ्यते। अस्य सूत्रस्याऽयम् अर्थः। अस्मदीय-बुद्धिभ्यो नैव वेदस्य प्रणयनं संभवति। अस्मद्-बुद्धिभ्यो विशिष्टा या बुद्धिः सैव वेद-प्रणयनस्य कारणं भवितुम् अर्हति। तादृशी विशिष्टा बुद्धिः ऋषेः= वेद-प्रणयन-कर्तुः कठ-कौथुम-प्रभृतेः ऋषेः, लिङ्गं ज्ञापिका इति। श्रुतीनां स्मृतीनां चाऽऽप्तैर् ऋषिभिः प्रणीतत्वाद् एव तुल्यं प्रामाण्यम् इत्य् एव कणाद-सिद्धान्तः। अत एव प्रशस्तपादाचार्याः 'श्रुति-स्मृति-लक्षणोऽप्याम्नायो वक्तृप्रामाण्यापेक्षः' इति आम्नाय-पदेन श्रुतिं स्मृतिं चोल्लिख्य तयोर् ऋषि-प्रोक्तत्वेन समं प्रामाण्यं कणाद-संमतं स्पष्टी-चक्रुः। पूर्व-मीमांसका अपि वेदाऽपौरुषेयत्वाऽधिकरणे 'काठकं कौथुमं तैत्तिरीयकम्' इत्यादि-समाख्याः तत्तद्वेद-विषया लोके दृष्टाः। तद्धित-प्रत्ययश् च 'तेन प्रोक्तम्' इत्य् अर्थे वर्तते। तथा च व्यासेन प्रोक्तं वैयासिकं भारतम् इतिवत् कठेन प्रोक्तं काठकं कुथुमेन प्रोक्तं कौथुमम् इति तत्तद्वेद-शाखायाः पुरुष-प्रणीतत्वं प्रतीयते इति पूर्व-पक्षत्वेन वैशेषिक-सिद्धान्तम् एवाऽनुवदन्ति। यद्यपि 'प्रजापतिर्वा इदमेक एव आसीत्, न अहरासीत्, न रात्रिरासीत्, स तपोऽतप्यत तस्मात्तपस्यतः चत्वारो वेदा अजायन्त' 'तस्मात्तेपानात् त्रयो वेदा अजायन्त' इत्यादीनि श्रुति-वाक्यानि तपस् तप्यमानात् प्रजापतेर् वेदानां संभवं स्पष्टं कथयन्ति। एषां श्रुति-वाक्यानां प्रामाण्यम् अङ्गीकुर्वन् कणादो वेदानां कथम् ऋषि-प्रणीतत्वम् अभिदध्यात्। अत उदयानाचार्य-प्रभृतिभिर् ईश्वर-प्रणीतत्वेन वेदस्य प्रामाण्यं कणाद-संमतम् इति यद् अभिहितं तद् एव सम्यग् इति प्रतिभायात्, तथापि, ऋषि-प्रणीतत्वेनैव श्रुतीनां प्रामाण्यम् इत्य् एव वैशेषिक-सिद्धान्त इति त्व् 'आम्नाय-विधातॄणाम् ऋषीणाम्' इत्यादि-प्रशस्तपाद-वचनात् सिद्धयति।

०

श्रुतीनां स्मृतीनां च ऋषि-प्रणीतत्वेन प्रामाण्यम् इति वैशेषिक-पक्षं नाऽनुमन्यते भगवान् अक्षपादः। अक्षपादाचार्य ईश्वर-प्रणीतत्वेनैव वेदस्य प्रामाण्यम् अङ्गीकरोति। तथाहि न्याय-दर्शने 'मन्त्राऽऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युर्वेद-प्रामाण्यवच्च तत्प्रामाण्यम् आप्त-प्रामाण्यात्' इति द्वितीयाध्याय-प्रथमाह्निके एकोन-सप्ततितमं सूत्रं मन्त्रायुर्वेद-प्रामाण्यं दृष्टान्तीकृत्य वेद-प्रामाण्यं साधयति। आयुर्वेदेनेदं कृत्वा इदम् अधिगच्छति इदं वर्जयित्वाऽनिष्टं जहातीति यद् उपदिश्यते तस्याऽनुष्ठीयमानस्याऽविपर्ययोऽनन्यथाभावोऽबाधितफलकत्वम् अनुभूयते। तथा मन्त्र-पदानां विषादि-शमनार्थानां प्रयोगे विषादि-निवृत्ति-रूपं फलम् अनुभूयते। एतद् एव अर्थाविसंवाद-रूपम् आयुर्वेदस्य मन्त्र-पदानां च प्रामाण्यम्। मन्त्रायुर्वेद-प्रामाण्यं किं-प्रयुक्तम् इति जिज्ञासायाम् आप्त-प्रामाण्य-प्रयुक्तम् इति वदति भगवान् अक्षपादः। के आप्ताः? साक्षात्कृत-धर्मत्वं भूत-दया यथा-भूताऽर्थ-चिख्यापयिषा इत्य् एतत् त्रयं येषु वर्तते ते' आप्ताः। साक्षात्कृतधर्माणः क्लेशम् अनुभवतः प्राणिनो दृष्ट्वा दयन्ते। तेभ्यो यथा-भूतार्थम् उपदेष्टुम इच्छन्ति। तत इदं हातव्यम् इदम् अस्य हानि-हेतुः, इदम् अधिगन्तव्यम्, इदम् अस्याधिगम-हेतुर् इति हेयम् उपादेयं च विविच्योपदिशन्ति। यथा आप्त-प्रोक्तत्वाद् मन्त्रायुर्वेद-प्रामाण्यं तथा तनु-भुवनादि-लक्षण-निखिल-प्रपञ्च-निर्माण-समर्थः समस्त-वस्तु-तत्त्वज्ञः क्लेश-कर्म-विपाकाशयैर् अपरामृष्टः परम-कारुणिकः परमेश्वर आत्मीय-हिताऽहित-प्राप्ति-परिहारोपायान् अविदुषः अनेक-विध-दुःख-दहन-दह्यमानान् प्राणिनः अवलोकयन् हिताऽहित-प्राप्ति-परिहारोपाय-प्रतिपादकं वेदं प्रणिनाय। ईश्वर-प्रोक्तत्वाद् एव वेदस्य प्रामाण्यम्। तथाचाऽयम् अनुमान-प्रयोगः—'वेद-वाक्यानि प्रमाणं वक्तृ-विशेषाऽभिहितत्वात् मन्त्रायुर्वेद-वाक्यवद्' इति। यद्यपि सूत्रकारोऽक्षपादाचार्यो दृष्ट-फलकं मन्त्रं दृष्ट-फलकम् आयुर्वेदं च दृष्टान्तीकृत्य मन्त्रायुर्वेदयोर् आप्त-प्रोक्तत्वाद् यथा प्रामाण्यं तथा आप्त-प्रणीतत्वाद् वेदस्य प्रामाण्यं वदति। वेदस्य प्रणेतारम् आप्तं कञ्चन सूत्रे स्पष्टं न निर्दिशति। बहव ऋषय आप्ताः प्रणेतारो यद्वा एक ईश्वर आप्तः प्रणेता इति संशयः सर्वेषां मनस्य् उदेति। अथापि 'अस्य महतो भूतस्य निःश्वसितम् एतत् यद् ऋग्वेदो यजुर्वेदः सामवेदः' इत्यादि-वेद-वाक्यस्य प्रामाण्यम् अङ्गीकुर्वन्न् अक्षपादो वेद-प्रणेतारम् आप्तम् ईश्वरम् अन्तरा अन्यं कं निर्दिशेत्? अग्नेर् उत्पन्नो धूमो यथा वह्निं ज्ञापयति तथा ईश्वरोत्पन्नो वेद ईश्वरं ज्ञापयितुम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईष्ट इति पूर्वम् एवाऽवादिषम्। न्यायसूत्र-भाष्यकर्ता पक्षिल-स्वाम्य् अपि 'द्रष्टृ-प्रवक्तृ-सामान्याच्चाऽनुमानं य एवाप्ता वेदार्थानां द्रष्टारः प्रवक्तारश्च त एव आयुर्वेद-प्रभृतीनाम् इति आयुर्वेद-प्रामाण्यवद् वेद-प्रामाण्यम् अनुमातव्यम्' इति वदन् अमुम् एवाऽर्थं द्रढयति। व्यवहारे पूर्व-मीमांसक-सरणिम् अनुसरन्त उत्तर-मीमांसका अपि शास्त्र-योनित्वाऽधिकरणे ऋग्वेदादि-लक्षणस्य शास्त्रस्येश्वरात् संभवं निर्धारयन्तो गौतम-पक्षम् एव स्थिरी-कुर्वन्ति। साक्षात्-कृत-धर्माण ऋषयो वैदिक-मन्त्राणां द्रष्टारो न तु कर्तारः। काठकं कौथुमम् इति समाख्या अपि तत्तच्छाखायाः प्रतिनियताः कठ-प्रभृतयः प्रवचन-कर्तार आसन्न् इति प्रवचनाद् एवोपपद्यन्ते। अत्र विषये पूर्व-मीमांसकानां नैयायिकानां च मत-भेदो नाऽस्ति। पूर्व-मीमांसका ऋषि-प्रणीतत्व-मात्रेण स्मृतीनां प्रामाण्यं नाऽभ्युपगच्छन्ति। अपितु श्रुति-मूलकत्वेनैव। यत्र स्मृति-चोदितेऽर्थे श्रुति-वाक्यं नोपलभ्यते तत्र परिदृश्य-मान-मन्त्रार्थवाद-बलेन विधिम् उन्नीय तादृश-विधि-मूलकत्वं स्मृतीनां कल्पयन्ति। क्वचन विप्रकीर्ण-शाखा-मूलकत्वं, क्वचन स्थले बह्व्यः शाखा उत्सन्ना इति उत्सन्न-शाखा-मूलकत्वं कल्पयन्ति। सर्वथा स्मृतेर् मूलं वेद एव कल्पनीयो नाऽन्यः। मन्वादि-स्मृतीनां स्मृतित्वं स्मर्यमाण-श्रुति-वाक्य-मूलकत्वाद् एवोपपद्यते। वेदवत् स्मृतेः प्रत्यक्षाऽनुभव-मूलकत्वे स्मृति-व्यपदेशो न संगच्छते। किं च स्मृतेर् वेद-मूलकत्वेन प्रामाण्येऽभ्युप-गते सति यत्र श्रुति-स्मृत्योर् विरोधः प्रसज्यते तत्र स्मृतेः श्रुत्यतुल्य-कक्ष्यत्वाद् बोध्यत्वं सुवचं भवति। एकत्र मूलं क्लृप्तं वर्तते, अपरत्र मूलं कल्प्यं भवति। यावद् एव स्मृतेर् मूल-भूता श्रुतिः कल्पयितुं प्रयत्यते तावद् एतद्-विरोधिनी प्रत्यक्ष-श्रुता श्रुतिर् अवतरति हृदय-पथम् इति कथं तदा मूल-कल्पनायै स्मृतिः प्रभवेत्? तद् आह तन्त्रवार्तिके भट्ट-कुमारिलः—

सोयमाभाणको लोके यदश्वेन हृतं पुरा।
तत्पश्चाद् गर्दभः प्राप्तुं केनोपायेन शक्नुयात्॥ इति।

मीमांसकैकदेशिनः स्मृतेः श्रुति-विरोध-स्थले विकल्पम् एवाऽङ्गी-कुर्वन्ति। तथा हि द्विविधो वेदः श्रूयमाणोऽनुमीयमानश्च। श्रूयमाणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुतिर् इत्य् उच्यते। अनुमीयमानः स्मृतिर् इत्य् अभिधीयते। द्वाव् अप्य् एताव् अनादी इति न तयोर् बाध्य-बाधक-भावः संभवति। व्यक्ताऽव्यक्तो हि वेद एवाऽसौ। अत एव बादरायणः 'शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्' इत्यादिषु सूत्रेषु प्रत्यक्ष-पदेन श्रुतिम् अनुमान-पदेन स्मृतिं च व्यपदिशति। प्रत्यक्ष-श्रुति-विरह-स्थले मूल-भूतां श्रुतिम् अनुमाय स्मृतेः प्रामाण्येऽभ्युपगम्यमाने बाह्य-स्मृतीनाम् अपि प्रसक्तं प्रामाण्यं परिहरति भगवान् जैमिनिः 'अपि वा कर्तृ-सामान्यात् प्रमाणम् अनुमानं स्याद्' इति। ये एव वेदार्थाऽनुष्ठानेऽधिकृताः कर्तारः ते एव स्मृत्यर्थानुष्ठाने। आचमनादयो ये स्मृति-चोदिताः पदार्थाः तैः संवलिता वेदिस्तरणादयो वैदिकाः पदार्था एकस्मिन् प्रयोगे दृश्यन्ते। न त्व् एवम् अधिकारावगमो बाह्य-स्मृतिषु विद्यते। तस्माद् मन्वादि-स्मृतय एव प्रमाणं, न बाह्य-स्मृतय इति। इमं पूर्वमीमांसकानां सिद्धान्तं नैयायिका नाऽनुमन्यन्ते। स्मृतिषु पुराणेषु च श्रुत्यनुक्तानि बहूनि व्रतान्य् अनुष्ठेयतया प्रतिपाद्यन्ते। तानि च शिष्ट-परिगृहीतान्य् अविच्छिन्नतया लोकेऽनुष्ठीयन्ते सर्वैः। उच्छिन्न-शाखां प्रकीर्ण-शाखां प्रकल्प्य क्वचन मन्त्रार्थवाद-बलेन विधि-वाक्यम् अनुमाय च स्मृति-प्रामाण्य-कल्पनाऽपेक्षया यथा भगवान् ईश्वरः सर्वस्य कर्ता सर्वस्येशिता सर्वदर्शी सर्वाऽनुकम्पी च वेदानां प्रणेता उच्यते तथा साक्षात्कृतधर्माण ऋषयो धर्मं प्रत्यक्षीकृत्य स्मृतीः प्रणिन्युः। अत ईश्वर-प्रोक्तत्वाद् यथा श्रुतिः प्रमाणं तथा ऋषि-प्रोक्तत्वात् स्मृतयः प्रमाणम् इत्य् एव सु-श्लिष्टं भवति। भगवान् परमेश्वरः किंचित् स्वयम् उपदिशति किंचित् परैर् उपदेशयति। मन्वादीनां धर्मः प्रत्यक्ष इति यास्काचार्योऽपि वदति 'साक्षात्कृत-धर्माण ऋषयो बभूवुः। ते अवरेभ्योऽसाक्षात्कृत-धर्मभ्य उपदेशेन मन्त्रान् संप्रादुर्' इति। श्रुतीनां स्मृतीनां च प्रत्यक्षाऽनुभव-मूलकत्वेऽविशिष्टे सति यत्र श्रुति-स्मृत्योर् विरोधस् तत्र विकल्पः प्राप्नोति बृहद्रथन्तर-विध्योर् इव, न बाध्य-बाधक-भावः संभवति। न हि ईश्वर-प्रत्यक्षस्य ऋषि-प्रत्यक्षस्य च प्रामाण्ये कश्चिद् विशेषोऽस्ति इत्य् आक्षेपस्य परिहारं गौतमीया एवं वदन्ति—पूर्वमीमांसकाः प्रत्यक्षश्रुत्योर् विरोधे यथा विकल्पं वदन्ति तथैव वयम् अपि श्रुति-स्मृत्योर् विरोधे विषय-विभागेन विकल्पम् अङ्गीकुर्मः। तथा हि। 'अतिरात्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं गृह्णाति' इति श्रौत-विधि-द्वयं वर्तते। अतिरात्र-यागे षोडशी-संज्ञक-पात्रे सोम-रस-ग्रहणं कुर्याद् इत्य् एको विधिः श्रूयते। अतिरात्र-यागे षोडशी-संज्ञक-पात्रे सोम-रस-ग्रहणं न कुर्याद् इत्य् अपरः प्रतिषेधः श्रूयते। एकस्मिन् यागे ग्रहणाऽग्रहणयोर् उभयोर् अनुष्ठानं नैव संभवति, विरोधात्। अतः पूर्वमीमांसका अत्र स्थले विकल्पम् एवाऽङ्गीकुर्वन्ति षोडशि-ग्रहणं कुर्याद् न वा कुर्याद् इति। 'औदुम्बरीं स्पृष्ट्वा उद्गायेत्' इत्य् एकः श्रौत-विधिः श्रूयते। यागे सामवेदीय-गण-प्रधान उद्गाता निखातम् उदुम्बर-वृक्षमय-काष्ठं स्पृष्ट्वैव उद्गानं कुर्याद् इति श्रौत-विधि-वाक्यस्याऽर्थः। 'औदुम्बरी सर्वा वेष्टयितव्या' इति स्मृतिर् वर्तते। यस्या औदुम्बर्याः समीपे उद्गाता साम गायति तां सर्वां वस्त्रेण वेष्टयेद् इति स्मृति-वाक्यस्याऽर्थः। औदुम्बर्याः सर्व-वेष्टने सति उद्गातुर् औदुम्बरी-स्पर्शो नैव भवति, वस्त्रेण व्यवधानात्। 'औदुम्बरीं स्पृष्ट्वा उद्गायेत्' इति प्रत्यक्ष-श्रुतिर् बाधिता भवति। अतः 'औदुम्बरी सर्वा वेष्टयितव्या' इति स्मृत्या तन्मूल-भूता श्रुतिर् नानुमातव्या। सा स्मृतिर् वस्त्र-लोभेन प्रवृत्ता वर्तते इति तत्र स्मृतिर् अप्रमाणम् इति वदन्ति पूर्वमीमांसकाः।

नैयायिकास् त्व् आप्ताः साक्षात्कृत-धर्माण ऋषयः स्मृतीनां कर्तारो लोभेनाऽधर्मम् उपदिशन्ति इति कल्पनम् अत्यन्तम् अन्याय्यम्। औदुम्बर्या वस्त्रेण वेष्टनम् आवश्यकम्। ब्राह्मणा यदा यागम् अनुतिष्ठन्ति तदाल्प-वस्त्रेण औदुम्बर्याः कश्चन भागो वेष्टितव्य इति ब्राह्मणान् अधिकारिण उद्दिश्य प्रवृत्तेयं श्रुतिः 'औदुम्बरीं स्पृष्ट्वा उद्गायेदिति। यदाऽत्यन्तं धनिकाः क्षत्रिया वैश्याश् च यागम् अनुतिष्ठन्ति तदा क्षौम-वस्त्रादि-नौदुम्बर्याः सर्व-वेष्टनं कर्तव्यम् इति धनिकान् क्षत्रियान् वैश्यांश् चोद्दिश्य प्रवृत्तेयं स्मृतिः 'औदुम्बरी सर्वा वेष्टयितव्या' इति व्यवस्थित-विकल्पम् एव श्रुति-स्मृत्योर् विरोध-स्थलेऽङ्गीकुर्वन्ति। तस्माद् आप्त-प्रत्यक्ष-मूलत्वेन वेदानाम् इव स्मृतीनां प्रामाण्यम् उपयन्ति नैयायिका ईश्वरस्य ऋषीणां चाऽऽप्तत्वाऽविशेषेऽपीश्वरस्य ऋषीणां च महद् अन्तरं वर्तते इति ईश्वर-प्रोक्तस्य वेदस्य प्रत्यक्ष-स्थानीयतया श्रुति-पद-व्यपदेश्यत्वम् ऋषि-प्रोक्त-स्मृतीनाम् अनुमान-स्थानीयतया स्मृति-पद-व्यपदेश्यत्वं च संगच्छत इति नैयायिका मन्यन्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्म-शास्त्राणां परमोपादेयता

साधुरामः*

'स्व-धर्मे निधनं श्रेयः' इति हि धर्म-शास्त्राण्य् आदिशन्ति। साम्प्रतं धर्म-निरपेक्षतैव केवलाऽद्वितीया नीतिर् भारत-शासनस्येति विचारणास्पदं तावद् एतद् यत् कोऽवकाशोऽद्यत्वे धर्मस्य धर्म-शास्त्राणां वेति ?

एवं किलाऽर्थ-वृत्ति-परताम् उपगतेऽद्य लोके, का गतिर् विषमाया एतस्याः स्थितेर् अपाकृष्य पुनर् अपि जनं जन-गणं वा सन्मार्ग आधातुम् ? दीक्षान्त-कालेऽनयैवाऽऽशङ्कयाऽभिभूत इवाऽऽचार्यः शिष्टं शिष्यम् उपदिशति— 'धर्मान् न प्रमदितव्यम्। स्वाध्यायान् न प्रमदितव्यम्' इति। अस्याऽयम् अर्थः— विषमे (धर्म-कृच्छ्रे) समुपस्थिते, न जातु धर्म-स्वाध्यायाभ्याम् ऋते जनस्य भवत्य् उद्धारः। धर्म-स्वाध्याययोर् अथवा धर्म-शास्त्राणां लोकाऽऽश्रयत्वाद्, अन्यासां सर्वासाम् अपि वृत्तीनां पतनाऽभिगामित्वाच् च प्रवचनस्यैतस्योपादेयता शिष्टैः प्रमाणीक्रियते। तत् कथं नु शक्यः, अर्थ-व्यसनाद् उद्धृत्य धर्म-कथा-दरिद्रं कलिं, शास्त्राणाम् आश्रयेण पुनर् अपि धर्मः संस्थापयितुम् ? इत्य् अस्ति नोऽधुना विचिकित्सा-विषयः।

प्रकृते द्वयी वृत्तिर् जनस्य दृश्यते, प्रथमा अर्थ-परा अपरा च धर्म-परा। या वै अर्थस्य, केवलस्याऽर्थस्य परा-काष्ठा—यथा 'केवलाघो भवति केवलादी' इति हि शंसन्ति, स एव हि पापाभ्युदयः। स एव कालोऽधर्मस्य दुष्कृतानां च विनाशाऽनन्तरं धर्म-संस्थापनस्य धर्मावतारस्य च। एवं च धर्माऽर्थयोश् चक्रं प्रवर्तते। लोके धर्मानन्तरम् अर्थ-युगम् अपेक्ष्यते, अर्थाऽनन्तरं च धर्म-युगम्।

उक्तं च धर्म-शास्त्रेषु पुराणाख्यानेतिहासेषु च यद् आदौ धर्म एव

---

* एम. ए.; कुरुक्षेत्र-विश्वविद्यालयः, कुरुक्षेत्रम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जगताम् अनुशासको बभूवेति। अयं च चतुष्पाद् वृषो लोकं धारयमास। कृते चतुष्पाद् धर्मः, त्रेतायां त्रिपाद् भूत्वा, द्वापरे द्विपाद् आसीत्। स कलौ चैकपाद् एवाऽभवत्। अथ यदाऽस्यैकोऽयम् अवशिष्टः पादः कथा-शेषतां प्रयास्यति, तदा किल लोकोऽर्थ-वृत्त्याः परावृत्य धर्मं प्रत्य् उन्मुखो भवेत्।

राजा प्रजापतिर् वाऽस्य धर्मस्याऽवशिष्ट एकः पादः, यतो ह्य् असौ 'धर्म-वृद्ध' इति संज्ञां लभते। 'धर्म-पाल' इति च दण्डस्याऽपरः पर्यायः स्मर्यते। इयं चाऽनुश्रुतिः शान्ति-पर्वणि भीष्म-पितामह-मुखात् प्रसृता समाम्नायते—'आदौ तावद् धर्मो राजा बभूव, अनन्तरं मात्स्य-न्यायेन प्रवृत्ताः प्रजा मिथो निश्चिक्यिरे 'कमपि दैव-शक्ति-सम्पन्नं पुरुषं स्वयं वृत्वा प्रजापतिरूपेण व्यवस्थार्थम् अभिषिञ्चाम' इति। ब्राह्मणाः किलैतस्यायां राज-व्यवस्थायाम् अदण्डया बभूवुः, दुष्टो राजाऽथ ऋषिभिर् दण्डार्होऽमन्यत। प्रकृत-धर्माद् अपगते राज-धर्मस्य प्रवर्तना-व्यवस्थे कौटिल्यार्थ-शास्त्रे पुनः समुपदिष्टे समं ब्राह्मण-क्षत्रियादीनां स्वधर्माऽऽपद्धर्म-प्रभृतिभिः। इत्थं कलि-युगे साम्प्रतम् इह-लोक-विषयकं निखिलम् अपि धर्म-कर्म-जातम् अर्थ-शास्त्र-समाख्यया प्रस्तूयते। अर्थ-शुचिर् ह्य् अद्यत्वे धर्म-शुचिः। नेहाऽऽश्चर्यास्पदं यद् गान्धिनो निखिलाऽपि धर्म-यात्रा एतद्-देशस्यार्थ-व्यवस्था-समाधान एव रता बभूव।

धर्म-क्षेत्रेऽस्मिन् भारत-वर्षे सत्यस्यैव धर्म-पर्यायत्वात् सत्यम् एव परमो धर्मः। अत्र याज्ञवल्क्योपनिषत् प्रमाणम्—

'स नैव व्यभवत्। तच्छ्रेयो-रूपम् अत्यसृजत धर्मम्। तद् एतत् क्षत्रियस्य क्षत्रं यद् धर्मः। तस्माद् धर्मात् परं नास्ति। अथोऽबलीयान् बलीयांसम् आशंसते धर्मेण यथा राज्ञा। एवं यो धर्मः सत्यं वै तत्। तस्मात् सत्यं वदन्तम् आहुर् धर्मं वदतीति, धर्मं वा वदन्तं सत्यं वदतीति। एतद् ह्येवैतद् उभयं भवति' इति।

'सत्येनोत्तभिता भूमिः'—इति च वेदेषु ऋषिभिः क्रान्त-दर्शिभिर् दृष्टम्। 'सत्यं वाचि प्रतिष्ठितम्'। वाग् हि धर्मस्याधिष्ठात्री देवी मातेव, यावद् इतरथा—अ-हिंसा, श्रद्धा, मैत्री, दया, क्षान्तिः, तुष्टिः, पुष्टिः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रिया, उन्नतिः, बुद्धिः, मेधा, तितिक्षा, ह्रीः—इति त्रयोदश भार्या मूर्त्तयश् च धर्मस्योपसंख्यायन्ते। चतुर्दश गुणा धर्मस्याऽन्यत्राऽऽत्मनो गुणा उच्यन्ते। एवं दृष्टे, आत्मनो धर्मेणैकीभावः। यो वै स्वः (=आत्मा) स एव धर्मः—अर्थात् 'स्वस्य च प्रियम् आत्मनः' इति हि तुरीयं लक्षणं धर्मस्य मूलात् प्रसूतम्। अस्य निष्कर्षः—स्वभाव एव स्व-धर्मः।

एतद् एव तथ्यं भगवतो बुद्धस्य बाल-कथासूपनिबद्धम्। सत्यान् न प्रमदितव्यम्, धर्माश्रयिणः सत्या वाक् प्राग् एवापनुदति व्यापदम्' इत्यादि वाक्यं पुरस्कृत्य तथागतस्य ताभिस्-ताभिः कथाभिः परिपुष्टा जातक-माला वस्तुतो धर्मकथा-मालैव।

चतुर्वर्ग-प्राप्तिर् नरस्य जीवन-लक्ष्यम् इवोपदिश्यते। तत्र का व्यवस्थाऽर्थ-काम-मोक्षाणाम्? अर्थ-कामौ तु सामान्येन प्रवर्तेते एवाऽऽनन्तर्येण। तयोर् अन्यतरस्मिन्न् आत्यन्तिक्य् आसक्तिः काम-वृत्तिः। वैपरीत्येन, अनासक्तिर् मोक्षः। धर्माऽर्थयोर् उभयोर् अपि मध्ये यथा कामोपभोग-संगतिः स्यात् तथा कौटिल्याचार्या उपदिशन्ति—

'धर्मार्थाऽविरोधेन कामं सेवेत। न निःसुखः स्यात्। समं वा त्रिवर्गम् अन्योन्यानुबन्धम्। एको ह्यत्यासेवितो धर्मार्थ-कामानाम् आत्मानम् इतरौ च पीडयति। अर्थ एव हि प्रधान इति कौटिल्यः, अर्थ-मूलौ हि धर्म-कामौ'।

'अर्थ-मूलौ हि धर्म-कामौ'—कथं वाऽयम् उपदेशः साधारण-जनाय अद्यत्वे न रोचेत? एष वै ऐहिक-प्रधानायाः कलि-वृत्तेः सत्यं स्व-धर्मः। एनाम् एवार्थ-वृत्तिं कलि-युगस्य युग-धर्मम् इव धर्मावताराः श्रीगान्धि-महात्मानः सममन्यन्त। एषु शब्देषु राम-राज्याभिधानेन सत्याऽहिंसाऽर्थ-शुचिता-स्वदेशिप्रियता-गृहोद्योग-हरिजनसेवेत्यादिभिर् आधारैर् उत्तम्भितां लोक-यात्राम् उपदिश्य स्व-जनेभ्य एष एव युग-धर्मो 'विश्वम् एक-नीडम्' इति बुद्धया 'विश्व-प्रेम' नाम्ना प्रख्याय धर्म-निरपेक्षो मानव-धर्म इदानीं प्रवर्तते। वेदा आहुर् 'मनुर् भव' इति।

एवं किल धर्मे लोक-यात्रा प्रतिष्ठिता विप्रकृष्टानां प्रजानां विप्रकृष्टस्य च प्रति-जनस्य। का विधा जन-जनम् उपगम्य समाज-व्यवस्थाधारेणैकत्र समाम्नातुम्? तत्र यथा किल न समाजः प्रवर्तते विना गृहाश्रमं, न वै धर्म-व्यवस्था प्रवर्तते ऋते गृह-धर्माद्, ऋते सह-धर्माद्, ऋते सह-धर्मिण्याः। एषा वै धर्मोपनिषद्, एषा वै धर्मस्य गृहाश्रम-रूपता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्म एष यो गृहस्थाश्रमः। सत्यम् एवापर-नाम्ना धर्मोऽत्र गृहपतिः। अ-हिंसा तस्य धर्म-चारिणी गृहिणी। यथा गृहाश्रमिणौ दम्पती गृहमेधाग्निना निरग्नीन् अन्याश्रम-वासिनः सर्वान् अपि पोषयतः, तथैव सत्याहिंसे संकल्पाग्निना दीक्षिते पृथिवीं लोकाचारं चोत्तभ्नीतः। गृहे गृहिगृहिण्योर् धर्म-दुघा वेदिः। यज्ञे देवपूजा-संगतीकरण-दानैर् देवाधानम्। धर्म-दीपिका, धर्म-चारिणी, धर्म-गृहिणीति च पत्न्या अपर-नामानि श्रूयन्ते। वेदेषूपनिबद्धं सकलम् अपि ऋषि-दृष्टं गृहस्थस्य परं प्रमाणम्। धर्म-साक्षात्काराद् ग्लायद्भयोऽवरेभ्यः स्मृतयः, स्मृतिभ्यः परायद्भ्य. सदाचारः 'यद्यदाचरति श्रेष्ठो लोकस् तद् अनुवर्तते'—परत्र, 'सतां हि संदेह-पदेषु वस्तुषु प्रमाणम् अन्तःकरण-प्रवृत्तयः' इति। एतद् एव धर्मस्य स्वम्।

धर्मार्थात् परावृत्य धर्म-ध्वजा धर्म-लिङ्गिनश् छद्मिनो बहिरङ्गम् एव धर्म-सर्वस्वं गृह्णन्तोऽसि-पत्रेण धर्म-प्रचारं धर्म-परिवर्तनं च कुर्वन्तो लोक-यात्रां दूषयामासुः। काले-काले धर्मावतारा: प्रमाण-पूरुषा दिवो भुवम् अवतीर्य अर्थ-वृत्त्युदात्तीकरणेन धर्मं पुनर् अवस्थापयामासुः। दूषिताम् अर्थ-वृत्तिं ततो धर्मानुदानेनाऽपरेऽर्थावतारा निर्णिज इव पुपुविरे। बुद्ध इव धर्म-कायास् ते प्रतिष्ठां स्मृतिं च लेभिरे। अयं हि लोकस्य विशेषो यद् एतान् महाभागान् स्मृति-गतान् सार्वकालीनान् इव स्मारं-स्मारं स प्रेरणां लभते, भूयो-भूयश् चाऽऽत्मानं धारयते।

विस्मृतानि धर्म-कर्माणि कथं लोकं विमार्गेऽज्ञानान्धकारे पातयन्तीति हि दृष्टान्तो यज्ञ-कर्मणोऽर्थानभिज्ञतया प्रव्यक्तः। यज्ञो वै आत्म-बलिदानम्। तन्नु स्पष्टम् एव ब्राह्मण-ग्रन्थेषु, यतः—'पुरुषो वै यज्ञः। तस्येयम् एव जुहूः। इयम् उपभृद्। आत्मैव ध्रुवा। तद् वा आत्मन एवेमा सर्वाण्यङ्गानि प्रभवन्ति। तस्माद् उ ध्रुवाया एव सर्वो यज्ञः प्रभवति। प्राण एव स्रुवः, इत्यादि। तत्र 'पुरुषः'= स्वात्मैव पशुर् यद् अयं सर्वं पश्यति लोक-जातम्। तथ्यात् परायन्तोऽवरे आत्म बलिदान-स्थाने पशु-बलिं विदधानाः पशु-हिंसाम् एव परं धर्मं मन्यमानाः सद् अप्य् अनार्य-जुष्टं विदधिरे।

एवं धर्म-कर्मेतिहासेन वयं विस्मृत-सत्यम् उपलभामहे धर्मशास्त्रेभ्यः। अन्यत्र, 'तस्माद् विषमो विभागः शास्त्र-दृष्टोऽपि नानुष्ठेयः'। अपि वा, 'निःस्वेभ्योऽन्यत्र दानं धर्म-भिक्षुकेभ्यो धर्म-प्रतिरूपकं न तु धर्मः,'। अथ च न केवलम् इन्द्र-प्रस्थं प्रत्युत पूतं तीर्थं सर्वम् अपि धर्मतीर्थ-धर्म-प्रस्थ-बुद्धया बहु-मन्यमानानां लोकाचार-वृत्या प्रमाणं मिताक्षरावचनम् इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भारत-विभूति-वन्दनम्

त्रिलोकचन्द्रः*

हसन्त्यद्रिशिखरे हिमान्यत्र नित्यं,
लसन्ति प्रसूनैर्वनानीह कामम् ।
प्रभूतैर्धनैर्यत् सदा पूरितं तत्,
सदा भारतं भारतं भातु लोके ॥१॥

फलानां सुवासो नदानां निवासो,
जनानां विलासः शिशूनां सुहासः ।
समस्ते भवे सभ्यताया विकासः,
सदा भारतं भारतं भातु लोके ॥२॥

पुरा यत्र गेहाः सदा वेदयुक्ता,
ऋषीणां मुनीनां कुलैस्संकुलाश्च ।
सुधास्वादने संगताः सर्वदा ते,
सदा भारतं भारतं भातु लोके ॥३॥

कवीनां कृतीनां कलापो विभाति,
प्रकृष्टो विचारः सदा यत् पुनाति ।
क्षपायास्तमो नाशयत्यत्र सूर्यः,
सदा भारतं भारतं भातु लोके ॥४॥

जगुर्यत्र वेदस्य गानं स्वरज्ञाः,
पपुश्चात्र दिव्यामृतं देवलोकाः ।

---

* शास्त्री, कादियाँ, गुरदासपुर (पंजाब)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा मोदमाना जना अध्यतिष्ठन्न्,
इदं भारतं भारतं भातु लोके ॥५॥

स्थलानां नदानां जनानां सदा तद्,
गुरुः पर्वतानां वलानां धनानाम् ।
तथा सभ्यतायाश्च मूलं पुरासीद्,
इदं भारतं भारतं भातु लोके ॥६॥

इदं शिक्षकः सर्वलोकस्य ख्यातोऽ-
भवद् रक्षको दीनलोकस्य नित्यम् ।
सदाचार-नेता विजेता रिपूणाम्,
इदं भारतं भारतं भातु लोके ॥७॥

पवित्रास्पदं यत्र रामस्य जातं,
तथा द्वारकाराज्यमेवात्र पूतम् ।
अमी राघवाः पाण्डवा यत्र जाता,
इदं भारतं भारतं भातु लोके ॥८॥

न चौरो न जारो न वै मारभारो,
न चाचाररोधी न विद्याविरोधी ।
न वै नास्तिको यत्र भूतो मनुष्यः,
सदा भारतं भारतं भातु लोके ॥९॥

न राज्यं प्रियं, संप्रियं यत्र वृत्तम्,
न भोगेषु मग्नं जनानाञ्च चित्तम् ।
नरैरर्जितं शुद्धमादर्श-वित्तं,
सदा भारतं भारतं भातु लोके ॥१०॥

यतो वीरगाथाग् चरन्त्यत्र भूमौ,
नरा ब्रह्म-विद्या-सुनावा तरन्ति ।
श्रुतेः पुण्यपाठं पठन्त्यत्र प्राज्ञाः,
सदा भारतं भारतं भातु लोके ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनीतं प्रियं शस्त्रशास्त्रस्य ज्ञानं,
सदा सत्यपीयूष-कुम्भस्य पानम् ।
तथा धर्म-संगीत-नादस्य गानं,
सदा भारतं भारतं भातु लोके ॥१२॥

सुराणां मुनीनां जनानामृषीणां,
तथा जीवमात्रस्य मातेयमेव ।
नमस्ते नमस्ते सदाचार-भूमे !
सदा भारतं भारतं भातु लोके ॥१३॥

पराधीनता-बन्धनं सन्निवृत्तं,
स्वराज्यं प्रियं स्वे गृहे संप्रवृत्तम् ।
जनैस्सञ्चितं शुद्धमादर्श-वित्तं,
सदा भारतं भारतं भातु लोके ॥१४॥

इदं संप्रियं जीवितादत्र राष्ट्रं,
शरीरं समस्तं हुतञ्चास्य हेतोः ।
जनानां हितार्थं, समेषां सुखार्थं,
सदा भारतं भारतं भातु लोके ॥१५॥

यदा राक्षसो वा पिशाचोऽपरो यो,
जले पर्वते वा स्थले शून्यमार्गे ।
तुदेद् घोषणेयं हतोऽसौ हतोऽसौ,
तदा भारतं भारतं भातु लोके ॥१६॥

वयं रक्षकाः सर्वदा मातृभूमेः,
तथा नाशकास्तत्तकाणां रिपूणाम् ।
असावार्यभूमिः प्रियो भूमि-भागः,
सदा भारतं भारतं भातु लोके ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृत-साहित्ये वेणी-बन्धनम्

ब्रह्मानन्दत्रिपाठी*

संस्कृत-साहित्ये वेणी-शब्दस्य वेणी, प्रवेणी, वेणिका, कबरी, धम्मिल्लादयः पर्यायाः समुपलभ्यन्ते, यद्यपि वेणी-शब्दः प्रधानतया केश-समूह-वाचक एव किन्त्वू आलंकारिकरूपेणाऽस्याऽन्यत्राऽपि बहुविधाः प्रयोगा अवलोक्यन्ते। तेषां यथासम्भवम् अत्रोदाहरणानि प्रस्तूयन्ते। तत्र प्रथमं वाल्मीकिरामायणे वेणी-शब्दस्य प्रयोगः प्राप्यते। महर्षिर् वाल्मीकिर् गङ्गाया वर्णनं कुर्वन् लिलेख—

जलाघाताट्टहासोग्रां फेननिर्मलहासिनीम्।
क्वचिद् वेणीकृतजलां क्वचिदावर्तशोभिताम्॥[1]

नास्तिको जाबालिः श्रीरामं प्रति कथयति—

समृद्धायामयोध्यायामात्मानमभिषेचय।
एकवेणीधरा हि त्वां नगरी सम्प्रतीक्षते॥[2]

हे राम! धन-धान्यादि-सर्वविधैश्वर्य-सम्पन्नाऽप्य् एषाऽयोध्यानगरी त्वदीय-विरहानल-सन्तप्ता प्रोषित-भर्तृकेवैकवेणी-धरा भूत्वा त्वां प्रतीक्षते। अतस् त्वं स्वकीयम् अभिषेकं कारय।

प्राचीन-काले शोकाऽनलदग्धाङ्गनाः, प्रोषित-भर्तृकाश् च विविध-वियोगादि-कारणैर् एकवेणी-धरा आसन्न् इति तत्-तत्-प्रसङ्गालोकनेन सुविदितं भवति। चिरात् परिचर्याऽभावेन तासां ता वेणयो रूक्षा मलिनाः किं बहुना परस्पर-संसृष्टाश् च भवन्तिस्म, यथाऽऽह कालिदासो मेघदूते—

---

* एम. ए., साहित्याचार्यः सी. के. ७/९९ सिद्धेश्वरी वाराणसी।

---

१. वा. रा. अ., ५०,१६।
२. तत्रैव, अ. १०८,८।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टामयमितनखेनासकृत् सारयन्तीं
गण्डाभोगात् कठिनविषमामेकवेणीं करेण ॥[१]

यक्षः स्वप्रियां प्रति सन्देशं प्रेषयन् कथयति, हे मेघ ! प्राक् विरह-समये पुष्प-सृजं हित्वा या शिखा मया बद्धा, शापाऽवसाने शोक-रहितेन सा मयैव मोचनीयेत्यर्थः। इत्थं प्रोषित-भर्तृकाः पत्युः परदेशात् परावर्तने सति पुनर् वेणी-मोक्षणं, वेणी-संहरणं वा कुर्वन्तिस्म ।

संस्कृत-नाटकस्य 'वेणीसंहारस्य' रचयिता स्वनामधन्यः भट्टनारायणः स्वकीये नाटके कौरव-पाण्डवानां युद्धम् अवर्णयत् । तत्र पाण्डवानां कौरवैः सह प्रवृत्ते समाह्वयाऽऽख्ये द्यूते कौरवैर् द्रौपदी बलात् स्वायत्तीकृता, तद्-अनन्तरं दुश्शासनो मध्येसभं द्रौपद्याः केशाकर्षणम् अकरोत् । तदा भीमेन दुश्शासनस्य रक्त-पानं प्रतिज्ञातम् । प्राचलच् च महाभारतस्य युद्धम् । श्रीकृष्णस्य कृपया पाण्डवैः सर्वे कौरवा यमालयाऽतिथीकृताः, दुश्शासनोऽपि च हतः । तदीय-रक्त-रञ्जितेन पाणिना भीमेन द्रौपद्या वेणी-बन्धनं कृतम् इति श्रूयते । स्त्रीणां वेणी-बन्धनं शान्ताम् अनुकूलां, सल्लक्षण-युक्तां च स्थितिं सूचयतीति शास्त्रेषु पठ्यते, लोके दृश्यते जनैर् अनुभूयते च । कालिदासस्य कुमारसम्भवे तारकासुर-वर्णनम् उपलभ्यते, स्वर्गाद् निराकृतास् सर्वे तेन देवगणा भुवि चरन्तिस्म यथा मर्त्यास् तारकेण दुरात्मना । तेषां स्त्रियः स्वराज्ये बन्दीकृताः । तदा देवा ब्रह्माणम् उपजग्मुः । ब्रह्मणा देवाः समाश्वस्ता यद् भगवतः शिवस्य भावि-तनयः कार्तिकेयः तारकासुरं विजित्य बन्दीकृताः सुरसुन्दरीर् बन्धनाद् मोचयिष्यति, तदा देवाः तासां वेणी-मोक्षणे समर्था भविष्यन्ति । तद् यथा—

तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः ।
मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभिः ॥ इति ।

कविर् माघोऽपि शिशुपालबधे पति-विरहितानां रूक्षवेणीधारिणीनां देवाङ्गनानां वर्णनं स्वमहाकाव्ये कृतवान् ।

---

१. मेघदूतम्, २.२९ ।
२. कुमारसम्भवम्, २,४१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राचीन-भारतीय-कलायां वेणी-मोक्षणस्य, केश-प्रसाधनस्य च बहु-विधान्य् आलेख्यानि प्राप्यन्ते। भगवतो बुद्धस्य पितृव्य-सुतो नन्दः स्वकीय-पत्न्याः सुन्दर्या वेणी-बन्धनं केन विधिना कुर्वन्न् आस्ते, अस्य वर्णनं महाकविर् अश्वघोषः सौन्दरनन्दे इत्थम् अकरोत्—

दत्वाथ सा दर्पणमस्य हस्ते ममाग्रतो धारय तावदेनम्।
विशेषकं यावदहं करोमीत्युवाच कान्तं स च तं बभार ॥[1]

नन्दपत्नी स्वं पतिं कथयति, आर्य! इदं दर्पणं तावत् संधारय, यावद् अहं स्वकीय-प्रसाधनस्य परिसमाप्तिं न कुर्याम्। स्नेहमयीम् इमां वाणीं श्रुत्वा नन्दः तथाऽकरोत्। प्राचीन-काले न केवलम् एकवेण्या एव द्विवेणी-चित्रणम् अपि समुपलभ्यते। एतद् द्विवेणी-चित्रणं कन्यकासु नवीन-विवाहितासु च दृश्यते। शीत-प्रधानेषु पर्वतीय-प्रदेशेषु षोडश-वेणी-बन्धनस्य प्रचारोऽद्याऽपि दरीदृश्यते, वेणी-प्रसाधने कमल-चम्पकाऽऽदि-पुष्पाणां प्रयोगस्याऽपि वर्णनं प्रायो लभ्यते। यथोक्तम् अलङ्कारसर्वस्वे—

बबन्ध धम्मिल्लमधीरदृष्टेः, क्ष्मानायकश्चम्पकमालिकाभिः ॥ इति।

संस्कृत-साहित्ये छत्र-पाश-कृष्णसर्प-भ्रमरपङ्क्ति-धूमरेखा-कृष्ण-मेघ-रात्रि-कलङ्क-यमुनादिभिर् वेणी उपमीयते। वर्णनस्य तस्योदाहरणैः पूरितम् अस्माकं सुरभारत्या अपारं वाङ्मयम्। गोस्वामीतुलसीदासोऽप्य् उत्तरकाण्डे कलि-वर्णन-प्रसङ्गे 'अबला कचभूषण' इति विलिख्य सुप्रसाधित-केशानां भूषणत्वं स्वीकार। प्राचीन-भारतीय-कलासु, शिलालेखेषु, मध्यकालिक-मन्दिरेषु च मूर्तीनां व्याजेन वेणी-बन्धनस्य बहवः प्रकाराः समुपन्यस्ताः समवलोक्यन्ते। साम्प्रतम् अपि वेणी-रचनाया बालिकासु युवतीषु सौभाग्यवतीषु, नटीषु, चलच्चित्र-पात्रासु च प्रतिदिनं नव-नवा नेत्रमानसोल्लासकराः प्रकारा दृश्यन्ते। केश-संस्कारेषु सुगन्धि-वस्तूनां, पुष्पाणां माल्यादीनां चोपयोगाः प्रकारान्तरेण क्रियन्ते रसिकाभी रमणीभिः।

नारी सौन्दर्याणां भूमिः, तस्याः प्रत्यङ्ग-वर्णनं न केवलं संस्कृत-वाङ्मयेऽपितु सर्वासु भाषासु मनोमोदकरं लभ्यते। अन्यवर्णनेष्व् अश्लीलतादि-दोषाणां सम्भवः सम्भवति; किन्तु वेणीबन्धन-वर्णनं बलाद् आनन्दोत्पत्तिम् एव जनयति, एतद् एव स्त्री-समाजस्य वास्तविकं शृङ्गारम्। इति किञ्चिन्मात्रम् एवाऽत्र दीयते।

१. सौन्दरानन्दम्, ४,१३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाटकम्—

कलि-विडम्बनम् (प्रहसनम्)

हरिदत्तशास्त्री*

(प्रविशति नान्दी-पाठकः)

(नान्दी)

सतां सन्निहितो नित्यं पाखण्ड-पथ-दूरगः ।
महेश्वरः परामृद्धिं सर्व-सिद्धिं च यच्छतु ॥

किञ्च—

धर्म्यं कर्म समाचरेच्चरणयोश्चेतो हरेश्चारयेद्,
इत्यादेशन-तत्परं पितृगणैरापीडयमानं च यः ।
प्रह्लादं निजबालभक्तशिखरं योऽलालयत् पालयन्,
सोऽयं नो वितनोतु भक्ति-विसरं संसार-बीजं विभुः ॥

(नान्द्यन्ते)

सूत्रधारः—अलम् अलम् अति विस्तरेण । अस्तीह भारते वर्षे हिमवत्प्रदेशे गङ्गाधर-कन्धरावतीर्ण-जह्नु-कन्या-सलिलधारा-धौत-तल-गरं नगर-ञ्जित-पर्यन्त-प्रकरं पञ्चपुरं नाम नगरम् । तत्राऽपि चोपकुल्यं कल्यं भवननवभाभास्वरं सवेद-ध्वनि-लयं महाविद्यालयाभिधम् उपनगरम् ।

तत्र—

प्रत्यर्थिपार्थिवसरोजलतीक्ष्णभानु-
र्नित्यं निजाश्रितचकोरकशीतभानुः ।
विप्रान्वयाप्त-जननो नयलब्धशर्मा
मुख्यः कुले जयति वाक्पतिशास्त्रिशर्मा ॥

---

* एम. ए. पी-एच डी, एकादशतीर्थः, ज्वालापुर-महाविद्यालयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्-आज्ञया कलि-विडम्बनं नाम प्रहसनम् अभिनेतव्यं श्रीहरिशास्त्रि-प्रणीतम् ।

(पटाक्षेपः)

नटः— (प्रविश्य) प्रिये ! क्वासि ?

नटी— आर्य-पुत्र ! इयम् अस्मि, किम् अस्ति गुरुतरं कार्यम् ?

सूत्रधारः— आर्ये ! अभिनवं प्रहसनम् अभिनेतव्यम् ।

नटी— किमर्थम् ।

सूत्रधारः— बलि-कलि-वलित-चरितवर्णनार्थम् ।

नटी— किं कलौ भगवद्भक्तिर् अपगता ।

सूत्र०— (शब्दं श्रुत्वा) कोऽयम् अकाण्डताण्डवः, प्रकृतम् अनुसंधातव्यम् ।

नटी— (सहर्षं कर्णं दत्वा) आर्य-पुत्र ! कर्ण-सुखदं किम् अपि कर्णामृतं च्यवते ।

सूत्र०— (श्रुत्वा) आम्, परिज्ञातम्, वेदध्वनिर् अयं गुरु-भक्ति-चटूनां विद्यालय-बटूनाम् ।

नटी— को लाभोऽनेन ?

सूत्र०— श्रुतमात्र एव ध्वनिर् अयं पातकं पातयत्य् अस्माकम् ।

नटी— (कर्णौ दत्त्वा) कुतोऽयं शब्दः ?

सूत्र०— प्रतीयते चतुर्भिर् वेदैः परिवृता भगवती सरस्वती समागच्छतीति । याऽसौ—

साक्षात्कर्पूर-गौरी, कनकमय-महाकुण्डलोल्लासि-गल्ला,
श्रीमद्वीणा-प्रवीणा शशधर-विशदे राजहंसे निषण्णा ।
बिम्बोष्ठी पद्मपत्रायतनयन-युगोत्तुङ्ग-वक्षोज-युग्मा,
हीराकारद्विजालिर् ललित-तनूद्दाममध्या सुनासिः ॥

एते वेदाश् च—

कषायितसुवाससः शशिकरस्फुरत्तन्तुभिः,
प्रकाशित-हृदम्बरास्तिलककान्तिगौराननाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृहीतकनकोत्तमस्फुरितवारिपात्रीरुचा,
मिलन्नखरुचो वचोऽमृतरसेन नः सौख्यदाः ॥

(इति निष्क्रान्तौ)

(ततः प्रविशति यथा निर्दिष्टा भगवती सरस्वती चत्वारो वेदाश् च)

वेदाः—(इतस्ततः परिक्रम्य) भगवति ! संसार-सागर-तरणि ! विरञ्चि-मुखकमल-प्रबोधनभास्वत्करसरणि ! विद्वन्मुखाम्भोज-राजहंसि ! सकल-सुरासुर-मुकुट-च्युत-पुष्प-पूजित-नखमिष-शशधरनिकर-सदने ! ब्रह्मतनूद्भवे ! अस्मद्-अधिष्ठात्री अस्मद्-आधारभूता च भवत्य् एवाऽस्ति । अतः किंचिद् विज्ञापयामः ।

सरस्वती—(तान् अभिमुखीभूय) विज्ञापयन्तु ।

वेदाः—यत् किल वयं पापहेतुना कलिहतकेन पराभूता विरल-प्रचाराः कृताः स्म ।

सरस्वती—तत्कथम् ।

वेदाः—विप्रा लङ्घनपूपानधमतममहाभ्रष्टगेहे ग्रसन्ति,
व्यासाः कासारवापी-जलकृत-सवना दाम्भमेवाभ्यसन्ति ।
गोपीमृत्पुण्ड्रभाला विरसतुलसिका काष्ठमालाः सताला,
गायन्ति ध्यानमार्गस्थितयुवतिमुखाः शुद्धवेषाः यतीन्द्राः ॥

क्षौणीसुराः पुरुषसूक्तकृतश्रमास्त्व,
केचित्तु रुद्रजपपाठन-गर्ववन्तः ।
ये प्रेतसूक्तचतुरास्चतुराननोऽपि,
तेषां पुरः किमपि नार्हति गर्वितानाम् ॥

सरस्वती—परं न सर्वे । केचन तु ··· ··· ।

वेदाः—(मध्य एव) भगवति ! ते यत् किंचित् शुद्धम् अपि पठन्ति तद् अपि केवलं शुद्धार्थम् एव, न तु परमार्थबुद्धया ।

सरस्वती—तत्कथम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदाः— प्रकाशदशनाः केचिदुद्घाटितशिरोरुहाः ।
शूद्रालये पठन्त्युच्चैर्बाहुक्षेपपरा द्विजाः ॥
दीक्षाशिक्षान्विताः शूद्रा मुद्रामुद्रितमूर्तयः ।
ब्राह्मणानवजानन्ति किमतः परमुच्यते ॥

अतोऽस्माभिः किं कर्त्तव्यं, कुत्र गन्तव्यं, वत्सान् आदिशतु भगवती ।

सरस्वती—भो भो वेदाः !

प्रातर्महस्तरणिदेवगतं ह्यृचस्तन्-
मध्यंदिने निगदितं तदिदं यजूंषि ।
ज्योतिस्तथास्तसमये खलु सामधाम
यूयं ततः सकलकारणकारणानि ॥

अन्यच्च च—

भवद्भ्यो जायते यज्ञो यज्ञाद् वृष्टिः प्रजायते ।
वृष्ट्या धान्यानि सर्वाणि वर्तन्ते तैश्च देहिनः ॥
आयान्ति यान्ति देवाद्या युष्मन्मन्त्रप्रणोदिताः ।
कतरस्तद्भवद्भ्योऽपि संसारे सारतां गतः ॥
अवजानन्ति ये वेदान् भवतो भगवत्तमान् ।
जीवन्तोऽपि न जीवन्ति ते नरा नरकौकसः ॥

वेदाः—भगवति, त्वया गृहीता मनुष्या अपि वाचस्पतितुल्या भवन्ति, तत् साक्षाद् भगवती कथम् एवं धर्म-प्रधानानि वचांसि न वदेत् ।

सरस्वती—(मध्य एव) नहि, नहि, न ममैवाऽपि तु सर्वेषाम् एवैतादृशी विचारधारा भवेत् ।

वेदाः—भगवत्या युक्तम् उक्तम् । परं तु कलि-तिमिरान्धीभूता नराधमा एवं न पश्यन्ति । अत एव पृच्छयते निराधारैर् अस्माभिः कथं स्थातव्यम् इति ।

सरस्वती—(चिरं विमृश्य) भो वेदाः, कलावेकं समीचीनम् अस्ति ।

वेदाः—(साश्चर्यम्) किं तत् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सरस्वती—यदद्यत्वे आर्य-भवनेषु वेदपारायणं नाम यज्ञः प्रचलति। यथा कश्चित् मोहमय्यां चतुर्वेद-पारायणं नाम यज्ञं कर्तुम् उद्युङ्क्ते ।

वेदाः—अपि नामेदं श्रीमद्-दयानन्द-मुनिना समनुमोदितम् ।

सरस्वती—स हि महात्मा सावित्री-यज्ञं दर्शपूर्णमासाद्यश्वमेध-पर्यन्तांश्च यज्ञान् कर्तुम् अनुरुन्धे ।

वेदाः—भगवति! पारायणं यज्ञश् चेति विप्रतिषिद्धम् एतत् । यथा विडम्बनम्, पैरोडी, अनुकरणं इत्यादयः शब्दाः पर्यायवाचितां भजन्ते । तथैव पारायणं स्वाध्यायः अध्ययनम् इत्यादयः शब्दा अपि पर्याया एव । तत् कथम् इव यज्ञ-पारायणयोः सामञ्जस्यम् ।

सरस्वती—अये विधिमुखाः! प्रतिष्ठध्वम् अभिनव-यज्ञ-दिदृक्षया मोहमयीम् । तत्रैव व्यपनीयताम् एषा विचिकित्सा । अहम् अपि इन्द्रप्रस्थे सम्पाद्यमानं गोमेधं द्रष्टुं तत्र प्रस्थातुकामाऽस्मि ।

ते धन्यास्ते महात्मानस्तन्मातुर्जठरं वरम् ।
मनुष्यलोकमासाद्य ये भजन्त्यागमोदितम् ॥
तज्जिह्वा शतखण्डा कथमथवा स्यान्न मूकता तस्य ।
मन्त्रोच्चारणवाचा विहितं गानं दानं दितं येन ॥

(इति निष्क्रान्ताः सर्वे)

(अन्यद् अन्यदा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्ति कृञिर् भौवादिको न वा ?

शिवनारायणः*

पाणिनीय-धातुपाठस्य विभिन्न-टीका-कृताम् मतानि दृष्ट्वा प्रतीयते स यथोपदेशम् अद्य न लभ्यत इति। सन्ति तत्र धातूनां स्थान-विषये बहवो मत-भेदाः। अनेके धातवो मुनिनैव प्रयोजन-विशेषम् अपेक्ष्याऽनेकत्र समाम्नाताः; अनेके च टीका-कृतां वैयाकरणानां मत-विशेष-विषयाः सन्त इतस् ततो व्यक्षिप्यन्त। अस्ति चाऽयं कृञिर् अपीदृशो यस्य स्थिति-विषये भूयान् मत-भेद आचार्येषु वर्तते। केचिद् इमं तानादिकम् मन्यन्ते, अपरे पुनर् भौवादिकम् आतिष्ठन्ते। तथाहि श्रीयुतः क्षीरस्वामि-देव-पाल्यकीर्ति-दशपाद्युणादिकृत्-स्वामिदयानन्दाः स्वोपज्ञ-व्याकरण-प्रणेताऽपाणिनीयो वैयाकरणः कलिकाल-सर्वज्ञ-विरुद-भाग् हेमचन्द्राचार्यश् चेतीमे सम्मान्या आचार्य-चरणा भूवादिषु 'धृञ् धारणे' इत्य् अस्मात् परस्तात् करणेऽर्थे कृञिम् अपि समामनन्ति। महाभाष्य-काशिका-न्यास-पदमञ्जरी-माधवीय-धातु-वृत्ति-कृतश् चेमं भूवादिषु न मन्यन्ते। तद्यथा—

क्षीरस्वामी खलु भूवादिषु 'कृञ् करणे' (६३९ श्रीयुधिष्ठिरमीमांसक-संस्करणे) इति तनादिषु च 'डुकृञ् करणे' इति धातु-सूत्रं पपाठ। 'डुकृञ् करणे इत्य् अस्य भ्वादिगणान्तर्गतपाठाच् छब्विकरणोऽत्र गृह्यते। तनादिभिः सह पाठाद् उ-विकरणोऽपि' इति प्रतिपादयन् स्वामि-दयानन्दश् च भूवादिष्व् अपि 'डुकृञ् करणे' इत्य् एव मेने।[1]

श्रीयुधिष्ठिरो मीमांसकः स्व-सम्पादितायां क्षीरतरङ्गिण्याम्[2] अयं

---

*शास्त्री, एम्. ए., वेदान्तशास्त्री, साहित्याचार्यः, दिल्लीस्थे किरोड़ीमल-महाविद्यालये संस्कृत-विभागाध्यक्षः।

---

१. द्र० यजुर्भाष्यम्, ३,५८।

२. द्र० १२० पृष्ठे पादटिप्पणी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धातुर् भूवादिष्व् एव पाणिनि-मुनि-संमत, इति सिषाधयिषयौपयिकीं टिप्पणीम् अदात्, तनादिषु चैष भगवतः पतञ्जलेर् अपि प्राग् एव प्रक्षेप-पदम् आपद् इत्य् अपि प्रत्यपीपदत्। अत्र विषये च तदीय-मीमांसायाः सारम् अत्रोद्धरामः —

(अ) प्रायेण समस्ता अपि प्राचीना आचार्या धातुम् इमं भौवादिकम् ऊरीकुर्वते ।

(आ) पालि-प्राकृत-भाषाणाम् अपि भूवादि-प्रकृति-सदृक्षस्यैव प्रयोगा लक्ष्यन्तेतराम् । हिन्द्यां प्रादेशिक-भाषासु च तानादिकस्य (कुर्, कुरु इत्यस्य वा) स्थाने कर इति रूपेणैवाऽस्य धातोर् उपलम्भोऽस्य भौवादिकत्वं द्रढयति, न तु तानादिकत्वम् ।

(इ) 'तनादि-कृञ्भ्य उः[१]' इति सूत्रे च तनादि-व्यतिरेकेणाऽपि कृञः पाठात् तनादि-गणाद् बहिर् अपि (भूवादिषु) अस्य पाठो ज्यायान् । तनादिषु पाठ-सत्त्वे हि पृथक् तनादिभिः सह पाठस्यानौचित्य-प्रतीतेर् इति ।

भगवान् पतञ्जलिस् तावद् इमं धातुं तनाद्यन्तर्गतम् एव मत्वा उ-विधायक-सूत्रे कृञ्-पद-ग्रहणं प्रत्याचख्यौ । काशिका-कृन्-मतेऽपि तनादिष्व् अस्य पाठोऽसन्दिग्धो, भ्वादि-गणाऽन्तर्गतत्व-विषये च न तेन किञ्चिद् अनुकूलं प्रतिकूलं वोक्तम्। न्यासकृच् च 'यदि तर्हि करोतेर् अन्यत् तनादि-कार्यं नेष्यते, कस्मात् तर्हि भ्वादाव् एव न पठितः ? कः पुनर् एवं लाघव-कृतो विशेषः ? भ्वादाव् अपि पाठे नियोगतोऽस्य विकरण-विधौ ग्रहणं कर्तव्यम् इत्य् अदेश्यम् एतद्' इत्य् अलिखत् ।[२] 'कःकरत्-करति-कृधि-कृतेष्वनदितेः[३]' इति सूत्रे न्यासे पदमञ्जर्यां च करत्-करत्योर् व्यत्ययेन शब् अभिहित इति भूवादिषु न धातुर् अयं तयोर् इष्ट इति प्रत्यवसीयते। सायणश् चाऽपि सति भौवादिके कृञि पाणिनि-सम्मते किमिति सूत्र-कृत् 'करत्' 'अकरत्' इति रूप-सिद्धये 'कृ-मृ-दृ-रुहि-

१. पा० अ०, ३,१,७९ ।
२. तत्रैव न्यासः ।
३. पा० अ०, ८,३,५० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्यश्छन्दसि[1]" इत्य् असूत्रयिष्यत्। 'छन्दसि लुङ् लङ् लिटः[2]' इति सूत्रेणाऽविशेषेण लुङादि-विधानाल् लुङ्-लङोर् अर्थ-कृत-विशेषाऽभावाल् लङि शपैव तत्सिद्धेर् इत्य् आह[3]। तेनाऽङ्-विधान-सामर्थ्यात् 'तनादिकृञ्भ्य उः[4]' इति सूत्रे आदि-शब्दः प्रकारे (सादृश्ये) विद्यते। स्वरूपेण च डुकृञ्-वर्ज्जम् इतरे सर्वे तनुँ, षणुँ, क्षणुँ, क्षिणुँ, ऋणुँ, तृणुँ, घृणुँ, वनुँ, मनुँ इति नत्रापि धातवोऽनुनासिकान्तत्वेन (ण-नकारान्तत्वेन) उँदित्वेन, स्वरितत्वेन च समानाः। तान् प्रकार-वाचिनाऽऽदिशब्देन सङ्गृह्णन् मुनिः कृञं पृथक् समाम्नातवान्। इति चाहुः स्म श्रीसायणाचार्याः। काशिकाकृच् च 'अयमादिशब्दोऽन्यत् तानादिक-कार्यं करोतेर् न स्याद् इति नियमार्थं[5]' इत्य् आह स्म।

अस्माकं त्व् इदम् आकूतम्—वेदे करतेर् असकृद् उपलम्भात्, पाणिनि-मुनिना च छान्दस-धातूनाम् अपि समाम्नातत्वात् करतेर् अपि छान्दस-रूप-सिद्धेः पाणिनि-मुनि-संमतत्वं सुतरां सिद्ध्यति। केवल-तनादि-पाठे च सूत्रे कृञो ग्रहणं व्यर्थम् इति प्रत्यपादि भगवता पतञ्जलिना महाभाष्ये। भ्वादाव् एव पाठे चाऽस्य शब्विकरणस्य 'उ' विकरणेनाऽपवादाच् 'छब्-वन्ति रूपाणि न व्युत्पादयितुं शक्यानीति केवलैकतर-गणान्तर्भुक्तत्वेन नाऽभीष्ट-सिद्धिः। सन्ति च शब्-विकरणवन्ति रूपाणि पाणिनेर् इष्टानीति च 'कःकरत्-करति-' इति तदीयेनैव सूत्रेणाऽऽयातम्। तेन भूवादिषु पठित्वा तनादिष्व् अपि पाठेनोभयविकरणवन्ति रूपाणि शक्यानि व्युत्पादयितुम्। तथाहि—भूवादिपाठ-सामर्थ्याच् छब्वन्ति तनादि-पाठ-सामर्थ्याच् चोवन्ति। 'उ' सूत्रे तनादिभिः सहैव कृञो ग्रहणे योऽर्थः काशिकाकृत्सायणयोर् अभिमतः सोऽपि सिद्ध्यति। 'कृ मृ-दृ-रुहिभ्यश्छन्दसी''ति सूत्रं च स्वर-

---

१. पा० अ०, ३,१,५९।

२. तत्रैव, ३,४,६।

३ द्र. माधवीय-धातुवृत्तौ ६२९ तमं धातुसूत्रम् (स्वामिद्वारकादासीयं संस्करणम्)।

४. पा० अ०, ३,१,७९।

५. काशिका, ३,१,७९ इति सूत्रस्था।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भेदायाऽवश्यं कर्तव्यम् । शब्-विकरणस्य 'करत्' इत्यस्याऽऽद्युदात्तत्वाद्, अङ्-प्रत्यय-घटितस्य च 'क्रुरद्' इत्य् अन्तोदात्तत्वेन सायणाचार्यस्याऽप्य् अभीष्टत्वात्[1] । अस्ति च सायणाचार्यैर् ऋग्वेद-भाष्ये[2] 'कृञ् करणे भौवादिक' इति स्वयम् एवोरीकृतम् । केवलेन भौवादिकेन वा तानादिकेन वा पाठेन नाऽयं स्वर-भेदो यत्न-शतेनाऽपि साध्य इत्य् उभयत्र पाठ-स्वीकार एव बलवच् छरणं ज्यायाँश् च । एतेन पदे पदे व्यत्यय-मुखाऽवलोकनापेक्षिता दुर्दशाऽपि निरस्तेति सुतराम् एतद् ग्राह्यं मतम् ।

अथेत्थम् उभयोर् गणयोः पाठेऽभ्युपगते कस्मिन् गणे धातु-सूत्रं किम्पाठम् अस्त्व् इति निर्धारण-मात्रम् अवशिष्यते । तत्र भूवादिषु तनादि-समुपलब्धेन 'डुकृञ् करणे' इत्य् अनेन सदृक्षः पाठो वाऽस्तु, क्षीरस्वामि-सायणाभ्याम् अभ्युगतः 'कृञ् करणे' इति वा पाठोऽस्त्व् इति प्रश्ने प्राप्ते ब्रूमः । उभयाचार्य-वचः-प्रामाण्याद्, भ्वादिषु भृञ्-हृञ्-धृञ्-इत्यादि-धातु-पाठ-साहचर्यात्, सुखसुखकरत्वाद्, अविशेषाच् च 'कृञ् करणे' इत्य् एव भूवादिषु, तनादिषु च 'डुकृञ् करणे' इत्येव पाठो भवत्व् इति कृतम् अतिमति-सम्मतितेन विद्वद्वदान्य-मान्येषु पठकेषु पाठकेषु च* ।

---

* निबन्ध एषोऽखिलभारतीय-संस्कृत-साहित्य-सम्मेलनस्य स्वर्णजयन्त्यु-त्सवावसरे पठितः ।

---

१. 'नन्वङः सतिशिष्टत्वाच् चित्स्वरेणान्तोदात्तेन भवितव्यम्' (ऋग्वेदभाष्यम्, १,८२,१) ।

२. द्र. सायणीयम् ऋग्वेदभाष्यम् १,२३,६ मन्त्रस्थम् । 'करताम्' । 'कृञ्करणे' भौवादिकः । लोटस्तस् । तसस्ताम् । कर्तरि शप् । गुणो रपरत्वम् । शपः पित्वादनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृह्यसूत्रेष्व् आपोहिष्ठीय-मन्त्राणां विनियोगः

कृष्णलालः*

ऋग्वेदस्य दशम-मण्डलस्थ-नवम-सूक्तान्तर्गताः प्रथमास् त्रयोऽधो-लिखिता मन्त्राः प्रथम-मन्त्रस्याऽऽद्य-शब्दान् अनुसृत्य 'आपोहिष्ठीया' इत्य् उच्यन्ते—

आपो हि ष्ठा मयोभुवस् ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥१॥
यो वः शिवतमो रसस् तस्य भाजयतेह नः । उशतीरिव मातरः ॥२॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥३॥

इमे च अब्-देवतया मन्त्रा गृह्य-सूत्रेषु विविधेषु कर्मसु विनियुक्ताः। तथाहि केषुचिद् गृह्य-सूत्रेषु विवाह-कर्मणि सप्तपदीम् अनु वधू-वरयोर् मूर्धाभिषेक-काले एतेषां मन्त्राणां विनियोगो दृश्यते[1]। शाङ्खायन-गृह्यसूत्रे (१,१४,८) पुनः सप्तपदीम् अनु पद-क्रमण-भूमेर् जलेन मार्जनार्थं मन्त्रा एते विनियुक्ताः । आग्निवेश्यः (१,६,३) एतेषां मन्त्राणां पाठं सप्तपद्याः पूर्वम् एव प्रतिदिशं मार्जनायाऽऽदिशति । आश्वलायन-गृह्यसूत्रे ते मन्त्रा अपरेष्व् एव कर्मसु पठ्यन्ते। वास्तु-परीक्षा-कर्मणि (२,८,१२;९,८) नवनिर्मितां शालां प्रदक्षिणं परिव्रजन्न् अविच्छिन्नयोदक-धारया गृहस्थ एभिर् मन्त्रैः प्रोक्षति। शान्तिकर्मणि (४,६,१४) चैभिर् मन्त्रैर् गृहस्थस्य ज्ञातय औपासनाग्निं परिक्रामन्तोऽविच्छिन्नाम् उदक-धाराम् अनुमन्त्रयन्ते । पारस्करगृह्यसूत्रे (२,७,१४) एते मन्त्रा उपनयन-कर्मण्य् अपि विनियुज्यन्ते; यदा ब्रह्मचारिणे प्रदत्तेषु दण्डादिष्व् आचार्यस् तस्याऽञ्जलिम् अद्भिः पूरयति । तस्मिन्न् एव गृह्य-सूत्रे श्रवणा-कर्मणि (२,१४,२१)

*एम. ए. पी-एच डी., जवाहर-नगरम्, दिल्ली ।

1. पा० गृ०, १,८,६; भा० गृ०, १,१८; जै० गृ०, २२,१०; वैखा० गृ०, ३,४; मा० गृ०, १,११,६; हि० गृ०, १,२१,५.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एते मन्त्रा द्वार-देशे मार्जन-वेलायां पठ्यन्ते । पुनश् च शालाकर्मानन्तरं मणिकाऽवधान-कर्मणि (३,५,४) गृहस्थ एभिर् मन्त्रैर् अप आसिञ्चति मणिके । मानवगृह्यसूत्रे (२,२,२७) तावद् अग्न्याधान-कर्मणि परिसमाप्ते कर्तृभिर् अभिषेक-काले एतेषां मन्त्राणां पाठो विधीयते । काठकगृह्यसूत्रे (२४,१९) च विहितम् एतद् यन् मधुपर्क-कर्मणि गृहस्थाद् अर्घ्यं प्रतिगृह्णता मन्त्रा एते उच्चारणीया इति । अस्मिन्न् एव गृह्यसूत्रे (६०,६) एतेषां मन्त्राणां विनियोग आग्रहायण्यां शय्याऽभ्युक्षणाऽर्थं दृश्यते । कतिपय-गृह्यानुसारंणोत्सर्ग-कर्मणि स्नानार्थम् एते मन्त्रा विनियुक्ताः[1] । स्नानार्थम् एव समावर्तन-कर्मण्य् अपि बहुभिर् गृह्य-सूत्रैर् एते मन्त्रा विनियुज्यन्ते[2] ।

एवं च गृह्यसूत्रेषु मन्त्राणाम् एतेषां विनियोग-विशेषान् समालोच्य सुस्पष्टम् एतद् भवति यत् सर्वेष्व् एव कर्मसु यथाकथञ्चित् ते जल-सम्बद्धासु क्रियास्व् एव विनियुक्ताः । अत्र च मानवगृह्यसूत्रम् अपवाद-रूपेण तिष्ठति, यतस् तत्र (१,१,२४) विवाह-कर्मण्य् अस्य मन्त्र-त्रिकस्य पाठो वरेण स्व-मुखे भस्माऽवलेप-वेलायां विहितः । अन्यथा तेषु तेषु कर्मस्व् एतेषां मन्त्राणां विनियोगस्य संयोजन-सूत्र-रूपेण जलम् एव दृश्यते । अभिषेको वा स्यात् स्नानं वा स्यान् मार्जनं वा स्याद्, यद् अपि कर्म जलेन सम्पाद्यते तस्मिन्न् एते मन्त्रा विनियुक्ताः ।

न चाऽयं मन्त्र-प्रयोगो गृह्यसूत्र-विशिष्ट एव । श्रौत-कर्मस्व् अपि सामान्येन जल-सम्बद्धासु क्रियास्व् एवैते मन्त्रा विनियुक्ताः[3], गृह्य-सूत्रेषु च

---

१. भा० गृ०, ३ ८,१; हि० गृ०, २,१८,९; आग्नि० गृ०, १,२,२.

२. शां० गृ०, ३,१,४; मा० गृ०, १,२,११; का० गृ०, ३.५; भा० गृ०, २,१९; आप० गृ०, ५,१२,६; (मं० पा०, २,७,१३-१५); पा० गृ०, २,६,१३; वा० गृ०, ९,९; आग्नि० गृ०, १,३,३.

३. आश्व० श्रौ०, ५,२०,६; शां० श्रौ०, ४,११,६; १५,३; २१,५; ७,१२, २०; ८,६,७; ९,२८,६; १४,५७,७; आप० श्रौ०, ७,२१,६; ९,१८,८; १३,१५,१३; १४,१८,१; १५ ११,१६; ला० श्रौ० २,१०,२०; ३,६,६; ४,११,७; मा० श्रौ०, ४,३,४,३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेषां विनियोगस्याऽऽधार-भूतः स प्रयोगः। तथाहि आपस्तम्ब-कात्यायन-श्रौतसूत्रयोर् उत्तर-वेदि-निर्माण-कर्मणि पर्ण-वृक्ष-निर्यास-तप्ता आपो लोष्ठेषु सिच्यन्ते।[१] शतपथब्राह्मणे (६,५,१,२) मानवश्रौतसूत्रे (६,१,२,२) चैते मन्त्रा उखा-निर्माण-काले लोष्ठाऽऽसेचनाय विनियुज्यन्ते। तैत्तिरीये ब्राह्मणे (३,९,७,५) आपस्तम्बश्रौतसूत्रे (२०,१८,७) चाऽश्वमेध-यज्ञे स्त्रीणां स्नान-कर्मण्य् एते मन्त्राः पठ्यन्ते। यथा गृह्यसूत्रेषु तथा श्रौत-सूत्रेष्व् अपि मानव-श्रौतसूत्रम् (६,१,६,१९) अपवाद-रूपेण विद्यते यतस् तत्र तैः कुम्भेष्टका अभिमन्त्र्यन्ते, न चाऽद्भिस् तत्रैषां योगः।

एतेषां मन्त्राणां सामूहिक-विनियोग-माहात्म्यं संहितास्व् अपि तेषाम् एकत्र स्थितया सूच्यते। ते सर्वास्व् एव संहितासु दृश्यन्ते, यजुर्वेद-संहितासु च ते नैकवारं दृष्टि-गोचरतां यान्ति।[२] त्रयाणाम् एतेषां मन्त्राणां संहितम् अभिधानं मैत्रायणीसंहिता यावत् पुरातनं यत्र (२,१३,१) ते आद्य-शब्दैर् एवोद्दिश्यन्ते। यथा—'आपो हि ष्ठा इति तिस्रः'। अनेन प्रतीयते एतेषाम् 'आपोहिष्ठीय' इति व्यपदेशस् तस्माद् एवाऽऽद्य-प्रयोगात् समुद्भूत इति।

अनेन समालोचनेनैतद् अपि स्पष्टं यत् प्रायशो यदि कश्चिन् मन्त्रस् तस्मिन्न् एव गृह्यसूत्रे विविधेषु गृह्यसूत्रेषु वा विविधेषु कर्मसु विनियोज्यते तर्हि तेषु तेषु कर्मसूपकरण-समानता तस्याऽनेक-विधं प्रयोगं प्रेरयति, यथाऽत्राऽऽपः। तेनोपकरणेन समानैकैव क्रिया सम्पादनीयेत्य् एतद् अनिवार्यं न विद्यते। यथा जलेन स्नानं वा स्याद् मार्जनं वा स्याद् अभिषेको वा स्यात्—सर्वत्र साधन-भूतं जलं समानम् एव। अत एव तेन समानत्वेन सत्य् अपि कर्म-वैभिन्न्ये मन्त्राणां समानत्वं लक्ष्यते।

---

१. आप० श्रौ०, १६,४,१; का० श्रौ०, १६,३,१७।

२. साम०, १८३७; अथर्व०, १,५,१–३; वाज० सं०, ११,५०–५२; ३६,१४-१६; तै० सं०, ४,१,५,१; ५,६,१,४; ७,४,१९,४; मै० सं०, २,७,५; १३,१; ४,९,२७, का० सं०, १६,४; ३५,३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भक्तसिंहः

श्यामदेवपाराशरः*

रम्यं रौद्रनृसिंहरूपमसुरोत्सादाय चादाय यो,
भक्तानां भयभञ्जनाय करुणाकीर्णोऽवतीर्णो भुवि।
आविर्भूय स शाक्यसिंह इति योऽभीतः प्रतीतः क्षमी,
स्वातन्त्र्यस्य स भक्तसिंह इति सद्दूतोऽपि भूतो हरिः ॥१॥

स्मार्या साक्षरपङ्क्तिरत्र यशसां सद्धाम्नि ते नाम्नि या,
पूज्यानां प्रथमं च पावनपदं मातापि याताऽथ ते।
तीर्थत्वं गमिता द्विषन्तप ! च तेऽशेषाः प्रदेशास्त्वया,
ये प्रायः प्रिय ! पादपङ्कजपदैः पूताः प्रभूताः पुरा ॥२॥

धन्यः पूततमश्च 'खट्कड़कलाँ-' नामा स ग्रामाग्रणीर्,
यत्रावापि जनुस्त्वयद्धमहसा धीरेण वीरेण च।
विक्रान्तान् पुरुसाहसान् यदपि सूतेऽनारतं भारतं
पञ्चाम्बोस्तदपि त्वया किमु मदक्षीवा न ग्रीवाधुना ॥३॥

गीतान्यद्य तवैव गायति युवा जीनोऽपि दीनोऽपि वा,
शीतान् श्वासभरान् वहन्ति वहवश्चान्तः स्मरन्तस्तव।
क्रीता प्राणपणेन विद्विषवधूवैधव्यदात्रा सुखं,
नीता पञ्चनदस्य वीर! भवता कीर्तिर् भुवि स्थास्नुताम् ॥४॥

चर्चा ते कृषकेषु घर्मकृतविश्रामेषु ग्रामेषु वा,
श्रोतव्यो गरिमा तव प्रतिमुखं हट्टेषु घट्टेषु वा।
आलापो विषये तवैव नगरीकोष्ठीषु गोष्ठीषु वा,
माहात्म्यं भुवनं प्रपूर्य गतमस्तोकं द्युलोकं तव ॥५॥

त्वामारोपितवान् स शूलमहहा! ऽधन्यो जघन्यो द्विषन्,
शूलः किन्तु मनस्सु नः कृतघनाघातो निखातोऽभवत्।

---

*शास्त्री, एम्० ए० पी-एच्० डी०, एम्० ओ० एल्०; प्राध्यापकः, राजकीय-महाविद्यालये होशियारपुरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हा! हा! भारतभक्तसिंह! त्रिदिवं यातोऽसि यावत् ततः,
सन्तापं शमयन्ति नो न क्षणसामस्राण्यजस्राण्यपि ॥६॥

आङ्ग्लोज्ज्ञासनविक्रमैकरस! निष्णातेन तेन त्वया,
सिक्ता स्वास्ररसेन तन्मयतया हा! पावनी या वनी।
तामुत्सादयितुं सदैव यतते सा रासभानां सभा,
भूयः पूरय भीमसिंह! भुवनान्यागर्जनैस्तर्जनैः ॥७॥

देशद्वेषगदस्युदर्पदलने क्रूरेण शूरेण च,
हाऽकारि त्वयकारिशासनमहापाशो विनाशोन्मुखः।
श्रुत्वाऽतो वहवस्तवोर्जितकथा रोमाञ्चमञ्चन्त्यहो!
भूयांसः स्फुरितोत्तराधरनसाः क्रन्दन्ति नन्दन्ति वा ॥८॥

गौरैर् लुण्ठितमस्य वैभवमथाशेषस्य देशस्य यत्,
तेषां स्फारपराक्रमेण मुषितः स्वापः सतापस्त्वया।
कण्ठे पाशमहो! निधाय भवतस्तैर् वञ्चकैर् वञ्चकैर्,
हत्वासून् निशि निश्चयेन निभृतं स्वा भीरुताविष्कृता ॥९॥

पाशोऽकारि मलिम्लुचैस्तव दरात् कण्ठोपकण्ठोऽपरैर्,
उच्छिन्नाः परतन्त्रतैकपिशुनास्ता नोऽखिलाः शृङ्खलाः।
बिभ्राणाः सुमहार्घतां तव जगत्-त्राणाश्च प्राणा गता,
विद्राणा रिपवः, त्वयैव सह तद्भूतिर्विभूतिस्त्वभूत् ॥१०॥

यावत् तात! तुषारभूधरतटीजाताः प्रपाता इमे,
लीलाचान्तविपाट्-शतद्रुलहरीनीराः समीरास्तथा।
मुञ्चन्तोऽस्रभरांश्च वीरवर! हाकारानपारान् पुनर्,
गास्यन्त्येव यशांसि तावदभितो लोकाः सशोकास्तव ॥११॥

शक्तं शात्रवशातनेऽद्भुतजगल्लीलं सुशीलं जनाः,
त्वां देशस्य वदन्ति भक्त! परमं भक्तं हि नक्तन्दिनम्।
याथार्थ्येन तु भक्त ईश! भवतो लोकोऽस्त्यहो! को न हि,
यत् संशप्तकघोरविक्रमलसद्गाथोऽसि नाथो हृदाम् ॥१२॥

दत्तं देशहिताय दुर्लभमहो! वीरं शरीरं त्वया,
दत्ता का नु तपस्विनी जनतया श्रद्धानिबद्धाञ्जलिः।
लोकोपासकशूरशेखरमणे! ऽमुत्रासि यत्रासि वा,
शान्तिः सन्ततमस्तु ते सुकृतिनः स्थेयश्च श्रेयः प्रिय! ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संघे शक्तिः कलौ युगे

मनोरमा कुटियाला*

नाऽयं वादोऽसत्यताम् उपयाति सम्प्रति संघे शक्तिः कलौ युग इति। नाऽपि च धारणेयं नूतना। प्राचीनाऽपीयं सम्प्रति यत्र तत्र स्व-वैभवं प्रदर्शयति। अद्य नाविदितचरं सर्वेषाम् एव विदुषां यद् वस्तुतः संघे कीदृशी शक्तिर् भवति। संघ-शब्देन समष्टिः स्वीक्रियते। लोक-कल्याणाय एकम् एवोद्देश्यं स्वीकृत्य एकम् एव कार्यं कुर्वतां भिन्नं भिन्नं वा कार्यं कुर्वतां जनानां समूहः संघः कथ्यते। यद्यप्य् एतादृश्य् उदाहरणान्य् अपि प्राप्यन्ते यत्रैकेनैव पुरुषेणाऽकारि महत् कार्यं, परं तादृशा अङ्गुली-परिगणनीया एव महापुरुषाः। न ते साधारणाम् अपितु त्व् अद्वितीयां काञ्चित् शक्तिम् अधिगत्याऽत्र लोक आगता जन-हिताय, जातेः समाजस्य वा कल्याणाय। पुराऽऽसीद् एतादृशः कालो यदा व्यक्तिगतं बलम् एव बलम् आसीत्। अधुना तु कलियुगे यत्सत्यं न व्यक्ति-बलस्य वैशिष्ट्यं नाऽपि व्यक्ति-गत-बलस्य कोऽपि महिमा, न व्यक्ति-गतं बलं पूज्यते नाऽप्य् आद्रियते। तेनैव नैकाकिनी व्यक्तिः किञ्चित् कर्तुं कारयितुं वा शक्नोति। कारणम् अप्य् अस्त्य् अत्र किञ्चित्। त्याग-रहिते, स्वार्थ-परायणे यत-किञ्चिद् अपि वादिनि जने नाऽस्ति तादृशं तेजो नाऽपि प्रभावः, न च तादृशी क्षमता, नहि पराक्रमो येनैकक एव कश्चित् पुरुषः सर्वम् अपि कार्यं समाचरेत, सर्वान् वा जनान् स्वायत्तीकुर्यात्। गतोऽद्य स कालः। गता सा क्षमता। न तादृशा पुरुषाः, न तादृशी प्रजा। अद्य तु संघात्मिका शक्तिर् एव बलीयसी।

अद्य यः कोऽपि यत् किमपि चिकीर्षति तत् सर्वं संघाऽऽत्मिकया शक्त्यैव। गृहे, देशे, राष्ट्रे सर्वत्रैव संघात्मिका शक्तिः कार्यं कुर्वती दृश्यते। यत्सत्यम् अधुनैकेन पुरुषेण यत् प्रयत्न-शतैर् अपि कर्तुं न शक्यते तत संघेन सपदय् एव समाचरितुं समाधातुं वा शक्यते। यद्यपि प्राचीन-भारतेऽपि संघ-बलेन बहुभिर् बहूनि कार्याणि कृतानि कामं तान्य् उचितान्य् अनुचितानि

---

*एम. ए.; होशियारपुरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा भवेयुः, परं सम्प्रति तु नाऽल्पम् अपि सम्पादयितुं कश्चित् समर्थो भवत्य् अन्तरा संघ-बलेन। नाऽपि च संघ-बलम् अन्तरा किञ्चिद् अपि कर्तुं यतते जनः। वस्तुतो नैकाकिना तत् कार्यं सम्पादयितुं शक्यते यत् संघेन। यथा—एकेन तृणेन न मूषकोऽपि वशीकर्तुं शक्यते, परं तेषां समूहेन मदोन्मत्ता मातङ्गा अपि निबद्धुं शक्यन्ते। एकस्याऽपेक्षया द्वयस्य द्वयोर् अपेक्षया त्रयाणाम् इत्य् एवम् उत्तरोत्तरा शक्तिर् एव बलीयसी। नैको योद्धा किम् अपि कर्तुं प्रभवति। योद्धॄणां समूहश् च परान् विनाश्य तेषां सर्वम् अपि वशीकर्तुं समर्थो भवति। यथा पाकस्तानेन सह संग्राम-काले मिलितैर् भारतीयैः पराहताः सर्वेऽपि पाकस्तानीयाः सैनिकाः कश्मीर-प्रान्ते प्रान्तान्तरेऽपि च।

मा दूरं गच्छन्तु भवन्तः, विलोकयन्तु राजनीति-क्षेत्रे। संघे निबद्धाः पुरुषा कथं राजनीति-क्षेत्रे यत् किमपि कर्तुम् इच्छन्ति तत् सर्वम् एकपद एव विदधति। यस्य संघस्य प्राबल्यं जायते तस्यैव जय-ध्वनिः। सर्वेऽपि तस्यैव गुण-गानं कुर्वन्ति। यथा प्रान्तेषु विलोक्यत एव। यदि कांग्रेस-संघस्य प्राबल्यं तदा तेषाम् आदेशो जनतायां प्रचलति। यदा तद्-अतिरिक्तस्य कस्यचित् संघस्य प्राबल्यं तदा तस्यैव राज्यं भवति। तेनैव प्रान्ते नैकं राज्यम् अधुना स्थायि दृश्यते। एवम् एव मत-दान-समयेऽपि यस्य कस्याऽपि लोके बहुमतं तस्यैव जयः। कामं भवतु स स्वार्थी, दुराचारः, व्यसनी, विद्या-हीनश् च। परं को नाम संघ-समक्षे तं निवारयितुं शक्नोति। अपरश् च यस्य नाऽस्ति संघ-बलं स भवतु नाम विद्वान् चरित्रवान् धर्मज्ञोऽपि, न स सदस्यत्वेन स्वीक्रियते। संघ-देव्याः कृपयैव सम्प्रत्य् अयोग्या अपि योग्या, अपण्डिता अपि पण्डिता अमान्या अपि मान्या, अपूज्या अपि पूज्या, निर्धना अपि धनिका दृश्यन्ते, गण्यन्ते स्वीक्रियन्ते च जनैः।

संघस्य बलेनैव प्रान्तेषु दृश्यते कदाचित् कस्यचिद् राज्यं कदाचिच् च कस्यचित्। पञ्चापे एव पुरा कांग्रेसस्य प्राबल्येन तस्य सत्ता, तदनन्तरं स्वतन्त्र-संघस्य सत्ता, यदा मध्ये पुनः सर्वेषाम् एव मिलितानां संघः तदा तस्यैव राज्यं, पुनर् अन्येषाम् एव राज्यं जातम्। न केवलम् अत्रोत्तर-प्रदेशेऽप्य् एवम् एव दृष्टि-पथम् आयाति। प्रान्तान्तरेषु चाऽप्य् एवम् एव जातम्। इति समाचार-पत्रैर् विज्ञाप्यते पठ्यते च प्रतिदिनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संघस्यैको नेता भवति । न नेतारं विना किम् अपि कोऽपि समाजः संघो वा साधयितुं पारयति । यत्र कुत्रापि व्यक्ति-गत-भावनाया आधिक्यं भवति तत्रैव हानिर् जायते । यस्य संघस्य यादृशो नेता भवति तस्य संघस्य तादृश्य् एव सफलताऽसफलता वा जायते । दृढश् चेत् साफल्यम् अधिगमिष्यति कार्येषु सरलश् चेत् विलम्बेन साफल्यं प्राप्स्यति । एवं संघस्योपयोगिता न केनाऽपि विदुषा भद्र-पुरुषेण वाऽपाकर्तुं शक्यते । संघम् अन्तरा भवति यदा कदा जनस्य देशस्य राष्ट्रस्य च हानिः । पुरा भारतीयानां नासीत् कश्चित् संघः, न चाऽऽसीत् तेषां संघात्मिका भावना, तेनैवाऽत्र यवनानां साम्राज्यं जातम् आङ्ग्लानां च प्रभुत्वम् अभूत् । पुनर् यदा तेष्व् एव भारतीयेषु सा संघात्मिका भावना समुद्भूता तदा पुनर् गतम् अपि राज्यं तैः साफल्येनाऽधिगतम् । यथा संघ-भावनया प्राप्तं राज्यम् इदं तथैव संघ-भावनया परिरक्षितुम् अपि शक्यते । यदा कदाऽपि संघ-भावना मानव-हृदयतो विलुप्ता भवेत् तदैव देशस्य राष्ट्रस्य जातेश् च हानिर् भवति भविष्यति च ।

संघ-विषये एतद् अप्य् अवश्यं विचारणीयं यद् यथा संघ-बलेनोचितानि कार्याणि कर्तुं शक्यन्ते, तथैवाऽनुचितान्य् अपि । अतो येन देशस्य, राष्ट्रस्य समाजस्य च हानिर् भवेद्, न तथा संघ-शक्त्या सम्पादयितुं यतेत कश्चिद् अपि विद्वान् देश-भक्तो मातृ-भूमि-रक्षको भारतीयः । सम्प्रति यत्र कुत्र संघ-बलेन समाचरतां कार्याणां विषये पठ्यते यथा कर्मचारि-वर्गस्य संघो यदा कदा आन्दोलनावसरेषु राजकीय-सम्पत्तेर् व्यक्ति-गत-सम्पत्तेः समाज-सम्पत्तेर् हानिं कुर्वन् दृश्यते । तन् नोचितम् । एतादृशेनाऽभद्र-कर्मणा न संघस्योत्थानं भविष्यति, नाऽपि च तादृशस्य संघस्य यशो वा भविष्यति । अतः प्रवृत्तिर् एतादृशी कस्याऽपि संघात्मकस्य समाजस्याऽनुचिता एव । छात्राणां संघोऽपि किञ्चिद् एतादृक् कार्यं कुर्वाणो दृश्यते विद्यालयेषु सम्प्रति यत्र तत्र । तेषां प्रवृत्तिर् एतादृशी न तद्-उपयोगिनी । उचित-कार्यं सम्पादयितुं तु तेषां संघात्मकं संघटनम् उचितम् तत्-कृते च कर्म सर्वत्र समादरणीयं परं येन स्वस्यैव हानिर् भवेत् किं तादृशेन निन्दनीयेन

(शिष्टं पृ० २०० द्र.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रीष्म-सन्तापः

दामोदरः*

तापः प्रातर् व्रजति तरणेरुग्रतां वृद्धिमाप्तो,
मध्याह्ने तु • प्रखर-किरणैर् दुःसहत्वं प्रयाति।
अस्तं यातेऽप्यतनुमहसि प्राणिनस्तापयन् स,
ग्रीष्माधिक्यं प्रथयतितरामात्मदोषोपदिष्टम्॥

प्रातः स्वल्पा क्षुदनुभवमेत्यत्र लोकस्य शैत्याद्,
मध्यान्हे तु प्रशिथिलरुचेर्भोजने नाऽनुरक्तिः।
रात्रौ तावत् सरति विहतेऽप्यङ्गधीरे समीरे,
सौख्यं सूक्ष्मं भवति नगरीवासिनां निद्रितानाम्॥

प्राणिव्रातः समग्रोऽनुभवति सततं जाग्रदाशां पिपासां,
तस्याश्शान्त्यै पिबंश्चामृतमिह मृतवज्जायते शूनतुन्दः।
पीतं पीतं निपीतं मुहुरिदमुदरे नाऽथ लब्धाऽवकाशं,
स्वेद-व्याजात् शरीरे क्षरति वसनमप्यार्द्रयत्यस्य पातुः॥

यन्त्रैरेके भवननिहितैर्वाततापानुकूलैर्,
लक्ष्मीमन्तः सुखमनुभवन्त्यातपं मन्दयन्तः।
अन्ये विद्युद्-व्यजनमपि चेदल्पवित्ता भजयुर्,
भद्रं तेषां भवतु शरणं त्वन्यथा तालवृन्तः॥

कष्टं कैश्चित् परमधनिकैर्नानुभूतं कदाचित्,
तेषां त्रासं जनयति परं ग्रीष्मकालानुभूतिम्।
प्रायस्तेषां व्रजति विलयं दीर्घदाघो निदाघः,
शीतोत्ताम्यत्सततगतिपूत्तुङ्गशैलाञ्चलेषु ॥

*शास्त्री, एम. ए. (द्वितयम्), व्याकरणाचार्यः, अनुवादविभागः, वि. वै. शोध-संस्थानम्, साधु-आश्रमः, होशि-आरपुरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्माकं राष्ट्र-भाषा

कु० आभारश्मिः*

प्रत्येकं राष्ट्रस्य काचिद् अपि भाषा राष्ट्र-भाषात्वेन व्यवहृता भवति । अस्माकं राष्ट्रस्य साम्प्रतं संविधान-स्वीकृता राष्ट्र-भाषा हिन्दी-भाषाऽस्ति ।

आदिकालाद् एव मानव-समुदायः काम् अपि भाषां व्यवह्रियमाणोऽद्यावधि परंपरां ताम् एव निर्वहति । सर्वप्रथमं मानव-समाजः कस्मिन् देशे प्रादुर् अभूत्, कां च भाषाम् अवादीत्, कया रीत्या च भाषण-प्रकारः प्रारब्धोऽभवद् इत्यादयो विषया नाऽस्माकम् इदानीं परीक्षा-क्षेत्रम् अनुप्रविष्टाः ।

साधारणतया सैव भाषा राष्ट्रभाषोच्यते यया भाषया देशस्य सर्वोऽपि व्यवहारः प्रचलति, जन-समुदायो यस्यां भाषायां बाहुल्येन जन्मतोऽनायासेन व्यवहरन्ति, या च भाषा राष्ट्रिय-भावनाया निज-संस्कृतेश् च परिचायिका भवति । संप्रति तादृशी क्षमता अस्माकं राष्ट्रस्याऽन्यतमायां हिन्दीभाषायाम् एव दृश्यते ।

कतिपये सज्जनाः साम्प्रतं राष्ट्र-भाषा-रूपेण हिन्दी-भाषाया विरोधं कुर्वन्ति । यद्यपि एवभूतानां जनानाम् अल्पीयसी संख्या, तथाऽपि राजनैतिकादिबलम् अवलम्ब्य तेषाम् आघोषस् तीव्रतयैव श्रूयते, परं क्षणिक एव रोषोऽयं भविष्यति । यतस्तयं हिन्द्य एव सति समये राष्ट्रभाषात्वेन स्वीकृता भविष्यति । यद्यपि सम्प्रति जनैर् विरोधः क्रियते तस्याः, परं विरोधे तत्र कारणान्तरम् एव न तु भाषा-गत-दोषः । हृदा तेऽप्य् अवगच्छन्त्य् एव यत् काले हिन्दी-भाषैव राष्ट्रभाषा भविष्यति । सैव सक्षमा भाषा, अतः सैव पदम् इदम् अलङ्कर्तुं शक्नोति । दक्षिणदेशीयस्य एम्. चेम्पलानी

*बी. ए.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महोदयस्य विचारो विषयेऽस्मिन् महत्त्वम् आवहति। स खल्वेवं प्रस्तौति—'यद्यप्य् अहम् दाक्षिणात्य आङ्ग्लभाषा-विशेषज्ञश् च, तथाऽपि मदीयो दृढो विश्वासः, यद् भारतीय-संस्कृतेः स्व-चिन्तनस्य च सफला अभिव्यक्तिः केवलं भारतीयभाषा-द्वारा भवितुम् अर्हति। निष्पक्ष-धिया परीक्ष्यमाणे निश्चितम् एतत् प्रतीयते यद् एवंभूता भाषा केवला हिन्दी भाषैवाऽस्ति'। न चैतावद् एवाऽपित्व् अग्रेऽपि महानुभावोऽसौ प्रस्तौति—

'एतद् अपि निस्संदिग्धं शक्यते वक्तुम्—आङ्ग्ल-शिक्षापेक्षया हिन्दी-भाषा-शिक्षणम् अहम् अतीव सरलम् अन्वभवम्। यतो हि मदीया मातृ-भाषा मलयालम-भाषाऽस्ति, तत्राऽपि हिन्दी-भाषायाम् इव बहवः संस्कृत-शब्दाः तत्सम-शब्दा वा प्रयुज्यन्ते। तृतीय-भाषारूपेण बाल्यकाले या मया हिन्दीभाषाऽधीता सर्वस्मिन्न् उत्तर-भारते मम कृते साऽतीवो-पयोगिनी संवृत्ता।'

वस्तुगत्या राष्ट्रस्यैक्यं भाषा-वादम् अतिशेते। भाषा-धर्मयोर् अस्तित्वं वस्तुतस् तर्क-रेखाम् उल्लङ्घ्यैव शक्यते निर्धारयितुम्। एवंभूता विचारा न तर्कम् अपेक्षन्ते; मानसिक्यः खल्वेता भावनाः, अतस् तद-नुकूल-मार्गान्वेषणाय मनोगत-भाववैविध्यम् अपहाय साम्य-स्वीकरणम् एवाऽऽ-वश्यकम्। भाषा-विवादैर् नेतृ-जन-प्रस्तावैश् च राष्ट्र-भाषायाः प्रश्नः समाधातुं न शक्यते। समुचित-समयस्य सामाजिक-स्थितेश् च प्रभावेणैव राष्ट्र-भाषाया निर्माणं निर्धारणं वा भवितुम् अर्हति।

केरल-प्रदेशस्य मुख्यमन्त्री श्रीनम्बूदरीपाद-महोदयः कालीकट-चिकित्सा-महाविद्यालये भाषणं कुर्वन्न् अघोषयत्—'अस्माकं राज्ये केरलप्रान्ते प्रत्येकं विषयस्य शिक्षा मलयालम-भाषाद्वारा भविष्यति'। घोषणाम् एताम् आकर्ण्य श्रोतृणाम् अन्यतमः कश्चिद् आशङ्काम् इमाम् उदभावयत्—'अनेन विधानेन केरलप्रान्तीयाश् छात्रा राज्याद् बहिर् भृति-कार्यं लब्धुं काठिन्यम् अनुभविष्यन्ती'ति। मुख्यमन्त्रि-महोदयः शङ्काम् इमाम् निवारयितुकामस् तत्क्षणम् एवाऽब्रोचत्—'राज्येऽस्मिन् केरल-प्रान्तीये हिन्दी-भाषाया अनिवार्य-शिक्षणं छात्राणां पुरतो भृति-कार्यलाभ-सम्बन्धि काठिन्यं सर्वात्मनाऽपवारयिष्यति।' व्यङ्ग्यम् इव कुर्वता मन्त्रिणाऽ-भिहितम्—'सति हिन्दी-भाषाज्ञाने मद्रास-प्रान्तम् अपहाय सर्वस्मिन् शिष्टे भारतवर्षे क्वाऽपि भृति-कार्यलाभाय काठिन्यं केरलछात्राणां न भविष्यति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति सुनिश्चितम् ।' आश्चर्यम् एतत् सन्त्य् एवंविधा अपि जना ये हि पूर्वं हिन्दी-भाषायाः प्रबल-समर्थकाः आसन्, परम् अद्याऽऽङ्ग्लभाषां राष्ट्र-भाषात्वेन संस्थापयितुं सबहुमानं प्रयतमाना दृश्यन्ते । एवंभूतानाम् आलोचक-महानुभावानाम् आलोचनाः समाधातुकामः साम्प्रतं स्वर्गतः प्रधानमन्त्री जवाहरलालनेहरु-महोदयः कदाचिद् अकथयत्—'हिन्दी-भाषाया राष्ट्र-भाषात्वेन संस्थापने मतभेदः केषाञ्चित् स्याद् इति कथंचिद् बुद्धि-पथम् आरोहति, परं कश्चिद् अपि भारतदेशवासि-जनो वैदेशिक-दास-मनोवृत्ति-प्रतीकभूताम् आङ्ग्लभाषां भारत-देशस्य राष्ट्रभाषा-पदे संस्थापयितुं तस्याः समर्थनं कुर्याद् इति बुद्धेः परम् एव भाति ।'

केचित् आङ्ग्लभाषा-पक्षपातिनः प्रतिपादयन्ति—'हिन्दीभाषा न तादृशी सक्षमा याम् आश्रित्य सर्वेषाम् आधुनिक-विचाराणां अभिव्यक्तिर् भवेत् ।' परं एतद् विचारणीयं यद् आङ्ग्लभाषायां शब्दानां लक्षत्रयं सार्द्ध-लक्षत्रयं वा अन्तर्निविष्टम् अस्ति; यदा हिन्दी-भाषायाम् अष्ट-नव-लक्षशब्दाः समाविष्टाः, तथाऽपि न सा भाषाऽभिव्यक्तिसमर्था इति आश्चर्यम् एव ।

'वस्तुतो नाऽऽङ्ग्लभाषा तादृग् वातायनं यद् विश्वप्राङ्गणे समुन्मुक्तं भवेत् । अतो विपरीतं सा खल्वेका भित्तिभूता एव, या अस्मान् आङ्ग्लभाषाऽनभिज्ञेभ्यो दाक्षिणामेरिका-एशिया-अफ्रिकादिभ्यो देशेभ्यः पृथक् करोति' इत्य् एषा घोषणा भारत-देशस्य प्रधानमन्त्रि-महोदयायाः ।

भारतदेशस्य राष्ट्रभाषापदे स्थापयितुं हिन्दीभाषा सर्वतोभावेन योग्येत्य् अत्र नास्ति सन्देहलेशोऽपि । इयम् एवैकदा राष्ट्रभाषा भविष्यतीत्यत्राऽपि न शंङ्कनीयम् । यच् च सम्प्रति भवति भाषा-वाद-विवादः स न खलु हितायाऽपितु देशस्य विनाशाय एव भविष्यति । यतः कालेऽयम् एव भाषा-विवादो देशं खण्डयितुं समर्थो भविष्यति । यथा च केषुचित् प्रान्तेषु जातम् अपि । एक-एव पञ्चाप-प्रान्तः सम्प्रति त्रिधा विभक्तः । अन्यत्राऽपि एवम् एव विवादाः प्रचलन्ति । अतोऽस्माकं मूर्धन्यैर् एतद् अवश्यं विचारणीयं यद् भाषा-विवादं दूरीकृत्य देशस्याऽखण्डताया रक्षा विधेया । भाषा-विवादश् च तदैव दूरी-भविष्यति यदा नियमतो हिन्दी-भाषाऽचिराद् एव राष्ट्र-भाषायाः पदं स्वीकुर्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वं-संस्कृतम्

कोविदाचरणद्विवेदी*

विष्वग् द्योतक-विश्व-संस्कृत-रविर्विश्वस्तुतो भूतले
विद्वन्मानसधामतामरससंह्लादक्षमोऽतिप्रियः ।
यावद् भारत-भारतं विजयतामज्ञानजध्वान्तहृत्-
साहित्यार्थसमृद्धिमानुदयवान् विघ्नासुर-ध्वंसकृत् ॥१॥

विभ्राजद् वसुधासरोवरवरश्रीकान्तपद्माकरं
दर्शंदर्शमतीवसंस्कृतबुधा मुग्धा भवेयू रताः ।
श्रीमद्रूपसुगन्धमोहितमनोहंसाः प्रशंसापरा
नो मुञ्चन्तु समुत्सुकास्सविधगास्तत्सेवनं शान्तये ॥२॥

हंहो अद्भुतचन्द्रमास्सुविमलस्सन्तापपापापहा
प्रान्ते पञ्चनदे कलासुकलितः श्रीहोशियाराभिधात् ।
नव्यो भव्यपुरात् प्रकाश्यत इहाऽनन्त-प्रभाभासुरः,
सोल्लासं परिसेव्यतां श्रमिमनः-क्लान्तिक्षयायाऽखिलैः ॥३॥

स्वर्गीयाऽमृतपायिनोऽपि विबुधाः पुण्यक्षयेऽपायिनः
पुण्यक्षेत्रमभारताऽवनि-भवाः सद्वासना भावनाः ।
ते संसेव्य सुसंस्कृतं बुधसुरैः सार्द्धं प्रियं संस्कृतं
पीयूषातिमनोरमं गतभयास् तृप्ता विना पङ् रसान् ॥४॥

विश्वस्मिन् विधिनिर्मितेऽत्र सुभगे विश्वे सविश्वेश्वरे
श्रीशार्ङ्गीकृतसच्चरित्रनिचिते लीलाविचित्रीकृते ।

---

*विद्याभूषणः, भूतपूर्व-प्राचार्यः, ज. मु. चौधरी न्याससमिति संस्कृत-पाठशाला, मण्डला (म, प्र.)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आर्या संस्कृतिमार्यसभ्यजनतासेव्यां विधातुं नवां
प्राच्यां संस्कृतसेवयाऽनवरतं स्युर्ग्राह्यमार्गा भगाः ॥५॥

यावत् संस्कृतबोधशोधनिरतैर्विद्भिर् न हा भूयते,
भाषालेखकवाचकैश्च सुतरां नो सेव्यतेऽलौकिकी।
पाठे नास्त्यनिवार्यता सुगमता छात्रादिसम्मान्यता
तावद् दुष्करता प्रतीयत इह प्रश्नोऽयमग्रे स्थितः ॥६॥

विश्वासः क्रियते यदत्र परितः श्रीसंस्कृतश्रीरियं
भाषा श्रीजननी ह्यनादि-जननी साम्राज्यसंस्थार्थिनी।
मान्या देशविदेशकीर्तितकलास्वोच्चच्छटावर्द्धिनी
भाषोल्लासिशिरोमणित्वमहिता श्रीसन्निभा भाविनी ॥७॥

(१९४ पृष्ठस्य शेषः)

कर्मणा। दायित्वं चैतादृक् संघस्य नेतुर् भवति। स सर्वदा तथा यतेत यथा न तस्य नेतृत्वे संरक्षितानां जनानां लोक-विनाशकारिणी प्रवृत्तिर् भवेत्। अतः सम्प्रत्यू एवं निश्चप्रचं कथयितुं शक्यते, यद् न संघेन विना लोकस्य कल्याणः। यतः सर्वकारोऽपि यावन् न संघरूपेण जनाः किञ्चित् कुर्वन्ति, किञ्चिद् विलिख्य प्रेषयन्ति किञ्चित् कर्तुं यतन्ते न तावत् तत्र दत्तावधानो भवति। कथितमात्रे एव, संघ-द्वारेण अपरस्मिन्न् एव दिवसे स्वीक्रियते सर्वकारेण। एकाकी पुरुषश् चेत् शत-वारान् अपि लिखेत्, वदेत् प्रार्थनापत्रं वा प्रेषयेन् नाऽल्पोऽपि प्रभावो जायते। दृश्यते प्रत्यहं प्रान्ते यत् कदाचिद् अध्यापकानां संघः कदाचिद् पत्रालय-कर्मचारि-वर्ग-संघः स्वस्मिन् स्वस्मिन्-महर्वतादि-विषये कार्यं कुर्वाणः। संघ-बलेन च ते सफला भवन्ति। यत्र नास्ति संघात्मिका शक्तिर् न तत्र साफल्यम्।

अतो लोक-कल्याण-भावनया जनकल्याण-भावनया देश-कल्याण-भावनया राष्ट्रकल्याण-भावनया वा कार्यं कुर्वाणा संघात्मिका शक्तिर् महत्य् एव भवति। आवश्यकं च तस्या इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साहित्य-समीक्षा

पाणिनीय-नाटकम्— पण्डितराजगोपालशास्त्रि-दर्शन-केशरी;

प्रकाशकः— चौखम्बा विद्याभवनम्, वाराणसी;

आकारः— $\frac{२० \times ३०}{१६}$ पृष्ठ संख्या ९१; मूल्यम् २.००

ज्योतिर्मठ (जोशीमठ) स्थ-बद्रीशवेद-वेदाङ्ग-महाविद्यालय-प्रधानाध्यापकेन दर्शनकेशरि-प्रभृति-विरुद-भाजनेन पाणिनीय-शब्दानुशासनस्य प्राक्तना-ध्यापनपद्धति-वैतालिकायमानेन श्रीगोपालशास्त्रिणा प्रणीतं पाणिनीय-नाटकम् इदम् उपसमीक्ष्य तोषम् अनुभवामि। भाषण-लेखनादि-मार्गेभ्योऽभिनय-प्रदर्शनात्मकः प्रकारः कस्यचिद् अपि वस्तुतोऽनुरथ्यं प्रचाराय साधीयान् इति विदुषाऽनेन पाणिनीयव्याकरणस्य पुरातनीम् अध्ययन-सरणिं भूयोऽपि लोके भूयसा प्रसारयितुम् ईहमानेन स्वकीय-कृतेः पाणिनीय-प्रशस्तेर् अभिनयात्मकं स्वरूपं प्रस्तोतुम् अयं प्रयासः प्रथित इति तदीय-प्राक्कथनेन स्फुटीभवति। नवदृश्यात्मकेऽस्मिन् प्रयोगे मूलतः पाणिनिर् एव स्व-व्याकरण-व्यपदेशेनोपश्लोकितः तत्प्रणीतशास्त्रस्य च विकास-क्रम इतिहास-भूमिका-प्रदानेन साधु प्रदर्शित इति निश्चप्रचं वच्मि, परं कृतेर् अस्या नाटक-संज्ञा दृश्यात्मकत्व-मूलैव नाऽन्यथाऽत्र नाटक-लक्षणं निर्व्यूढम्। प्रत्येकं दृश्यं च प्रयोगाङ्गत्वेऽपि स्वतन्त्रम् सत् पाश्चात्यनाट्य-सरणेः स्किट्-संज्ञया व्यपदेश्य-नाट्य-प्रयोगाणां कोटौ समापतति।

पुनश् च भोजपुर्याख्य-भाषायाः प्रयोगोऽपि संस्कृत-प्रभावं प्रचितम् अपि शिथिलयति। अधीत-व्याकरणाश् चैवं केवलं प्रयोगम् इमम् अवबोद्धुं प्रभवेयुर् इति येषु प्रचार इष्यते तेभ्योऽध्ययनार्थिभ्यस् तु किं तावद् इदं नाटकम् उपहरिष्यतीति मे संशयः। पद्य-रचनाऽपि नाऽत्र काव्यानुशासनाऽनु-बन्धिनीति प्रायशः वै-तु-प्रभृति-वाक्यालङ्कार-बाहुल्यं व्यनक्ति।

सत्य् अप्य् एवं संस्कृत-ज्ञानां संस्कृत-भक्तानां चाऽनुरञ्जनम् आचरत् तद्-द्वारेण प्रयोजनम् अप्य् अपेक्षितं साधयेद् एवेति संभावयन् वर्धापनैर् बहुभिः प्रणेतारं सभाजयामीति प्रयोगस्य प्रचारं प्रसारं च लोके समीहमानो विरमति मुधा विस्तरात् —

— शिवप्रसादभारद्वाजः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समाचाराः

आचार्य-विश्वबन्धोः सम्मानः—

जनवरी-मासस्य २६ दिनाङ्के गणतन्त्र-दिवसस्य शुभावसरे भारत-सरकारेण संस्थान-संचालकः पत्रस्याऽस्य सम्पादक आचार्य डा. विश्वबन्धुः पद्मभूषण इत्युपाधि-प्रदानेन सम्मानितः। अत्रत्येन कार्मिष्ठवर्गेण छात्र-वर्गेण नागरिक-जनैस् तु तस्मिन्न् एव दिने आचार्य-महोदयाय एतद् अभिलक्ष्य वर्धापनं दत्तम् एव। विश्व-संस्कृतस्य परिवारोऽपि मुदा सम्पादकाय पद्मभूषणाऽऽचार्य-विश्वबन्धु-महोदयाय वर्धापनं ददाति।

विश्व-सत्सङ्गः—

संस्थाने प्रति-रविवासरं सद्-विचार-प्रसाराय लोक-कल्याणाय भारतीय-संस्कृतया रक्षायै साप्ताहिक-सत्सङ्गस्य कार्य-क्रमः प्रचाल्यते। तत्र स्थानीय-विदुषाम् अन्येषां वाऽन्यत आगतानां महानुभावानां शास्त्रीय-विषयान् अधिकृत्य प्रवचनानि भवन्ति। मासेष्व् एतेष्व् अपि संचालक-महोदयस्य श्रीदेवदत्त-शास्त्रिणश् च विविधेषु विषयेषु प्रवचनान्य् अभूवन्। समये-समये विशिष्ट-पर्वसु जातान्य् अधिवेशनानीत्थं सन्ति—

गुरुगोविन्दसिंह-जयन्ती—

जनवरी-मासस्य १४ दिनाङ्के प्रि० रलाराम-महोदयस्याऽध्यक्षतायां गुरु-गोविन्दसिंह-जयन्त्या विशिष्टाऽधिवेशनस्य माननम् अभूत्। प्रो० जगन्नाथाग्रवाल-महोदयेन गुरुगोविन्दसिंहस्य जीवन-गतं वैशिष्ट्यं प्रादर्शि। आचार्यविश्वबन्धु-महाभागो 'गुरुगोविन्दसिंहो नैकस्यैव समाजस्याऽपितु सर्वस्याऽपि भारतस्याऽमूल्यो निधिर् जातः। नाऽस्ति तस्य सेवैकदेशीये'ति कथयन् तस्मै श्रद्धाञ्जलिम् अदात्।

अध्यक्षीय-भाषणं कुर्वताऽध्यक्षमहोदयेन गुरुगोविन्दसिंहस्य महत्त्वं प्रकाशयता तस्मै श्रद्धाञ्जलिः समर्पितः।

गणतन्त्र-दिवसः—

जनवरी-मासस्य २६ दिनाङ्के प्रातः ८-३० वादन-काले संस्थानीयैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वैर् एव कर्मिष्ठैश् छात्रैश् चैकत्रीभूय गणतन्त्र-दिवसीय-कार्य-क्रमस्याऽऽयोजनं कृतम् । प्रि० रलाराम-महोदयेन ध्वजारोहणं विधाय दिवसस्याऽस्य महत्त्वं व्यवर्णि । विशिष्टम् अधिवेशनं तु दिवसम् एनम् अधिकृत्य २८–१–६८ दिनाङ्के रवि-वासरे सायं ४ वादनतो विश्व-सत्सङ्गीय-कार्य-क्रमेऽभूत् । अध्यक्षता तस्य प्रि० रामदास-महानुभावेन विहिता । प्रि० जगतावलीसूदः श्रीदयानन्दाऽऽर्यश् च स्वान् विचारान् प्राकटयताम् । प्रा० इन्द्रदत्त उनियालस् तद्-विषयिणीं कविताम् एकाम् अश्रावयत् ।

वसन्त-पञ्चमी—

संस्थानेऽस्मिन् वसन्त-पञ्चमी पर्वोपलक्ष्य क्रीडाया विशिष्टम् आयोजनं प्रतिवर्षं यथा विधीयते स्म, तथैवाऽस्मिन् वर्षेऽपि कार्य-क्रमोऽयं महतोत्साहेन तद्-अधिकारिभिर् दत्ताऽवधानैः संयोजितः । तत्र कर-कन्दुकं वृक्षारोहणम्, धावनम्, लघु-कन्दुक-प्रक्षेपण-वैडमीन्टन-प्रमुखा अन्याश् च क्रीडा अक्रीड्यन्त । समाप्ते च कार्य-क्रमे श्रीसंचालक-महोदयस्याऽध्यक्षतायां पारितोषिक-वितरणस्याऽऽयोजनम् अभूत् । अध्यक्ष-महोदयो विजेतृभ्यो पारितोषिकं दत्त्वा सर्वेभ्यः क्रीडकेभ्य आशीर्वचांसि ददद् बौद्धिक-व्यायामेन सार्धं शारीरिक-व्यायामस्याऽप्य् उपयोगितां प्रदर्शयन् न केवलं वर्षान्त एवाऽपितु प्रत्यहं क्रीडनस्य व्यावस्थाऽत्र भवेद् इति मे प्रबलेच्छा। अतो विस्तारेण कार्यम् इदं प्रचलेद्' इत्य् अकथयत् ।

रविदास-जयन्ती—

फरवरी-मासस्य १८ दिनाङ्के सन्त-रविदास-जयन्त्युत्सवस्य कार्यक्रमो विश्व-सत्सङ्गेऽभूत् । श्री देवदत्तशास्त्री भक्त-रविदासेन कृतं विशिष्टं कार्यं परिचाययन् तेन विलिखिताया कविताया काँश्चिद् अंशान् अश्रावयत् । श्रीसंचालक-महाभागो जाति-गत-भेद-भावस्य दोषान् प्रदर्शयन् दोषेणाऽनेन भारतस्य कियती हानिर् जातेति वर्णयन् देशोन्नत्यै एकीभूय कार्यं कर्तुम् उपदिशन् सन्त-रविदासाय स्वश्रद्धाञ्जलिं समार्पयत् ।

सरस्वती-समाजः—

प्रतिमासम् अन्तिम-शुक्रवारे संस्थाने विदुषां विचारान् अवगन्तुं सरस्वती-समाजस्याऽऽयोजनं विधीयते । यत्र संस्थानीयो बाह्यो वा कश्चिद् विद्वान् विशिष्टं कम् अपि विषयम् अभिलक्ष्य स्वीयं निबन्धं वा प्रस्तौति भाषणं वा करोति । वक्तुर् भाषणाऽनन्तरम् उपस्थिताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पारिषद्या विषयस्य तस्य स्फुटी-करणाय यथारुचि प्रश्नान् कुर्वन्ति। मासेष्व् एतेष्व् अपि यैर् नाम भाषणानि कृतानि त एवं सन्ति ।

१९६७ खिष्टाब्दस्य दिसम्बर-मासीये, १९६८ खिष्टाब्दस्य जनवरी-मासीये सरस्वती-समाजाऽधिवेशने आचार्यविश्वबन्धोर् अध्यक्षतायां प्रि० रलाराम-महोदयस्य 'पूर्व और पश्चिम में ईश्वर संबन्धी भावना' इति विषयम् अधिकृत्य भाषणे अभवताम् ।

फरवरी-मासीयेऽधिवेशने प्रा० पशुपतिझा-महोदयः 'श्राद्धविमर्शः' इति विषये, श्रीदुनीचन्द्रशास्त्री च 'सुखोपलब्धिः' इति विषये आचार्य-विश्वबन्धुसंस्थानसंचालकस्याऽध्यक्षतायां स्वं स्वं निबन्धम् अपठताम् । सर्वेष्व् एवाऽधिवेशनेषु प्रश्नोत्तराऽनन्तरम् सुविस्तरम् अध्यक्षीयं भाषणम् अप्य् अभवत् ।

(इ. द. उ.)

सूचना

यैः खलु ग्राहकैः स्वीयं विश्वसंस्कृतस्य गतवर्षस्य
प्रवर्तमान-वर्षस्य च ग्राहकता-शुल्कम्
इदानीं पर्यन्तं न प्रेषितं ते तत्
शीघ्रं प्रेष्य पत्र-संवर्द्धनेन
संस्कृतम् अपि संवर्द्धयन्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

VISHVESHVARANAND INDOLOGICAL JOURNAL

Editor : **VISHVA BANDHU**

Half-yearly Organ of the V. V. Research Institute

COVERS THE ENTIRE FIELD OF INDOLOGY

INCLUDING VEDIC & CLASSICAL SANSKRIT LANGUAGE & LITERATURE, RELIGION & PHILOSOPHY, HISTORY & ARCHAEOLOGY AND FINE ARTS

Annual Subscription : **Rs. 20/ –, Sh. 30, $ 5**

25% DISCOUNT TO MEMBERS OF THE V. V. R. I. SOCIETY WITH FREE SUPPLY OF THE HINDI MONTHLY OF THE INSTITUTE, **VISHVA JYOTI**.

membership Subscription : **Rs. 12 per annum or Rs. 250/- for life**

V. V. RESEARCH INSTITUTE

P. O. Sadhu Ashram, HOSHIARPUR (Pb.),

संस्थान का सांस्कृतिक हिन्दी मासिक

विश्व-ज्योति

सह-सम्पादक—विश्वबन्धु : सन्तराम

- ★ विविध सांस्कृतिक विषयों पर रोचक लेख।
- ★ कहानी, नाटक, कविताएँ।
- ★ विश्व-सत्संग और एकलिपि-विस्तार के विशेष स्तम्भ।
- ★ बालभारती में उत्तम सामग्री।
- ★ पुस्तक परिचय, सम्पादकीय टिप्पणियां, संस्थान-समाचार और विशेष समाचार आदि।

वार्षिक शुल्क रु० १२.००

(संस्थान सदस्यों को निःशुल्क। सदस्यता-शुल्क १२ रु० वार्षिक या २५० रु० एक बार)

विश्वेश्वरानन्द वैदिक शोध संस्थान

(डा० घ०) साधु आश्रम, होशियारपुर (पं०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वेश्वरानन्दवैदिकशोधसंस्थान

का

अनुपम और अमर प्रकाशन

वैदिक-पदानुक्रम-कोष

१६ खण्डों में सम्पूर्ण

सम्पादक : आचार्य विश्वबन्धु

जिसमें चारों वेदों से सम्बन्धित संहिता, ब्राह्मण, आरण्यक, उपनिषद्, श्रौतसूत्र, गृह्यसूत्र, धर्मसूत्र, प्रातिशाख्य, शिक्षा, कल्प, निरुक्त, व्याकरण, ज्योतिष, छन्द, वेदान्त, मीमांसा, सांख्य-योगादिविषयक ग्रन्थों के एक-एक पद का पूरा-पूरा स्थल-संकेत, निर्वचन, पाठ-प्रमाणीकरण और अर्थ-बोध में परम-सहायक व्याकरण-परिचय दिया गया है। यह महाकोष भारतीय-विद्याओं और विशेषतः भारत-यूरोपीय भाषाविज्ञान के अध्ययन की आधार-शिला के समान है—

संहिता-भाग	६ खण्ड	२० (या)	३० (या)	४०	रु.	प्रति खण्ड
ब्राह्मण-भाग	२ ,,	,,	,,	,,	,,	,,
उपनिषद्-भाग	२ ,,	,,	,,	,,	,,	,,
वेदांग-भाग	४ ,,	,,	,,	,,	,,	,,
सामान्य-भाग	२ ,,	,,	,,	,,	,,	,,

टिप्पण—मूल्य का विकल्प कागज और जिल्द के भेद के कारण है।

विश्वेश्वरानन्द पुस्तक भण्डार

(डा० घ०) साधु आश्रम, होशिआरपुर (पं.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियमाः

१. विश्वसंस्कृतं त्रैमासिकं पत्रम् । (तत् फर्वरी-मई-अगस्त-नवम्बर-मासानां) प्रत्येकं १५ दिनाङ्के प्रकाशितं भविष्यति ।

२. अस्मिन् प्रकाशनार्थम् एतदीयध्येयाऽनुकूलाः सत्यः मनोहारि-पद-योगा विचार-निर्भराः शिष्ट-जनोपयोगाऽर्हाः सर्वविधा रचनाः शोध-पूर्णा आलोचनात्मका वा यात्राद्युपवर्णनात्मका वा निबन्धाः, कविताः, रूपकाणि, कथाः, हास्य-कृतयः स्वीकृताः स्युः ।

३. प्रकाशनाय प्रेष्यमाणाः कृतयो नाऽतिदीर्घाः सत्यः सुवाच्याऽक्षरैः पत्रस्यैकतो लिखिता वा टङ्किता वा स्युः ।

४. रचनानां प्राप्ति-सूचना प्राप्ति-समकालम एव प्रहीयते । तासां प्रकाशन तु यथावसरं परीक्ष्य पश्चाद् एव संभवेत् । अतो लेखक-महोदयाः प्रस्तोष्यमाण एवाऽङ्के स्वकृतीनां प्रकाशनाय साऽऽग्रहा न भवेयुः ।

५. अप्रकाशितायाः सत्याः स्व-कृतेः परावर्तनम इच्छन्तः सज्जना यथापेक्षं पत्रालयीय-मुद्रिकाः प्रेषयेयुः ।

६. लेखकाः स्वनाम-धाम-निर्देशादिकं सुवाच्याक्षरैर् लिखेयुः । सति संभवे पत्रालयादि-संकेत आंग्लभाषायाम् अपि लेख्यः ।

७. पत्रस्य वार्षिकं शुल्कं भारते ८ रूप्यकाणि. विदेशेषु १२ शिलिङ्गानि च वर्तन्ते तच् च पूर्णम् एव पूर्वतः प्रदेयं भवति । वी. पी. द्वारा प्रेषणस्य न नियमः ।

८. वि. वै. शो. संस्थानस्य सदस्यानां कृते वार्षिकं शुल्कं रु. ६) अस्ति । एषा सदस्यता द्वि-प्रकारा भवति, जीवन-सदस्यतेति च वार्षिकसदस्यतेति च । पूर्वस्याः सकृद्-देयं शुल्कं रु. २५०) । उत्तरस्याः प्रतिवर्षं देयं शुल्कं रु. १२) । सर्वेभ्योऽपि सदस्येभ्यः संस्थानस्याऽष्ट-रूप्यक-शुल्का विश्व-ज्योतिराख्या मासिकी हिन्दी-पत्रिका निःशुल्कं, षाण्मासिकी 'विश्वेश्वरानन्द-इण्डोलोजिकल-जर्नल' इत्याख्याऽऽङ्गली पत्रिका चाऽपरा २०) रूप्यकशुल्का सती १५) रूप्यकाणि प्राप्य प्रदीयते ।

९. समालोच्य-पुस्तकानां प्रत्येकं द्वितयी प्रेषणीया ।

१०. विज्ञापन-शुल्कम्—पूर्णं पृष्ठम (एकवारम् ५०), (चतुर्वारम् १७५) । पृष्ठस्य अर्धम् ३०), पृष्ठस्य तुरीयम १६) ।

११. पत्र-व्यवहारे स्वकीया ग्राहक-संख्या सदस्य-संख्या वाऽवश्यम् उल्लेख्या ।

१२. ग्राहकाः पत्र व्यवहारार्थम् आत्मनः स्थायि-स्थान-निर्देशं यथा-संभवम् आंग्लभाषायाम् अपि लिखेयुः । अस्थायि-स्थान-संकेतस् तु स्व-पत्रालय एव सूचनीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्व-संस्कृतम्

नाम

विश्वेश्वरानन्द-वैदिक-शोध-संस्थानस्य

त्रैमासिकं संस्कृत-मुख-पत्रम्

सम्पादकः

पद्मभूषण आचार्यः विश्वबन्धुः, एम. ए., शास्त्री, एम. ओ. एल्., डी. लिट्.,
केन्द्रप्रशासनिक-संस्कृत-समित्या भूतपूर्वः सदस्यः।

उप-सम्पादकौ

प्राध्यापकः इन्द्रदत्त उनियालः, एम. ए., साहित्याचार्यः, साहित्यरत्नम्।
प्राध्यापकः वीरेन्द्रशर्मा, शास्त्री, एम. ए.।

परामर्श-दातृ-मण्डलम्

(आन्तरिक-सदस्याः)

श्रीदेवदत्तः, शास्त्री, विद्याभास्करः; साधु-आश्रमः, ... पुरम्।
श्री ... वें. शर्मा, बी एस्-सी, एम. ए.; साधु-आश्रमः, होशि...
श्रीसूर्यनारायणः, शास्त्री, काव्यतीर्थः; साधु-आश्रमः, होशि...

(बाह्य-सदस्याः)

डा. हरिदत्तः, शास्त्री, एम. ए., पी-एच.डी., वेदा...
एकादशतीर्थः, भूतपूर्वः संस्कृतविभागाऽध्यक्षः; डी. ए. वी. ...
आचार्यः जगद्रामः, शास्त्री, श्रीसनातनधर्म-संस्कृतकालेजाध्यक्ष...
डा. कपिलदेवः, शास्त्री, एम. ए., पी-एच.डी., प्राध्यापक...
विद्यालयः; कुरुक्षेत्रम्।

Vishveshvaranand ... Research Institute
P. O. Sadhu Ash..., Hos...arpur (Pb., Ind.)

Name of owners :—
Vishveshvaranand Institute Society, Sadhu Ashram, Hoshiarpur.
Printed & Published by Shri Dev Datta Shastri on
1 May, 1968 at the V.V.R. Institute Press.
P. O. Sadhu Ashram, Hoshiarpur.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu